जगतीमवितुं कलिताकृतयो
विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो
भव शङ्कर देशिक मे शरणम् ॥
तोटकाष्टकम् - ०६॥

## Appendices (01 to 08)

**(pp. 196 - 401)**

## Appendix 01

# Text with English translation

शङ्कराचार्यविरचितः
सर्वसिद्धान्तसङ्ग्रहः ।

## ĀDI ŚAṄKARĀCĀRYA'S SARVA-SIDDHĀNTA-SAṄGRAHA

**Note: (1) The coalescing of vowels and consonant is separated.**
**(2) The compounds are analysed with the '+' sign, though the initial negative member is analysed with the '-' sign.**
**(3) The suffixes like °तः and °त्वतः indicating the Ablative sense are also analysed with '-' sign.**
**(4) The corrections and the correct readings are incorporated in the body of the text with a note in the footnotes.**

अथ उपोद्घातप्रकरणम् ॥१॥

वादिभिर्दर्शनैः सर्वैर्दृश्यते यत्त्वनेकधा ।
वेदान्तवेद्यं ब्रह्मेदमेकरूपमुपास्महे ॥१/१॥
वादिभिः दर्शनैः सर्वैः दृश्यते यत् तु अन्-एक-धा ।
वेदान्त+वेद्यं ब्रह्म इदम् एक+रूपम् उपास्महे ॥१/१॥

## CHAPTER I

## INTRODUCTORY

We worship the Being variously understood by different philosophical controversialists in all (their several) systems of philosophy and who is indeed the one Brahman to be realized in the Vedānta (01).

## Appendix 01

अङ्गोपाङ्गोपवेदा: स्युर्वेदस्यैवोपकारका: ।
धर्मार्थकाममोक्षाणामाश्रया: स्युश्चतुर्दश ॥१/२॥
अङ्ग+उपाङ्ग+उपवेदा: स्यु: वेदस्य एव उपकारका: ।
धर्म+अर्थ+काम+मोक्षाणाम् आश्रया: स्यु: चतु:+दश ॥१/२॥

The auxiliary limbs (*Aṅga*s of the Vedas) (वेदाङ्गानि), the secondary limbs of (उपाङ्गा:) and the supplementary Vedas (उपवेदा:) are all helpful to the Vedas themselves. They form the sources of knowledge regarding duty (धर्म), wealth (अर्थ), desire (काम) and Absolution (मोक्ष) and they are fourteen in number (02).

वेदाङ्गानि षडेतानि शिक्षा व्याकरणं तथा ।
निरुक्तं ज्यौतिषं कल्पश्छन्दोविचितिरित्यपि ॥१/३॥
वेद+अङ्गानि षट् एतानि शिक्षा व्याकरणं तथा ।
निरुक्तं ज्यौतिषं कल्प: छन्द:+विचिति: इति अपि ॥१/३॥

The auxiliary limbs of the Vedas are the following six, *viz.* the science of pronunciation (शिक्षा), grammar (व्याकरणम्), etymology (निरुक्तम्), astronomy (ज्योतिषम्), rituals code (कल्प), and also prosody (छन्दो-विचिति) (03).

मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरित्यपि ।
चत्वार्येतान्युपाङ्गानि बहिरङ्गानि तानि वै ॥१/४॥
मीमांसा न्याय+शास्त्रं च पुराणं स्मृति: इति अपि ।
चत्वारि एतानि उपाङ्गानि बहि: अङ्गानि तानि वै ॥१/४॥

The secondary limbs (of the vedas) are four *viz.* Science of Investigation (मीमांसा), Logic (न्यायशास्त्रम्), the Purāṇas and the law books (स्मृति) these are in fact outer limbs the indirectly connected with the Vedas (04).

आयुर्वेदोऽर्थवेदश्च धनुर्वेदस्तथैव च ।
गान्धर्ववेदश्चेत्येवमुपवेदाश्चतुर्विधा: ॥१/५॥
आयु:+वेद: अर्थ:+वेद: च धनु:+वेद: तथा+एव च ।
गान्धर्व+वेद: च इति एवं उपवेदा: चतु:+विधा: ॥१/५॥

## Appendix 01

The supplementary Vedas are of four kinds: they are science of medicine (आयुर्वेदः), science of Political economy (अर्थवेदः), archery (धनुर्वेदः), and the science of music (गान्धर्ववेदः) (05).

शिक्षा शिक्षयति व्यक्तं वेदोच्चारणलक्षणम् ।
वक्ति व्याकरणं तस्य संहितापदलक्षणम् ॥१/६॥
शिक्षा शिक्षयति व्यक्तं वेद+उच्चारणं लक्षणम् ।
वक्ति व्याकरणं तस्य संहिता+पद+ लक्षणम् ॥१/६॥

The science of pronunciation (शिक्षा) teaches clearly the distinctive characteristics of Vedic pronunciation, Grammar (व्याकरणम्) gives out the characteristics of words and combinations (06).

वक्ति तस्य निरुक्तं तु पदनिर्वचनं स्फुटम् ।
ज्योतिःशास्त्रं वदत्यत्र कालं वैदिककर्मणाम् ॥१/७॥
वक्ति तस्य निरुक्तं तु पद+निर्वचनं स्फुटम् ।
ज्योतिः+शास्त्रं वदति अत्र कालं वैदिक+कर्मणाम् ॥१/७॥

The science of etymology (निरुक्तम्) clearly teaches the derivations of the words to be found in them (i.e., in the Vedas). The science of astronomy (ज्योतिःशास्त्रम्) mentions here (in relation to the Vedas) prescribed times for the performance of the (various rites enjoined in the Vedas) Vedic rites (07).

क्रमं कर्मप्रयोगाणां कल्पसूत्रं प्रभाषते ।
मात्राक्षराणां सङ्ख्योक्ता छन्दोविचितिभिस्तथा ॥१/८॥
क्रमं कर्म+प्रयोगाणां कल्प+सूत्रं प्रभाषते ।
मात्रा+अक्षराणां सङ्ख्या उक्ता छन्दः+ विचितिभिः तथा ॥१/८॥

The ritual code (कल्प) gives out the details of procedure of the rites. Similarly the prosody (छन्दोविचिति) teaches the number of the *mātrā*s and syllables (to be contained in the various kinds of metrical stanzas) (08).

मीमांसा सर्ववेदार्थप्रविचारपरायणा ।
न्यायसूत्रं प्रमाणादिसर्वलक्षणतत्परम् ॥१/९॥

## Appendix 01

मीमांसा सर्व+वेद+अर्थ+प्रविचार+परायणा ।
न्याय+सूत्रं प्रमाण+आदि+सर्व+लक्षण+ तत्+परम् ॥१/९॥

The science of Investigation (मीमांसा) is devoted to the enquiry into the meaning and aim of all the Vedas. The aphorisms of Logic (न्याय) deals with the characteristics of an authoritative source of knowledge (प्रमाणम्) and such other things (09).

पुराणं नष्टशाखस्य वेदार्थस्योपबृंहणम् ।
कथारूपेण महता पुरुषार्थप्रवर्तकम् ॥१/१०॥
पुराणं नष्ट + शाखस्य वेद + अर्थस्य उपबृंहणम् ।
कथा + रूपेण महता पुरुष+ अर्थ + प्रवर्तकम् ॥१/१०॥

The *Purāṇas* supplements and amplify (the Vedas with) such Vedic topics as belong to lost recensions of Vedas and in the form of stories relating to great men, they urge on the pursuits of the true aim of life (10).

वर्णाश्रमानुरूपेण धर्माधर्मविभागतः ।
धर्मशास्त्रमनुष्ठेयधर्माणां तु नियामकम् ॥१/११॥
वर्ण+आश्रम+अनुरूपेण धर्म+अ-धर्म+विभागतः ।
धर्म+शास्त्रं अनुष्ठेय+धर्माणां तु नियामकम् ॥१/११॥

The law books (धर्मशास्त्रम्) regulates, by means of the classification of right and wrong deeds as appertaining to the various classes of people and (their) stages of life, the duties to be performed (by all) in life and deserves to be accepted and acted upon (by all) in life (11).

हेतुलिङ्गौषधस्कन्धैरायुरारोग्यदर्शकः ।
आयुर्वेदो ह्यनुष्ठेयः सर्वेषां तेन बोध्यते ॥१/१२॥
हेतु+लिङ्ग+औषध+स्कन्धैः आयुः+आरोग्य+दर्शकः ।
आयुः+वेदः हि अनुष्ठेयः सर्वेषां तेन बोध्यते ॥१/१२॥

The Āyurveda points out what makes for length of life and for health: by means of the sections relating to the duties, to the causes (of disease) to their symptoms and remedial medicines (respectively), and accordingly it teaches all (persons) what they have to do (in order to live well) (12).

अर्थवेदोऽन्नपानादिप्रदानमुखतत्पर: ।
दक्षिणाज्यपुरोडाशचरुसम्पादनादिभि: ॥१/१३॥
अर्थ+वेद: अन्न+पान+आदि+प्रदान+मुख+तत्+पर: ।
दक्षिणा+आज्य+पुरोडाश+चरु+ सम्पादन+आदिभि: ॥१/१३॥
तत्पालनाच्चतुर्वर्गपुरुषार्थप्रसाधक: ।
धनुर्वेदो भवत्यत्र परिपन्थिनिरासक: ॥१/१४॥
तत्+पालनात् चतु:+वर्ग+पुरुष+अर्थ+प्रसाधक: ।
धनु:+वेद: भवति अत्र परिपन्थि+ निरासक: ॥१/१४॥

The Science of Political Economy is devoted to the study and examination of) that happiness which is consequent upon the (proper) distribution of food, drink, and such other things (among people). Among other things, by making available the *dakṣiṇā* (i.e., the fee or any gift to be given to officiating priests in sacrifices), the clarified butter (to be used in sacrifices), the sacrificial cake (*puroḍāśa* - an oblation in the form of cake made of ground rice cooked in a earthen dish), and the *caru* (an oblation of rice or barley boiled in milk and sprinkled over with ghee, etc.) as well as by safeguarding them (form loss and destruction), it (*viz*., the *Arthaveda*) is suited to bring about the fruition of these aims of life which make up the (well-known things). Here (in this world) the archery (धनुर्वेद) leads to the overthrow of enemies (13-14).

सप्तस्वरप्रयोगो हि सामगान्धर्ववेदयो: ।
समेतो लौकिको योगो वैदिकस्योपकारक: ॥१/१५॥
सप्त+स्वर+प्रयोग: हि साम+गान्धर्व+वेदयो: ।
समेत: लौकिक: योग: वैदिकस्य उपकारक: ॥१/१५॥

The use of the seven notes of the gamut is, really speaking, associated with both the Sāma-veda and the Gāndharva-veda (music); and the blend of secular notes (as taught in the latter) is quite helpful to that of the Vedic notes (15).

अङ्गोपाङ्गोपवेदानामेवं वेदैकशेषता ।
चतुर्दशसु विद्यासु मीमांसैव गरियसी ॥१/१६॥
अङ्ग+उपाङ्ग+उपवेदानाम् एवं वेद+एक+शेषता ।

चतु:-दशसु विद्यासु मीमांसा एव गरीयसी ॥१/१६॥
विंशत्यध्याययुक्ता सा प्रतिपाद्यार्थतो द्विधा।
कर्मार्थी पूर्वमीमांसा द्वादशाध्यायविस्तृता ॥१/१७॥
विंशति+अध्याय+युक्ता सा प्रतिपाद्य+अर्थ-त: द्वि-धा।
कर्म+अर्था पूर्व+मीमांसा द्वादश +अध्याय+विस्तृता ॥१/१७॥

So, it comes out that the (above-mentioned) limbs and secondary limbs (of the Vedas), in addition to the supplementary Vedas, are all auxiliary and subordinate to the Vedas themselves. Of these fourteen branches of knowledge, the Mīmāṁsā alone is the greatest. It comprises of twenty chapters and is further divided into two parts in reference to the subject-matter deals with therein. The Pūrva-Mīmāṁsā deals with the subject the ritualistic works and extends over twelve chapters (16-17).

अस्यां सूत्रं जैमिनियं शाबरं भाष्यमस्य तु।
मीमांसावार्तिकं भाट्टं भट्टाचार्यकृतं हि तत् ॥१/१८॥
अस्यां सूत्रं जैमिनियं शाबरं भाष्यम् अस्य तु।
मीमांसा+वार्तिकं भाट्टं भट्टाचार्य+कृतं हि तत् ॥१/१८॥

The *sūtras* (or aphorisms) regarding this (Pūrva-Mīmāṁsā) have been composed by Jaimini. The commentary (thereon) is the work of Śabara(swāmi). The Mīmāṁsāvārtika is the work of Bhaṭṭa, as it has in fact been composed by the great teacher (Kumārila) Bhaṭṭa (18).

तच्छिष्योऽप्यल्पभेदेन शबरस्य मतान्तरम्।
प्रभाकरगुरुश्चक्रे तद्धि प्राभाकरं मतम् ॥१/१९॥
तत्+शिष्य: अपि अल्प+भेदेन शबरस्य मत+अन्तरम्।
प्रभाकर+गुरु:चक्रे तत् हि प्राभाकरं मतम् ॥१/१९॥

The teacher Prabhākara, though his (i.e. Kumārila Bhaṭṭa's) disciple established on a minor difference of view a difference of views a different school (of Pūrva-Mīmāṁsā) from that of Śabara and this is came to be known as the Prābhākara School (19).

भवत्युत्तरमीमांसा त्वष्टाध्यायी द्विधा च सा।
देवताज्ञानकाण्डाभ्यां व्याससूत्रं द्वयोस्समम् ॥१/२०॥

भवति उत्तर+मीमांसा तु अष्ट+अध्यायी द्वि-धा च सा ।
देवता+ज्ञान+काण्डाभ्यां व्यास+ सूत्रं द्वयो: समम् ॥१/२०॥

The Uttara-Mīmāṁsā on the other hand comprises of eight chapters and it is further divided into two parts under the head dealing (respectively) with deities and with wisdom (of true philosophy). Both of these divisions of the Uttara-Mīmāṁsā are alike had their *sūtra*s (aphorisms) composed by Vyāsa (20).

पूर्वाध्यायचतुष्केण मन्त्रवाच्यात्र देवता ।
सङ्कर्षणोदिता तद्धि देवताकाण्डमुच्यते ॥१/२१॥
पूर्व+अध्याय+चतुष्केण मन्त्र+वाच्या अत्र देवता ।
सङ्कर्षण उदिता तत् हि देवता+काण्डम् उच्यते ॥१/२१॥

In the first four chapters here (in the Uttara-Mīmāṁsā) the deities are referred to in the mantras are (given as) described by Śaṅkarṣaṇa. For that reason it is called Devatā kāṇḍa (i.e., the part dealing with the deities) (21).

भाष्यं चतुर्भिरध्यायैर्भगवत्पादनिर्मितम् ।
चक्रे विवरणं तस्य तद्वेदान्तं प्रचक्षते ॥१/२२॥
भाष्यं चतुर्भि: अध्यायै: भगवत्+पाद+निर्मितम् ।
चक्रे विवरणं तस्य तत् वेद+अन्तं प्रचक्षते ॥१/२२॥

A commentary (thereon) in four chapters has been composed by the revered teacher. The explanatory commentary which he produced concerning that (other part of the Uttara-Mīmāṁsā) is spoken of as Vedānta (22).

अक्षपाद: कणादश्च कपिलो जैमिनिस्तथा ।
व्यास: पतञ्जलिश्चैते वैदिका: सूत्रकारका: ॥१/२३॥
अक्षपाद: कणाद: च कपिल: जैमिनि: तथा ।
व्यास: पतञ्जलि: च एते वैदिका: सूत्र+ कारका: ॥१/२३॥

The authors of (philosophic) aphorisms *viz.* Akṣapāda (Gautama), Kanāda, Kapila, Jaimini, Vyāsa and Patañjali are the followers of the Vedas (23).

बृहस्पत्यार्हतौ बुद्धो वेदमार्गविरोधिनः ।
एतेऽधिकारितां वीक्ष्य सर्वे शास्त्रप्रवर्तकाः ॥१/२४॥
बृहस्पति+आर्हतौ बुद्धः वेद+मार्ग+विरोधिनः ।
एते अधिकारितां वीक्ष्य सर्वे शास्त्र+ प्रवर्तकाः ॥१/२४॥

Bṛhaspari, the Ārhata (Jaina) and the Buddha are against the (religious) path of the Vedas. In view of the (varying) fitness of individuals. They have been considered as the expounders of authoritative systems (of religion and philosophy) (24).

वेदाप्रामाण्यसिद्धान्ता बौद्धलोकायतार्हताः ।
युक्त्या निरसनीयास्ते वेदप्रामाण्यवादिभिः ॥१/२५॥
वेद+अ-प्रामाण्य+सिद्धान्ताः बौद्ध+लोकायत+आर्हताः ।
युक्त्या निरसनीयाः ते वेद+ प्रामाण्य+वादिभिः ॥१/२५॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे प्रथममुपोद्घातप्रकरणम् ।
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे प्रथमम् उपोद्घात+प्रकरणम् ।

The Bauddhas, the Lokāyatas (or the followers of Bṛhaspati) and the Jainas hold it as an established conclusion that the Vedas are not authoritative. And they have to be refuted by means of logical reasoning and by all those who maintain the authoritative-ness of the Vedas (25).

**Thus ends the first chapter the Introductory in the Sarva-darśana- siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

अथ लोकायतिकपक्षप्रकरणम् ॥२॥

लोकायतिकपक्षे तु तत्त्वं भूतचतुष्टयम् ।
पृथिव्यापस्तथा तेजो वायुरित्येव नापरम् ॥२/१॥
लोकायतिक+पक्षे तु तत्त्वं भूत+चतुष्टयम् ।
पृथिवी आपः तथा तेजः वायुः इति एव न अ-परम् ॥२/१॥

## CHAPTER II

Appendix 01

# THE SYSTEM OF THE LOKĀYATIKAS

According to the doctrine of the Lokāyatikas, the ultimate principles are merely the four elements, *viz.*, earth, water, fire, and air, and there is nothing else (01).

प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टत: ।
अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते ॥२/२॥
प्रत्यक्ष+गम्यम् एव अस्ति न अस्ति दृष्टम् अ-दृष्ट-त: ।
अ-दृष्ट+वादिभि: च अपि न अ-दृष्टं दृष्टम् उच्यते ॥२/२॥

Whatever is perceived directly that alone exists. And that which is not perceivable is non-existent, for the (very) reason that it is not perceived. And even those, who maintain the (real existence of) unperceivable, do not say that what has not been perceived has been perceived (02).

क्वापि दृष्टमदृष्टं चेददृष्टं ब्रुवते कथम् ।
नित्यादृष्टं कथं सत्स्यात् शशश्रृङ्गादिभिस्समम् ॥२/३॥
क्व-अपि दृष्टम् अ-दृष्टं चेत् अ-दृष्टं ब्रुवते कथम् ।
नित्य+अ-दृष्टं कथं सत् स्यात् शश+ श्रृङ्ग+आदिभि: समम् ॥२/३॥

If what is rarely seen here and there is taken to be the unperceivable, how can they (really) call it as the unperceivable? How can that, which is always unseen, just like the (ever unseen) horns of a hare, and other such things, be what is really existent (03)?

न कल्प्यौ सुखदु:खाभ्यां धर्माधर्मौ परैरिह ।
स्वभावेन सुखी दु:खी जनोऽन्यन्नैव कारणम् ॥२/४॥
न कल्प्यौ सुख+दु:खाभ्यां धर्म+अ-धर्मौ पर: इह ।
स्वभावेन सुखी दु:खी जन: अन्यत् न एव कारणम् ॥२/४॥

In consequence of (the existence of) pleasure and pain, merit and demerit should not be postulated here (by other doctrine-holders). A man feels pleasure or pain by nature, and there is no other cause (for it) (04).

शिखिनश्चित्रयेत् को वा कोकिलान् क: प्रकूजयेत् ।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम् ॥२/५॥

शिखिन:चित्रयेत् क: वा कोकिलान् क: प्रकूजयेत् ।
स्वभाव+व्यतिरेकेण विद्यते न अत्र कारणम् ।।२/५।।

Who colours wonderfully the peacocks, or who makes the cuckoos coo so well? There is relating to these (things) no cause other than nature (05).

स्थूलोऽहं तरुणो वृद्धो युवेत्यादिविशेषणै: ।
विशिष्टो देह एवात्मा न ततोऽन्यो विलक्षण: ।।२/६।।
स्थूल: अहं तरुण: वृद्ध: युवा इति+आदि+विशेषणै: ।
विशिष्ट: देह एव आत्मा न तत: अन्य: विलक्षण: ।।२/६।।

The Self (आत्मा) is the body itself, which is characterised by such attributes as are implied in the expressions - 'I am stout', 'I am young', 'I am old', 'I am adult', etc. It is nothing else which is distinct from that (body) (06).

जडभूतविकारेषु चैतन्यं यत्र दृश्यते ।
ताम्बूलपूगचूर्णानां योगाद्राग इवोत्थितम् ।।२/७।।
जड+भूत+विकारेषु चैतन्यं यत्र दृश्यते ।
ताम्बूल+पूग+चूर्णानां योगात् राग: इव उत्थितम् ।।२/७।।

That intelligence, which is found to be embodied in the (various) modified forms composed of the non-intelligent elements- (that) is produced in the same manner in which red color is produced from the combination of betel, arena-nut (पूग) and lime (चूर्णम्) (07).

इहलोकात्परो नान्य: स्वर्गोऽस्ति नरको न च ।
शिवलोकादयो मूढै: कल्प्यन्तेऽन्यै: प्रतारकै: ।।२/८।।
इह+लोकान् पर: न अन्य: स्वग: अस्ति नरक: न च ।
शिव+लोक+आदय: मूढै: कल्प्यन्ते अन्यै: प्रतारकै: ।।२/८।।

Higher than this world there is none. There is no heaven (स्वर्ग:) (of celestial world of enjoyment) and nor hell (नरक:). The world of Śiva (and other such worlds) are all invented by those who are (followers of) other (systems of thought) than (what is followed by) ourselves and are (therefore) ignorant impostors (प्रतारक:) (08).

स्वर्गानुभूतिर्मृष्टास्ति द्व्यष्टवर्षवधूगम: ।
सूक्ष्मवस्त्रसुगन्धस्रक्चन्दनादिनिषेवणम् ॥२/९॥
स्वर्ग+अनुभूति: मृष्टा अस्ति द्वि+अष्ट+वर्ष+वधू+गम: ।
सूक्ष्म+वस्त्र+सुगन्ध+स्रक्+ चन्दन+आदि+निषेवणम् ॥२/९॥

The enjoyments of heaven consist in partaking of sweet food here, in enjoying the company of damsels of sixteen years of age, and also in enjoying the pleasures that are derivable from the use of fine cloths, sweet scents, flower garlands sandal, and such other things (of delicious luxury) (09).

नरकानुभवो वैरिशस्त्रव्याध्याद्युपद्रव: ।
मोक्षस्तु मरणं तच्च प्राणवायुनिवर्तनम् ॥२/१०॥
नरक+अनुभव: वैरि+शस्त्र+व्याधि+आदि उपद्रव: ।
मोक्ष: तु मरणं तत् च प्राण+वायु+ निवर्तनम् ॥२/१०॥

The experience of (the miseries of) hell consists (only) in the pain caused by enemies, by injurious weapons, by diseases and other causes of suffering. The Absolution (मोक्ष:) is, however, death (itself) and that consists in the cessation (निवर्तनम्) of (breath the principal vital air) (10).

अतस्तदर्थं नायासं कर्तुमर्हति पण्डित: ।
तपोभिरुवासाद्यैर्मूढ एव प्रशुष्यति ॥२/११॥
अत: तत्+अर्थं न आयासं कर्तुम् अर्हति पण्डित: ।
तपोभि: उपवास+आद्यै: मूढ: एव प्रशुष्यति ॥२/११॥

For that reason, it is not proper on the part of a wise man to take (any) trouble on account of this (Absolution). It is only a fool that becomes thin and worn out to dryness by performing penances, and by fasting, etc. (11).

पातिव्रत्यादिसङ्केतो बुद्धिमद्दुर्बलै: कृत: ।
सुवर्णभूमिदानादि मृष्टामन्त्रणभोजनम् ।
क्षुत्क्षामकुक्षिभिर्लोकैर्दरिद्रैरुपकल्पितम् ॥२/१२॥
पातिव्रत्य+आदि+सङ्केत: बुद्धिमत्+दुर्बलै: कृत: ।
सुवर्ण+भूमि+दान+आदि मृष्ट+ आमन्त्रण+भोजनम् ।

क्षुत्+क्षाम+कुक्षिभि: लोकै: दरिद्रै: उपकल्पितम् ।।२/१२।।
देवालयप्रपासत्रकूपारामादिकर्मणाम् ।
प्रशंसां कुर्वते नित्यं पान्था एव न चापरे ।।२/१३।।
देवालय+प्रपा+सत्र+कूप+आराम+आदि+कर्मणाम् ।
प्रशंसां कुर्वते नित्यं पान्था: एव न च अपरे ।।२/१३।।
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पति: ।।२/१४।।
अग्निहोत्रं त्रय: वेदा: त्रि+दण्डं भस्म+गुण्ठनम् ।
बुद्धि+पौरुष+हीनानां जीविका इति बृहस्पति: ।।२/१४।।
कृषिगोरक्ष्यवाणिज्यदण्डनीत्यादिभिर्बुध: ।
दृष्टैरेव सदोपायैर्भोगाननुभवेद्भुवि ।।२/१५।।
कृषि+गोरक्ष्य+वाणिज्य+दण्ड+नीति+आदिभि: बुध: ।
दृष्टै: एव सत्+उपायै: भोगान् अनुभवेत् भुवि ।।२/१५।।

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसंङ्गहे लोकायतिकपक्षो नाम द्वितियं प्रकरणम् ।
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+संङ्गहे
लोकायतिक+पक्ष: नाम द्वितियं प्रकरणम् ।

Chastity and other such (cunning) conventions have been invented by clever weaklings. Gifts of god and of lands, etc., the enjoying of sweet dinners on invitation, are all the devices of persons who are poor and have stomachs that ate (ever) lean with hunger. With respect to temples, houses for the distribution of drinking water to travelers, tanks, wells, pleasure-gardens, and other such devices- only travelers praise them daily, (but) not others. The ritual of *Agnihotra*, the three Vedas, the (ascetic's) triple staff, the smearing of one's self with ashes are a (merely) means of livelihood to those who are destitute of intelligence and energy. This is the opinion of Bṛhaspati.

By adopting only those means, which are seen (to be practical) such as agriculture, the tending of cattle (गोरक्ष्य), trade, politics (दण्ड) and administration (नीति), etc., a wise man should always (endeavour to) enjoy pleasures (here) in this world (12-15).

**Thus ends the second, chapter, known as the system of the Lokāyatikas, in the Sarva-darśana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

अथ आर्हतपक्षप्रकरणम् ॥३॥

लोकायतिकपक्षोऽयमाक्षेप्यस्सर्ववादिनाम् ।
स्वपक्षेण क्षिपत्येष तत्पक्षं क्षपणोऽधुना ॥३/१॥
लोकायतिक+पक्षः अयम् आक्षेप्यः सर्व+वादिनाम् ।
स्व+पक्षेण क्षिपति एषः तत्+पक्षं क्षपणः अधुना ॥३/१॥

# CHAPTER III
# THE SYSTEM OF THE ĀRHATAS OR JAINAS

The doctrine of the Lokāyatikas is objectionable (आक्षेप्यः) by all philosophical controversialists (सर्व+वादिनाम्). Now the Jaina, by (enunciating) his own doctrine, refutes their doctrine (thus) (01).

अग्नेरौष्ण्यमपां शैत्यं कोकिलमधुरः स्वरः ।
इत्याद्येकप्रकारः स्यात् स्वभावो नापरः क्वचित् ॥३/२॥
अग्नेः औष्ण्यम् अपां शैत्यं कोकिल+मधुरः स्वरः ।
इति+आदि+एक+प्रकारः स्यात् स्वभावः न अपरः क्वचित् ॥३/२॥

The heat of fire, the coolness of water, the cooing of the cuckoos, and such other things happen to be (due to) the variable nature (of those things) and they are not anything else (02).

कादाचित्कं सुखं दुःखं स्वभावो नात्मनो मतः ।
धर्माधर्मावतस्ताभ्यामदृष्टाविति निश्चितौ ॥३/३॥
कादाचित्कं सुखं दुःखं स्वभावः न आत्मनः मतः ।
धर्म+अ-धर्मौ अतः ताभ्याम् अ-दृष्टौ इति निश्चितौ ॥३/३॥

Plesure and pain, which are transitory, cannot be considered to constitute the nature of the Self. By means of these two (*viz.*, pleasure

and pain), merit and demerit are determined to be the self's invisible results of previous actions (अ-दृष्ट) (03).

अदृष्टस्यात्र दृष्टत्वे नादृष्टत्वं भवेदिति ।
त्वयोक्तदोषो न स्यान्मे तत्सिध्यत्यागमाद्यतः ॥३/४॥
अ-दृष्टस्य अत्र दृष्टत्वे न अ-दृष्टत्वं भवेत् इति ।
त्वया उक्त+दोषः न स्यात् मे तत् सिध्यति आगमात् यतः ॥३/४॥

The fault (in reasoning) pointed out by you (the Lokāyatika), to the effect that, if what is unseen is in any way taken to be seen, the unseen ceases to be the unseen, does not affect me (the Jaina), inasmuch as that (unseen) is established for me by means of the scripture (04).

अदृष्टमग्निमादातुं धूमं दृष्ट्वोपधावता ।
धूमेनाग्न्यऽनुमानन्तु त्वयाप्यङ्गीकृतं ननु ॥३/५॥
अ-दृष्टम् अग्निम् आदातुं धूमं दृष्ट्वा उपधावता ।
धूमेन अग्नि+अनुमानं तु त्वया अपि अङ्गीकृतं ननु ॥३/५॥

And certainly the inferece of fire from smoke has been approved of by you also, who, on seeing the smoke, run near (to where it is) with an intension of getting at the invisible fire (05).

प्रत्यक्षेणानुमानेन पश्यन्त्यत्रागमेन च ।
दृष्टादृष्टं जनाः स्पष्टमार्हतागमसंस्थिताः ॥३/६॥
प्रत्यक्षेण अनुमानेन पश्यन्ति अत्र आगमेन च ।
दृष्ट+अ-दृष्टं जनाः स्पष्टम् आर्हत+आगम+ संस्थिताः ॥३/६॥

Those persons, who take their stand on the scriptures of the Jainas, come to know clearly (both) the seen (दृष्ट) and the unseen (अ-दृष्ट) by such means as perception, inferece, and scripture (06).

सिद्धा बद्धा नारकीया इति स्युः पुरुषास्त्रिधा ।
केचित्परमसिद्धाः स्युः केचिन्मन्त्रैर्महौषधैः ॥३/७॥
सिद्धाः बद्धाः नारकीयाः इति स्युः पुरुषाः त्रिधा ।
केचित् परम+सिद्धाः स्युः केचित् मन्त्रैः महा+ओषधैः ॥३/७॥

## Appendix 01

Human beings are of three kinds, *viz.* the perfected beings (सिद्धा:), the bound ones (बद्धा:) and the hellish ones (नारकीया:). Some are (by their own nature) the highest of perfected beings, (while) others (become so) with the aid of formulas (मन्त्र) and the power of sovereign herbs (07).

गुरूपदिष्टमार्गेण ज्ञानकर्मसमुच्चयात् ।
मोक्षो बन्धाद्विरक्तस्य जायते भुवि कस्यचित् ॥३/८॥
गुरु+उपदिष्ट+मार्गेण ज्ञान+कर्म+समुच्चयात् ।
मोक्ष: बन्धात् विरक्तस्य जायते भुवि कस्यचित् ॥३/८॥

The Renunciation, freedom form (mundane) bondage (मोक्ष) results to any one in this world (भुवि) from the combination of knowledge and works (ज्ञान-कर्म-समुच्चय) in the manner taught by the (great) spiritual preceptor (08).

अर्हतामखिलं ज्ञातुं कर्मार्जितकलेवरै: ।
आवृतिर्बन्धनं मुक्ति: निरावरणतात्मनाम् ॥३/९॥
अर्हताम् अखिलं ज्ञातुं कर्म+अर्जित+कलेवरै: ।
आवृति: बन्धनं मुक्ति: निरावरणता आत्मनाम् ॥३/९॥

Bondage in the cause of the Ārhatas is that obstructive veil covering the knowledge of all things, which is in the case of all of them produced by the bodies acquired by them in consequence of (their) *karma*s (or the impressed effects of actions done in the previous states of reincarnation). And the Absolution (मुक्ति:) consists in the souls having no (such) veil of obstruction (09).

पुद्गलापरसंज्ञैस्तु धर्माधर्मानुगामिभि: ।
परमाणुभिराबद्धा: सर्वदेहा: सहेन्द्रियै: ॥३/१०॥
पुद्गल+अपर+संज्ञै: तु धर्म+अ-धर्म अनुगामिभि: ।
परमाणुभि: आबद्धा: सर्व+देहा: सह +इन्द्रियै: ॥३/१०॥

All bodies, with their organs (इन्द्रिय) (of sense, etc.) are made up of ultimate atoms (पुद्गल) (otherwise known as *pudgala*s), which follow (in the wake of) the merit and demerit (of beings) (10).

स्वदेहमाना ह्यात्मानो मोहाद्देहाभिमानिनः ।
कृमिकीटादिहस्त्यन्तदेहपञ्जरवर्तिनः ॥३/११॥
स्व+देह+मानाः हि आत्मानः मोहात् देह+अभिमानिनः ।
कृमि+कीट+आदि+हस्ति+ अन्त+देह+पञ्जर+वर्तिनः ॥३/११॥

The selves, which exist in the cages consisting of the bodies of creatures, beginning with worms and insects and ending with elephants, are of the size of their respective bodies and they are attached to their bodies by reason of (their) ignorance (11).

आत्मावरणदेहस्य वस्त्राद्यावरणान्तरम् ।
न ह्ययं यदि गृह्णाति तस्यापीत्यनवस्थितिः ॥३/१२॥
आत्म+आवरण+देहस्य वस्त्र+आदि+आवरण+अन्तरम् ।
न हि अयं यदि गृह्णाति तस्य अपि इति अनवस्थितिः ॥३/१२॥

With regard to the body, which is itself a obstructive covering for the Self, there need not be any other covering like the cloth, etc., for, if such (a covering) is admitted (to be required), then in regard to this also (another covering will have to be admitted), and there will thus result the logical fallacy of a *regressus in infinitum* (अन्+अवस्थितिः) (12).

प्राणिजातमहिंसन्तो मनोवाक्कायकर्मभिः ।
दिगम्बराश्चरन्त्येव योगिनो ब्रह्मचारिणः ॥३/१३॥
प्राणि+जातम् अ-हिंसन्तो मनः+वाक्+काय+कर्मभिः ।
दिगम्बराः चरन्ति एव योगिनः ब्रह्मचारिणः ॥३/१३॥

The yogis (or the true seers of the self) do not cause pain (to any being in) to any living being (प्राणिजातम्), in thought or deed, (they) assuredly move about as sky clad (or naked) persons leading the life of celibacy (13).

मयूरपिच्छहस्तास्ते कृतवीरासनादिकाः ।
पाणिपात्रेण भुञ्जाना लूनकेशाश्च मौनिनः ॥३/१४॥
मयूर+पिच्छ+हस्ताः ते कृत+वीर+आसन+आदिकाः ।
पाणि+पात्रेण भुञ्जानाः लून+केशाः च मौनिनः ॥३/१४॥

They (carry) the feathers of peacocks in their hands, and are accomplished in adopting the various postures (prescribed for *yogic* meditation), practise postures like *Virāsanam*. They eat out of the 'vessels' consisting of (their own) hands, and have their cut, and are engaged in silent meditation (14).

मुनयो निर्मला: शुद्धा: प्रणताघौघभेदिन: ।
तदीयमन्त्रफलदो मोक्षमार्गो व्यवस्थित: ।
सर्वैर्विश्वसनीय: स्यात् स सर्वज्ञो जगद्गुरु: ॥३/१५॥
मुनय: निर्मला: शुद्धा: प्रणत+अघ+ओघ+भेदिन: ।
तदीय+मन्त्र+फलद: मोक्ष+मार्ग: व्यवस्थित: ।
सर्वै: विश्वसनीय: स्यात् स: सर्वज्ञ: जगत्+गुरु: ॥३/१५॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे आर्हतपक्षो नाम तृतीयं प्रकरणम् ।
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे आर्हत+पक्ष: नाम तृतीयं प्रकरणम् ।

These sages are stain-less (निर्मल) and are pure, and (are able to) destroy the multitude of sins of appertaining to the chose who bow unto them in reverence of their followers. That holy master of the world (जगद्+गुरु:), who is the bestower of the fruits of (even) their *mantra*s, and is established as an authority on the road to Absolution He is (certainly) worthy of being faithfully should be followed by all (15).

**Thus ends the third chapter, known as the system of the Ārhatas (or Jainas), in the Sarva-darśana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

अथ बौद्धपक्षप्रकरणम् ॥४॥

माध्यमिकमतम् ।

बौद्धा: क्षपणकाचार्यप्रणीतमपि साम्प्रतम् ।
पक्षं प्रतिक्षिपन्त्येव लोकायतमतं यथा ॥४/१॥
बौद्धा: क्षपणक+आचार्य+प्रणीतम् अपि साम्प्रतम् ।
पक्षं प्रति क्षिपन्ति एव लोकायत +मतं यथा ॥४/१॥

# CHAPTER IV

## THE SYSTEM OF THE BAUDDHAS

## THE SYSTEM OF THE MĀDHYAMIKAS

Now (साम्प्रतम्) the Bauddhas unhesitatingly discard (प्रतिक्षिपन्ति) the system promulgated even by the spiritual teacher of the Jainas (क्षपणक), just as (they themselves discard) the doctrine of the Lokāyatas (01).

चतुर्णां मतभेदेन बौद्धशास्त्रं चतुर्विधम् ।
अधिकारानुरूपेण तत्र तत्र प्रवर्तकम् ॥४/२॥
चतुर्णां मत+भेदेन बौद्ध+शास्त्रं चतु:+विधम् ।
अधिकार+अनुरूपेण तत्र तत्र प्रवर्तकम् ॥४/२॥

By reason of the diversity in views (मत+भेदेन) among the four (classes of the followers of Buddha), the scriptures of the Bauddhas are of four kinds and they impel (men) to live (their lives) thus or thus, according to their (particular) fitness and qualifications (अधिकार) (02).

ज्ञानमेव हि सा बुद्धिर्न चान्त:करणं मतम् ।
जानाति बुध्यते चेति पर्यायत्वप्रयोगत: ॥४/३॥
ज्ञानम् एव हि सा बुद्धि:न च अन्त:+करणं मतम् ।
जानाति बुध्यते च इति पर्यायत्व+ प्रयोगत: ॥४/३॥

What is known as 'intellect' (बुद्धि) is indeed 'consciousness (ज्ञानम्) itself. It is not considered to be an internal instrument (अन्त:करणम्) (of the mind), because (the expressions) the awareness (जानाति) and the understanding (बुध्यते) are (generally) used as the synonymous (पर्यायत्व) (03).

त्रयाणामत्र बौद्धानां बुद्धिरस्त्यविवादत: ।
बाह्यार्थोऽस्ति द्वयोरेव विवादोऽन्यत्र तद्यथा ॥४/४॥
त्रयाणाम् अत्र बौद्धानां बुद्धि: अस्ति+विवादत: ।
बाह्य+अर्थ: अस्ति द्वयो: एव विवाद: अन्यत्र तत् यथा ॥४/४॥

The three of them accept the understanding (बुद्धि) exists undisputedly (as a reality). In (the view of) only two of them, external objects (बाह्य+अर्थम्) exist (in reality). There is difference in opinion (among all of them) in respect of their things: and that is as follows (04).

प्रत्यक्षसिद्धं बाह्यार्थमसौ वैभाषिकोऽब्रवीत् ।
बुद्ध्याकारानुमेयोऽर्थो बाह्यस्सौत्रान्तिकोदित: ॥४/५॥
प्रत्यक्ष+सिद्धं बाह्य+अर्थम् असौ वैभाषिक: अब्रवीत् ।
बुद्धि+आकार+अनुमेय: अर्थ: बाह्य: सौत्रान्तिक+उदित: ॥४/५॥

That Bauddha, who is a Vaibhāṣika, declares that external objects are established through direct perception (प्रत्यक्ष+सिद्ध). But the Sautrāntika (Baudhhist) says that external objects are (merely) such (things) as are inferred (अनुमेय) from the forms of consciousness (बुद्धि+आकार) (05).

बुद्धिमात्रं वदत्यत्र योगाचारो न चापरम् ।
नास्ति बुद्धिरपीत्याह वादी माध्यमिक: किल ॥४/६॥
बुद्धि+मात्रं वदति अत्र योग+आचार: न च अ-परम् ।
न अस्ति बुद्धि: अपि इति आह वादी माध्यमिक: किल ॥४/६॥

The Yogācāra (Bauddhist) says that only consciousness is (real) here, and that nothing else (is real).

And the Mādhyamika (Bauddhist) disputant says that in fact even consciousness does not exist (as a reality) (06).

न सन्नासन्न सदसन्नचोभाभ्यां विलक्षणम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदु: ॥४/७॥
न सत् न अ-सत् न सत्+अ-सत् न च उभाभ्यां विलक्षणम् ।
चतु:+कोटि+विनिर्मुक्तं तत्त्वं माध्यमिका: विदु: ॥४/७॥

The Mādhyamikas consider that the ultimate principle (तत्त्वम्) is free from four possible alternatives न सत् - not existent, न असत् – not non existent, न सद्+अ-सत्  - neither existent nor non-existent, न उभाभ्यां विलक्षणम् – not anything else different from both (07).

यदसत्कारणैस्तन्न जायते शशशृङ्गवत् ।
सतश्चोत्पत्तिरिष्टा चेज्जनितं जनयेदयम् ॥४/८॥
यत् अ-सत् कारणै: तत् न जायते शश+शृङ्ग+वत् ।
सत: च उत्पत्ति: इष्टा चेत् जनितं जनयेत् अयम् ॥४/८॥

Whatever is non-existent (असत्), that cannot be produced by any cause, as for instance, the (absolutely non-existent) horns of a hare (cannot at all be produced). If origination (उत्पत्ति) is admitted to be desirable in the case of what is (really) existent (सत:), then (in fact origination) produces (only) that which has been already produced (08).

एकस्य सदसद्भावो वस्तुनो नोपपद्यते ।
एकस्य सदसद्भ्योऽपि वैलक्षण्यं न युक्तिमत् ॥४/९॥
एकस्य सत्+अ-सत्+भाव: वस्तुन: न उपपद्यते ।
एकस्य सत्+अ-सत् भ्य: अपि वैलक्षण्यं न युक्तिमत् ॥४/९॥

It is not possible for one and the same thing to be both an entity. Nor does it stand to reason (to hold) that one (and the same) thing is distinct from (both) to be real and unreal (09).

चतुष्कोटिविनिर्मुक्तं शून्यं तत्त्वमिति स्थितम् ।
जातिर्जातिमतो भिन्ना न वेत्यत्र विचार्यते ॥४/१०॥
चतु:+कोटि+विनिर्मुक्तं शून्यं तत्त्वम् इति स्थितम् ।
जाति: जातिमत: भिन्ना न वा इति अत्र विचार्यते ॥४/१०॥
भिन्ना चेत्सा च गृह्येत व्यक्तिभ्योऽङ्गुष्ठवत्पृथक् ।
अविचारितसंसिद्धा व्यक्ति: सा पारमाणुकी ॥४/११॥
भिन्ना चेत् सा च गृह्येत व्यक्तिभ्य: अङ्गुष्ठ+वत् पृथक् ।
अ-विचारित+संसिद्धा व्यक्ति: सा पारमाणुकी ॥४/११॥

Therefore it is proved that that ultimate principle is such nothingness (शून्यम्) as is outside the scope of the four alternatives (चतुष्कोटि) (above set forth). If, in the enquiry (विचार्यते) whether or not the generic characteristics (जाति) of things are different from the individuals (जातिमत्) characterized by those generic configurations, it

is admitted that they are different, then those (generic configurations) have to be apprehended separately from the individuals, like the toes (अङ्गुष्ठ+वत्) (e.g., which are separately perceived in the body which is their possesor). That individuality which is self-evidently well established is indeed) what belongs to the ultimate atoms (पारमाणुकी) (10-11).

स्वरूपं परमाणूनां वाच्यं वैशेषिकादिभिः ।
षट्केन युगपद्योगे परमाणोः षडंशता ॥४/१२॥
स्वरूपं परमाणूनां वाच्यं वैशेषिक+आदिभिः ।
षट्केन युगपत्+योगे परमाणोः षट्+अंशता ॥४/१२॥

The characteristics of ultimate atoms have to be described by the Vaiśeṣikas and other (like them). By (the atoms) having come together at once in sixes, there would arise in relation to the ultimate atom the character (of its) made up of six parts (or aspects) (12).

षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ।
ब्राह्मणत्वादिजातिः किं वेदपाठेन जन्यते ॥४/१३॥
षण्णां समान+देशत्वे पिण्डः स्यात् अणु+मात्रकः ।
ब्राह्मणत्व+आदि+जातिः किं वेद+पाठेन जन्यते ॥४/१३॥
संस्कारैर्वा द्वयेनाथ तत्सर्वं नोपपद्यते ।
वेदपाठेन चेत्कश्चित् शूद्रो देशान्तरङ्गतः ॥४/१४॥
संस्कारैः वा द्वयेन् अथ तत् सर्वं न उपपद्यते ।
वेद+पाठेन चेत् कश्चित् शूद्रः देश+अन्तरं गतः ॥४/१४॥
सम्यक्पठितवेदोऽपि ब्राह्मणत्वमवाप्नुयात् ।
सर्वसंस्कारयुक्तोऽत्र विप्रो लोके न दृश्यते ॥४/१५॥
सम्यक् पठित+वेदः अपि ब्राह्मणत्वम् अवाप्नुयात् ।
सर्व+संस्कार+युक्तः अत्र विप्रः लोके न दृश्यते ॥४/१५॥
चत्वारिंशत्तु संस्कारा विप्रस्य विहिता यतः ।
एकसंस्कारयुक्तश्चेद्विप्रः स्यादखिलो जनः ॥४/१६॥
चत्वारिंशत् तु संस्काराः विप्रस्य विहिताः यतः ।
एक+संस्कार+युक्तः चेत् विप्रः स्यात् अखिलः जनः ॥४/१६॥

If, however, (all the) six atoms happen to occupy the same space, a collection (of atoms) has to be of the same measure (in volume) as a (single) atom.

Are generic characteristics, such as Brahminhood, produced by the study of the Vedas, or are they produced by means of (certain prescribed) sacraments, or by both (these means together)? This is all improper. If it be by means of the study of the Vedas that Brahminhood results, then a Śūdra, who, having gone to another province, learns the Vedas well (there), may also acquire Brahminhood. And here, in this world, no Brahmin is to be seen, who has (undergone) all the (required) sacraments, inasmuch as the sacraments prescribed for a Brahmin are in fact forty (in number). If one who has (undergone only) one sacrament might be a Brahmin, then all men would become Brahmins (13-16).

जातिव्यक्त्यात्मकोऽर्थोऽत्र नास्त्येवेति निरूपिते ।
विज्ञानमपि नास्त्येव ज्ञेयाभावे समुत्थिते ।
इति माध्यमिकेनैव सर्वशून्यं विचारितम् ॥४/१७॥
जाति+व्यक्ति+आत्मक: अर्थ: अत्र न अस्ति एव इति निरूपिते ।
विज्ञानम् अपि न अस्ति एव ज्ञेय+अ-भावे समुत्थिते ।
इति माध्यमिकेन एव सर्व+शून्यं विचारितम् ॥४/१७॥

इति बौद्धपक्षे माध्यमिकमतम् ।

इति बौद्ध+पक्षे माध्यमिक+मतम् ।

When it is (thus) demonstrated that there are not at all such things as constitute generic and specific configurations of characteristics, the principle of consciousness also ceases altogether to exist, since there arise as a consequence the (utter) absence of (all) objects that are to be known.

Such is the discussion conducted by the Mādhyamikas themselves in relation to (their own) ultimate principle of nothingness (17).

**Thus ends the system of the Mādhyamikas.**

अथ योगाचारमतम् ।

इति माध्यमिकेनोक्तं शून्यत्वं शून्यवादिना ।
निरालम्बनवादी तु योगाचारो निरस्यति ।।४/१८।।
इति माध्यमिकेन उक्तं शून्यत्वं शून्य+वादिना ।
निरालम्बन+वादी तु योगाचार: निरस्यति ।।४/१८।।

## THE SYSTEM OF THE YOGĀCĀRAS

The Yogācāra, who maintains that conscious-ness exists quite independently (of the existence or otherwise of external objects), refutes the theory of nothingness stated thus by the nihilist Mādhyamika (18).

त्वयोक्तसर्वशून्यत्वे प्रमाणं शून्यमेवते ।
अतो वादेऽधिकारस्ते न परेणोपपद्यते ।।४/१९।।
त्वया उक्त +सर्व+शून्यत्वे प्रमाणं शून्यम् एव ते ।
अत: वादे अधिकार: ते न परेण उपपद्यते ।।४/१९।।

If all is mere nothingness as mentioned by you, then (your) nothing itself has to be the criterion of truth to you. Therefore you cannot appropriately have any right of discussion with others (who hold something other than nothing to be such a criterion) (19).

स्वपक्षस्थापनं तद्वत् परपक्षस्य दूषणम् ।
कथं करोत्यत्र भवान् विपरीतं वदेन्न किम् ।।४/२०।।
स्व+पक्ष+स्थापनं तत् वत् पर+पक्षस्य दूषणम् ।
कथं करोति अत्र भवान् विपरीतं वदेत् न किम् ।।४/२०।।

How do you then undertake to prove your own position and to disprove similarly the adversary's position? And why do you not here (in this case) argue, (as you well may), to the contrary (20)?

अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनै: ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ।।४/२१।।
अ-विभाग: हि बुद्धि+आत्मा विपर्यासित+दर्शनै: ।
ग्राह्य+ग्राहक+संवित्ति+भेदवान् इव लक्ष्यते ।।४/२१।।

What is of the nature of consciousness is indeed indivisible; but by those vision is confused, it is seen to be, as it were, differentiated into the perceived object, the perceiving subject, and (the) the perception (itself) (21).

मानमेयफलाद्युक्तं ज्ञानदृष्ट्यनुसारतः ।
अधिकारिषु जातेषु तत्त्वमप्युपदेक्ष्यति ॥४/२२॥
मान+मेय+फल+आदि उक्तं ज्ञान+दृष्टि+अनुसारतः ।
अधिकारिषु जातेषु तत्त्वम् अपि उपदेक्ष्यति ॥४/२२॥

The means of knowledge, the object of knowledge, and the resulting (knowledge), etc., have (all) been, in accordance with the (current) views regarding (the nature of) knowledge, stated (to be different and separate character). The ultimate truth also will be expounded, when (in fact) there arise qualified persons (to grasp it) (22).

बुद्धिस्वरूपमेकं हि वस्त्वस्ति परमार्थतः ।
प्रतिभानस्य नानात्वान्न चैकत्वं विहन्यते ॥४/२३॥
बुद्धि+स्वरूपम् एकं हि वस्तु अस्ति परमार्थतः ।
प्रतिभानस्य नानात्वात् च एकत्वं विहन्यते ॥४/२३॥

Indeed, there exists in reality (only) one thing, and that is of the nature of the intelligent principle of consciousness. And (its) oneness is not destroyed in consequence of the varied character of (its) manifestations (23).

परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ ।
कुणपं कामिनी भक्ष्यमिति तिस्रो विकल्पनाः ॥४/२४॥
परिव्राट्+कामुक+शुनाम् एकस्यां प्रमदा+तनौ ।
कुणपं कामिनी भक्ष्यम् इति तिस्रः विकल्पनाः ॥४/२४॥

Indeed, there exists in reality (only) one thing, and that is of the nature of the intelligent principle of consciousness. And (its) oneness is destroyed in consequence of the varied character of (its) manifestations (24).

अथाप्येकैव सा बाला बुद्धितत्त्वं तथैव नः ।
तदन्यद्यत्तु जात्यादि तन्निराक्रियतां त्वया ॥४/२५॥
अथ अपि एक एव सा बाला बुद्धि+तत्त्वं तथा एव नः ।
तत्+अन्यत् तु जाति+आदि तत् निराक्रियतां त्वया ॥४/२५॥

If, nevertheless, that young woman (happens to be) only one, similarly is the ultimate principle of consciousness (only one) to us. Whatever else (is postulated) other than that, such as the (configurations of) generic characteristics, etc. –you may (freely) disprove (all) that (25).

क्षणिका बुद्धिरेवातस्त्रिधा भ्रान्तैर्विकल्पिता ।
स्वयम्प्रकाशतत्त्वज्ञैर्मुमुक्षुभिरुपास्यते ॥४/२६॥
क्षणिका बुद्धिः एव अतः त्रिधा भ्रान्तैःविकल्पिता ।
स्वयं+प्रकाश+तत्त्व+ज्ञैः मुमुक्षुभिः उपास्यते ॥४/२६॥

इति बौद्धपक्षे योगाचारमतम् ।

इति बौद्ध+पक्षे योग+आचार+मतम् ।

Therefore consciousness, which is (fleeting and) transitory, and is (at the same time) wrongly differentiated in three ways by deluded persons - (that) alone is held in honor (as the one reality) by those, who have come to know (this) self-luminous principle, and are desirous of obtaining the Absolution (मुमुक्षुभिः) (26).

**Thus ends the system of the Yogācāras.**

अथ सौत्रान्तिकमतम् ।

विज्ञानमात्रमत्रोक्तं योगाचारेण धीमता ।
ज्ञानं ज्ञेयं विना नास्ति बाह्यार्थोऽप्यस्ति तेन नः ॥४/२७॥
विज्ञान+मात्रम् अत्र उक्तं योग+आचारेण धीमता ।
ज्ञानं ज्ञेयं विना न अस्ति बाह्य+अर्थः अपि अस्ति तेन नः ॥४/२७॥

Appendix 01

## THE SYSTEM OF THE SAUTRĀNTIKAS

Consciousness alone has here (in this system) been postulated by the clever Yogācāra. There can be no perception. Therefore, according to us, external objects also exist (in reality) (27).

नीलपीतादिभिश्चित्रैर्बुद्ध्याकारैरिहान्तरैः ।
सौत्रान्तिकमते नित्यं बाह्यार्थस्त्वनुमीयते ॥४/२८॥
नील+पीत+आदिभि+ चित्रैः बुद्धि+आकारैः इह अन्तरैः ।
सौत्रान्तिक+मते नित्यं बाह्य+ अर्थः तु अनुमीयते ॥४/२८॥

According to the view of the Sautrāntikas, external objects are always inferred (to exist) by means of those differences (in perception) which comprises of (many) wonderful varieties in forms of consciousness such as blue, yellow, and so on (28).

क्षीणानि चक्षुरादीनि रूपादिष्वेव पञ्चसु ।
न षष्ठमिन्द्रियं तस्य ग्राहकं विद्यते बहिः ॥४/२९॥
क्षीणानि चक्षुः+आदीनि रूप+आदिषु एव पञ्चसु ।
न षष्ठम् इन्द्रियं तस्य ग्राहकं विद्यते बहिः ॥४/२९॥

The eye and the other (organs of sense) at last lose themselves in (apprehending) the five things, such as colour, etc. To him (the Sautrāntika), there is no sixth sense that apprehends what is external (29).

षडंशत्वं त्वयापाद्य परमाणोर्निराकृतिः ।
युक्तस्तेनापि बाह्यार्थो न चेद्ज्ञानं न सम्भवेत् ॥४/३०॥
षट्+अंशत्वं त्वया आपाद्य परमाणोः निराकृतिः ।
युक्तः तेन अपि बाह्य अर्थः न चेत् ज्ञानं न सम्भवेत् ॥४/३०॥

It is (surely) appropriate (enough) that you (first) postulated (the ultimate atom) to consist of parts (or aspects), and then (give out) a reflection of the (atomic character of the) atom. Even according to that same (process of reasoning), if there is no external object, (then) there can be no perceptive knowledge (of objects) (30).

आकाशधातुरस्माभिः परमाणुरितीरितः ।
स च प्रज्ञप्तिमात्रं स्यान्न च वस्त्वन्तरं मतम् ॥४/३१॥

आकाश+धातु: अस्माभि: परमाणु:इति ईरित: ।
स च प्रज्ञप्ति+मात्रं स्यात् न च वस्तु+अन्तरं मतम् ।।४/३१।।

The element (known as) *ākāśa* is declared by us (the Sautrāntikas) to be (the same as) the ultimate atom. It has to be merely a notion, and is not considered to be anything else (31).

सर्वे पदार्था: क्षणिका बुद्ध्याकारविजृम्भिता: ।
इदमित्येव भावास्तेऽप्याकारानुमितास्सदा ।।४/३२।।
सर्वे पदार्था: क्षणिका: बुद्धि+आकार+विजृम्भिता: ।
इदम् इति एव भावा: ते अपि आकार +अनुमिता: सदा ।।४/३२।।

All things are transitory (in point of existence), and are the result of the (varied) display of the forms of consciousness. Even those entities, which are (capable of being described definitely as) such and such,- (even they) are always inferred from the forms (of consciousness) (32).

विषयत्वविरोधस्तु क्षणिकत्वेऽपि नास्ति न: ।
विषयत्वं हि हेतुत्वं ज्ञानाकारार्पणक्षमम् ।।४/३३।।
विषयत्व+विरोध: तु क्षणिकत्वे अपि न अस्ति न: ।
विषयत्वं हि हेतुत्वं ज्ञान+आकार+ अर्पण+ क्षमम् ।।४/३३।।

**इति बौद्धपक्षे सौत्रान्तिकमतम् ।**
इति बौद्ध+पक्षे सौत्रान्तिक+मतम् ।

In our view, even though there is momentariness (in relation to thing perceived), there is indeed (in consequence) no contradiction in (the fact of) their being objects of perception; for, to be an (external object) of perception is to possess the character of such a cause, as is capable of bestowing a form upon consciousness (33).

**Thus ends the system of the Sautrāntikas.**

**अथ वैभाषिकमतम् ।**

सौत्रान्तिकमतादल्पभेदो वैभाषिके मते ।
प्रत्यक्षत्वं तु बाह्यस्य क्वचिदेवानुमेयता ।।४/३४।।

सौत्रान्तिक+मतात् अल्प+भेद: वैभाषिके मते ।
प्रत्यक्षत्वं तु बाह्यस्य क्वचित् एव अनुमेयता ।।४/३४।।

## THE SYSTEM OF THE VAIBHĀṢIKAS

There is, in the theory of the Vaibhāṣikas, a slight difference from the theory of the Sautrāntikas. External objects are (generally proved to exist) by means of direct perception, but it is only here and there that they have to be (known) through inference (34).

पूर्वपरानुभावेन पुञ्जीभूतास्सहस्रश: ।
परमाणव एवात्र बाह्यार्थघनवत् स्थिता: ।।४/३५।।
पूर्व+अपर+अनुभावेन पुञ्जी+भूता: सहस्रश: ।
परमाणव: एव अत्र बाह्य+अर्थ+घन+वत् स्थिता: ।।४/३५।।

It is only the ultimate atoms, gathered together by thousands in accordance with their special capacity to be in front or behind, that exist (for us) as the massive expanse of external objects (35).

दूरादेव वनं पश्यन् गत्वा तस्यान्तिकं पुन: ।
न वनं पश्यति क्वापि वल्लीवृक्षातिरेकत: ।।४/३६।।
दूरात् एव वनं पश्यन् गत्वा तस्य अन्तिकं पुन: ।
न वनं पश्यति क्व अपि वल्ली+वृक्ष+ अतिरेकत: ।।४/३६।।

Only at a distance does (a person) see a forest; but no going near it, he sees no forest anywhere apart from (seeing) the creepers and the trees (36).

मृदो घटत्वमायान्ति कपालत्वन्तु ते घटा: ।
कपालानि च चूर्णत्वं ते पुन: परमाणुताम् ।।४/३७।।
मृद: घटत्वम् आयान्ति कपालत्वं तु ते घटा: ।
कपालानि च चूर्णत्वं ते पुन: परमाणुताम् ।।४/३७।।

The clay comes to have the characteristics of the pot. But the pots (come to have) the characteristics of the potsherds, and the potsherd become (reduced into the state of) powdered particles; and these (particles are finally reduced to) the condition of atoms (37).

चतुर्णामपि बौद्धानामैक्यमध्यात्मनिर्णये ।
व्यावहारिकभेदेन विवदन्ते परस्परम् ॥४/३८॥
चतुर्णाम् अपि बौद्धानाम् ऐक्यम् अध्यात्म+निर्णये ।
व्यावहारिक+भेदेन विवदन्ते परस्परम् ॥४/३८॥

Among all the four (schools of the) Bauddhas there is unanimity, in so far as the determination (of the nature) of the inner principle of the ego is concerned. They are in dispute with one another in consequence of (their) difference in view in regard to (the outer world of) common phenomenal experience (38).

बुद्धितत्त्वे स्थिता बौद्धा बुद्धिवृत्तिर्द्विधा मता ।
ज्ञानाज्ञानात्मिका चेति तत्र ज्ञानात्मिकामिह ॥४/३९॥
बुद्धि+तत्त्वे स्थिता: बौद्धा: बुद्धि+वृत्ति:द्विधा मता ।
ज्ञान+अ-ज्ञान+आत्मिका च इति तत्र ज्ञान+आत्मिकाम् इह ॥४/३९॥
प्रमाणत्वेन जानन्ति ह्यविद्यामूलिकाप्रमा ।
मूलाज्ञाननिमित्तान्या स्कन्धायतनधातुजा ॥४/४०॥
प्रमाणत्वेन जानन्ति हि अ-विद्या+मूलिका+प्रमा ।
मूल+अ-ज्ञान+निमित्त+अन्या स्कन्ध+आयतन +धातुजा ॥४/४०॥

The Bauddhas are those who take their stand on the intelligent principle of consciousness (बुद्धि). The function of (this) consciousness is considered to be of two kinds, *viz.*, the cognitional and the non-cognitional. Of these, they understand the cognitional (consciousness) to be the means here for the correct apprehension of truth. But the other (non-cognitional consciousness), which is dependent upon a fundamental non-discernment, is evolved out of the mundane consciousness (स्कन्ध), the inner seat (आयतन), and the material components of the body (धातु), and is (as such) the source of Nescience and does not form an authoritative criterion of truth (39-40).

प्रपञ्चजातमखिलं शरीरं भुवनात्मकम् ।
पञ्चस्कन्धा भवन्त्यत्र द्वादशायतनानि च ॥४/४१॥
प्रपञ्च+जातम् अखिलं शरीरं भुवन+आत्मकम् ।
पञ्च+स्कन्धा: भवन्ति अत्र द्वादश+ आयतनानि च ॥४/४१॥

सर्वेषामपि बौद्धानां तथाष्टादश धातवः ।
ज्ञानसंस्कारसंज्ञानां वेदनारूपयोरपि ।।४/४२।।
सर्वेषाम् अपि बौद्धानां तथा अष्टादश धातवः ।
ज्ञान+संस्कार+संज्ञानां वेदना+रूपयोः अपि ।।४/४२।।
समूहःस्कन्धशब्दार्थः तत्तत्सन्ततिवाचकः ।
ज्ञानसन्ततिरेवात्र विज्ञानस्कन्ध उच्यते ।।४/४३।।
समूहः स्कन्ध+शब्द+अर्थः तत्+तत+सन्तति+वाचकः ।
ज्ञान+सन्ततिः एव अत्र विज्ञान+स्कन्धः उच्यते ।।४/४३।।

According to all the Bauddhas, the whole collection of extended objects is (as it were) the body that constitutes the world, here there are the fivefold mundane consciousness and twelve fold inner seats (आयतन) and similarly eighteen material components of the body. The word *skandha* means a group (समुह) and (it) indicates an aggregation of each of (what are called) *jñāna,* the Impress-collection (संस्कार), and the Symbol-aggregate (संज्ञा), and also the Affection-aggregate (वेदना) and the Perception-aggregate (रूप). Here it is only a series of states of consciousness which is called the Consciousness-collection (41-43).

संस्कारस्कन्ध इत्युक्तो वासनानान्तु संहतिः ।
सुखदुःखात्मिका बुद्धिस्तथापेक्षात्मिका च सा ।।४/४४।।
संस्कार+स्कन्धः इति उक्तः वासनानाम् तु संहतिः ।
सुख+दुःख+आत्मिका बुद्धिः तथा अपेक्षा+आत्मिका च सा
।।४/४४।। वेदनास्कन्ध इत्युक्तः संज्ञास्कन्धस्तु नाम यत् ।
रूपस्कन्धो भवत्यत्र मूर्तिभूतस्य संहतिः ।।४/४५।।
वेदना+स्कन्धः इति उक्तः संज्ञा+स्कन्धः तु नाम यत् ।
रूप+स्कन्धः भवति अत्र मूर्ति+ भूतस्य संहतिः ।।४/४५।।

The aggregate of the innate impressions (of merit and demerit due to karmas) is what is called impress-collection (संस्कारस्कन्ध), the affection-aggregate (वेदनास्कन्ध) is stated to consist of those states of consciousness which constitute pleasure and pain, etc., as well as of that (state of consciousness) which constitutes desire. The symbol-aggregate (संज्ञास्कन्ध) is (made up of) what happens to be 'name'. The

perception-aggregate (रूपस्कन्ध) here is the collection of (all perceivable) embodied beings (44-45).

रूपस्योपचय: स्तम्भकुम्भादिरणुकल्पित: ।
पृथिव्या: स्थैर्यरूपादि द्रवत्वादि भवेदपाम् ॥४/४६॥
रूपस्य उपचय: स्तम्भ+कुम्भ+आदि:अणु+कल्पित: ।
पृथिव्या:स्थैर्य+रूप+आदि द्रवत्व +आदि भवेत् अपाम् ॥४/४६॥
उष्णत्वं तेजसो धातोर्वायुधातोस्तु शीतता ।
एषां चतुर्णां धातूनां वर्णगन्धरसौजसाम् ॥४/४७॥
उष्णत्वं तेजस: धातो: वायु+धातो: तु शीतता ।
एषां चतुर्णां धातूनां वर्ण+गन्ध+रस+ ओजसाम् ॥४/४७॥
पिण्डाज्जाता: पृथिव्याद्या: परमाणुचया अमी ।
श्रोत्रन्त्वक् चक्षुषी जिह्वा घ्राणं चेन्द्रियपञ्चकम् ॥४/४८॥
पिण्डात् जाता: पृथिवी+आद्या: परमाणु+चया: अमी ।
श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणं च इन्द्रिय+पञ्चकम् ॥४/४८॥

Pillars, pots, etc., which are all aggregates of embodied things, are made up of atoms. (The organs of) solidity, shape, etc., belong to (the element of) earth; and fluidity, etc., belong to (the element of) water. Heat belongs to the element of light, and cold to the element of air. From the putting together of color, smell, taste, and heat, as (they) appertain to these four elements (above-mentioned), the earth, etc., are produced; and they are all aggregates of ultimate atoms. The ear, the skin, the eye, the tongue, and the nose are the five organs of knowledge (46-48).

वाक्पादपाणिपाय्वादि ज्ञेयं कारकपञ्चकम् ।
सामुदायिकचैतन्यं बुद्धि: स्यात्करणं मन: ॥४/४९॥
वाक्+पाद+पाणि+पायु+आदि ज्ञेयं कारक+पञ्चकम् ।
सामुदायिक+चैतन्यं बुद्धि: स्यात् करणं मन: ॥४/४९॥

(The organs of) speech, the feet, the hands, the anus, etc., are known as the five organs of action. The consciousness which is embodied in a collection (of atoms) is intelligence, and the *manas* is (its peculiar) instrument (for experience pain, pleasure etc.) (49).

नामजातिगुणद्रव्यक्रियारूपेण पञ्चधा ।
कल्पितं भ्रान्तदृष्ट्यैव शरीरं भुवनात्मकम् ॥४/५०॥
नाम+जाति+गुण+द्रव्य+क्रिया+रूपेण पञ्चधा ।
कल्पितं भ्रान्त+दृष्ट्या एव शरीरं+ भुवन+ आत्मकम् ॥४/५०॥

(What is here taken as) the body, which is the same as the world, is, through deluded vision, imagined to be (of a) fivefold (composition), consisting of name, class (or genus), quality, substance, and the action (50).

बौद्धशास्त्रप्रमेयन्तु प्रमाणं द्विविधं मतम् ।
कल्पनापोढमभ्रान्तं प्रत्यक्षं कल्पना पुन: ॥४/५१॥
बौद्ध+शास्त्र+प्रमेयम् तु प्रमाणं द्विविधं मतम् ।
कल्पना+अ-पोढम् अ-भ्रान्तं प्रत्यक्षं कल्पना पुन: ॥४/५१॥
नामजातिगुणद्रव्यक्रियारूपेण पञ्चधा ।
लिङ्गदर्शनतो ज्ञानं लिङ्गिन्यत्रानुमानता ॥४/५२॥
नाम+जाति+गुण+द्रव्य+क्रिया+रूपेण पञ्चधा ।
लिङ्ग+दर्शनत: ज्ञानं लिङ्गिनि+अत्र अनुमानता ॥४/५१॥

The criterion of truth as defined in the scriptures of the Bauddhas is held to be of two kinds i.e. direct perception (properly), which is free from super-imposition and is undeluded. The super-imposition (here thought of) is, however, of five kinds, consisting of name, class, quality, substance, and action (respectively). Here (according the Bauddhas), the nature of logical inference consists in (arriving at) the knowledge of what is characterized by the sign by means of the direct perception of (merely) the sign (itself) (51-52).

चतुर्विधं यदज्ञानं प्रमाणाभ्यां निवर्तते ।
नष्टे चतुर्विधेऽज्ञाने मूलाज्ञानं निवर्तते ॥४/५३॥
चतु+विधं यत् अ-ज्ञानं प्रमाणाभ्यां निवर्तते ।
नष्टे चतु:+विधे अ-ज्ञाने मूल+अ-ज्ञानं निवर्तते ॥४/५३॥

Ignorance, which is of four kinds, is removed by means of these two criteria of truth (perception and inference). When (this) fourfold ignorance is destroyed, then the basic ignorance (relating to the

common phenomenal apprehension of the universe) departs (as well) (53).

मूलाज्ञाननिवृतौ च विशुद्धज्ञानसन्ततिः ।
शुद्धबुद्ध्यविशेषो हि मोक्षो बुद्धमुनीरितः ॥४/५४॥
मूल+अ-ज्ञान+निवृतौ च विशुद्ध+ज्ञान+सन्ततिः ।
शुद्ध+बुद्धि अ-विशेषः हि मोक्षः बुद्ध +मुनि+ईरितः ॥४/५४॥

When (this) basic ignorance ceases to be, (then) there arises a continuous flow of faultless states of consciousness, and final deliverance is declared by the sage Buddha to be nothing other than (such a flow of) faultless states of consciousness (54).

उत्पत्तिस्थितिभङ्गदोषरहितां सर्वाशयोन्मूलिनीं
ग्राहोत्सर्गवियोगयोगजनितां नाभावभावान्विताम् ।
तामन्तर्द्वयवर्जितां निरुपमामाकाशवन्निर्मलां
प्रज्ञां पारमितां धनस्य जननीं शृण्वन्तु बुद्ध्यर्थिनः ॥४/५५॥
उत्पत्ति+स्थिति+भङ्ग+दोष+रहितां सर्व+आशय+उन्मूलिनीं
ग्राह+उत्सर्ग+वियोग+योग+जनितां न अ-भाव+भाव+अन्विताम् ।
ताम्+अन्तः+द्वय+वर्जितां निरुपमां आकाश-वत् निर्मलां
प्रज्ञां पारमितां धनस्य जननीं शृण्वन्तु बुद्धि+अर्थिनः ॥४/५५॥

O ye, who are desirous of (attaining) true knowledge, listen to that supreme wisdom, which is free from the defects associated with continuance and death (that wisdom) which tears to the roots all attachments (giving up rise to the bondage of karma) and is produced through (the living of) such (a life of) Yoga as is characterised by the giving up of (all) likes and dislikes - (listen to that) supreme wisdom which is neither correlated to existence nor to non-existence, (to that) which is free from all intrinsic duality and is equaled, (to that) which is pure like the firmament (on light) and is the source of (all) wealth - (listen to that) (55).

अतिस्तुतिपरैरुक्तो यस्तु वैशेषिकादिभिः ।
ईश्वरो नेष्यतेऽस्माभिः स निराक्रियतेऽधुना ॥४/५६॥
अति-स्तुति+परैः उक्तः यः तु वैशेषिक+आदिभिः ।
ईश्वरः न इष्यते अस्माभिः स निराक्रियते अधुना ॥४/५६॥

## Appendix 01

The Divine Lord, who has been declared (to exist) by the Vaiśeṣikas and others, whose aim is (merely to indulge in) excessive flattery, is not admitted by us. Now, he is disproved (by us thus) (56).

हेयोपादेयतत्त्वश्च मोक्षोपायश्च वेत्ति यः ।
स एव नः प्रमाणं स्यान्न सर्वज्ञस्त्वयेरितः ॥४/५७॥
हेय+उपादेय+तत्त्वं च मोक्ष+उपायं च वेत्ति यः ।
सः एव नः प्रमाणं स्यात् न सर्वज्ञःत्वया ईरितः ॥४/५७॥

He who knows the truth regarding what is (morally) worthy of acceptance and what worthy of rejection, and also knows the means for the attainment of final deliverance, he alone is our authority, (but) not that Omniscient Being who is mentioned by you (57).

दूरं पश्यतु वा मा वा तत्त्वमिष्टं प्रपश्यतु ।
प्रमाणं दूरदर्शी चेद्वयं गृध्रानुपास्महे ॥४/५८॥
दूरं पश्यतु वा मा वा तत्त्वम् इष्टं प्रपश्यतु ।
प्रमाणं दूर+दर्शी चेत् वयं गृध्रान् उपास्महे ॥४/५८॥

A man may 'see' things at a distance, or he may not. He may very well 'see' the truth he wishes (to see). If he who can see far is to be (our) authority, then we (may as well) worship eagles (which are known to be able to see very far) (58).

देशे पिपीलिकादीनां सङ्ख्याज्ञः कश्चिदस्ति किम् ।
सर्वकर्तुत्वमीशस्य कथितं नोपपद्यते ॥४/५९॥
देशे पिपीलिका+आदीनां सङ्ख्या+ज्ञः कश्चित् अस्ति किम् ।
सर्व+कर्तुत्वम् ईशस्य कथितं न उपपद्यते ॥४/५९॥

Is there any one who knows the umber of ants, etc., in a country? The creatorship of al things, which is declared by you to belong to the Divine Lord, is not (logically) maintainable (59).

यदि स्यात् सर्वकर्ताऽसावधर्मेऽपि प्रवर्तयेत् ।
अयुक्तं कारयन् लोकान् कथं युक्ते प्रवर्तयेत् ॥४/६०॥
यदि स्यात् सर्व+कर्ता असौ अ-धर्मे अपि प्रवर्तयेत् ।
अ-युक्तं कारयन् लोकान् कथं युक्ते प्रवर्तयेत् ॥४/६०॥

If He be the agent in relation to (the production of) all things, then He leads men to he practice of unrighteousness (also). (Thus) urging men to do what is improper, how can He lead them to do (only) that which is proper (60)?

उपेक्षैव च साधूनां युक्तासाधौ क्रिया भवेत् ।
न क्षतक्षारनिक्षेपः साधूनां साधुचेष्टितम् ॥४/६१॥
उपेक्षा एव च साधूनां युक्ता अ-साधौ क्रिया भवेत् ।
न क्षत+क्षार+निक्षेपः साधूनां साधु+चेष्टितम् ॥४/६१॥

In relation to him who is bad, indifference should be the proper attitude to be maintained by those who are good. (Surely) it is not a good deed on the part of the good to put salt into a cut wound (61).

ईश्वरेणैव शास्त्राणि सर्वाण्यधिकृतानि चेत् ।
कथं प्रमाणं तद्वाक्यं पूर्वापरपराहतम् ॥४/६२॥
ईश्वरेण एव शास्त्राणि सर्वाणि अधिकृतानि चेत् ।
कथं प्रमाणं तत्+वाक्यं पूर्व+अ-पर+ पराहतम् ॥४/६२॥

If the Divine Lord Himself is the authoritative producer of all (your) religious scripture, how can His language, wherein the former part is contradicted by the latter, prove authoritative (62)?

कारयेद्धर्ममात्रञ्चेदेकशास्त्रप्रवर्तकः ।
कथं प्रादेशिकास्यास्य सर्वकर्तुत्वमुच्यते ॥४/६३॥
कारयेत् धर्म-मात्रं चेत् एक+शास्त्र+प्रवर्तकः ।
कथं प्रादेशिकास्य अस्य सर्व+कर्तुत्वम् उच्यते ॥४/६३॥

If He induces men to do only that which is virtuous, and then He becomes the promulgator of only one (kind of) scripture. How (then) can the creatorship of all things be predicated of Him who is (thus) effective (only) in part (63)?

ईशः प्रयोजनाकाङ्क्षी जगत् सृजति वा न वा ।
काङ्क्षते चेदसंपूर्णो नो चेन्नैव प्रवर्तते ॥४/६४॥
ईशः प्रयोजन+आकाङ्क्षी जगत् सृजति वा न वा ।
काङ्क्षते चेत् अ-संपूर्णः न-उ चेत् न एव प्रवर्तते ॥४/६४॥

Does the Lord create the world with some profitable object in view, or (does He do it) without any such (object)? If He desires (any advantage to Himself), then He is imperfect. If He dies not, He need not take up the work (of creation) at all (64).

प्रवर्तते किमीशस्ते भ्रान्तवन्निष्प्रयोजने ।
छागादीनां पुरीषादेर्वर्तुलीकरणेन किम् ।।४/६५।।
प्रवर्तते किम् ईश: ते भ्रान्त+वत् निष्प्रयोजने ।
छाग+आदीनां पुरीष+आदे: वर्तुली+करणेन किम् ।।४/६५।।

Does your 'Lord', like a deluded fool, undertake to do that which is profitless? What (for instance) is the use of making the excreta, etc., of sheep, etc., round (in shape) (65)?

क्रीडार्थेयं प्रवृतिश्चेत् क्रीडते किन्नु बालवत् ।
अजस्रं क्रीडतस्तस्य दु:खमेव भवत्यलम् ।।४/६६।।
क्रीडा+अर्था इयं प्रवृति: चेत् क्रीडते किम् नु बाल+वत् ।
अजस्रं क्रीडत: तस्य दु:खम् एव भवति अलम् ।।४/६६।।

If His activity (in relation to creation) be for mere diversion, then does he play like a child? To him who plays always (thus), pain alone turns out be the (ultimate) result in abundance (66).

अज्ञो जन्तुरनीशोऽयमात्मन: सुखदु:खयो: ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव च ।।४/६७।।
अज्ञ: जन्तु: अन् ईश: अयम् आत्मन: सुख+दु:खयो: ।
ईश्वर+प्रेरित: गच्छेत् स्वर्गं वा श्वभ्रम एव च ।।४/६७।।

This ignorant creature (man) is powerless in regard to his own pleasures and pains. Being (unavoidably) impelled by the Lord, he may go either to paradise or to hell (67).

तप्तलोहाभितापाद्यैरीशेनाल्पसुखेच्छुना ।
प्राणीनो नरकेकष्टे बत प्राणैर्वियोजिता: ।।४/६८।।
तप्त+लोह+अभिताप+आद्यै: ईशेन अल्प+सुख+इच्छुना ।
प्राणीन: नरके कष्टे बत प्राणै: वियोजिता: ।।४/६८।।

In the hell, which is full of suffering, living creatures are alas! torn away as if red hot iron, etc., by the Lord, who is desirous of enjoying just a little pleasure of diversion (thus) (68).

वरप्रदाने शक्तश्चेत् ब्रह्महत्यादिकारिणे ।
स्वर्गं दद्यात्स्वतन्त्रः स्यान्नरकं सोमयाजिने ॥४/६९॥
वर+प्रदाने शक्तः चेत् ब्रह्म+हत्या+आदि+कारिणे ।
स्वर्गं दद्यात् स्व+तन्त्रः स्यात् नरकं सोम+ याजिने ॥४/६९॥

If He is able to bestow boons (freely), He may bestow (the boon of) paradise on one who commits such (offences) as the killing of a Brahmin, and bestow hell on one who performs the *soma* sacrifice (69).

कर्मानुगुणदाता चेदीशः स्यादखिलो जनः ।
दाने स्वातन्त्र्यहीनस्सन् सर्वेशः कथमुच्यते ॥४/७०॥
कर्म+अनुगुण+दाता चेत् ईशः स्यात् अखिलः जनः ।
दाने स्वातन्त्र्य+हीनः सन् सर्व+ ईशः कथम् उच्यते ॥४/७०॥

If he bestow gifts according to the karmas (of individuals), then al men (well) be Lords (like Him). Being devoid of freedom in the matter of bestowing gifts, how is He to be called the Lord of all (70)?

एवं नैयायिकाद्युक्तसर्वज्ञेशनिराक्रिया ।
हेयोपादेयमात्रज्ञो ग्राह्यो बुद्धमुनिस्ततः ॥४/७१॥
एवं नैयायिक+आदि+उक्त+सर्व+ज्ञ+ईश+निराक्रिया ।
हेय+उपादेय-मात्र+ज्ञः ग्राह्यः बुद्ध +मुनिः ततः ॥४/७१॥

The Omniscient Lord, who is accepted by the Naiyāyikas and others, is (apt to be) refuted thus. Hence the sage Buddha, who alone knows what is (morally) worthy of adoption and what worthy rejection, has to be accepted (by all as a true teacher and guide) (71).

चैत्यं वन्देत चैत्याद्या धर्मा बुद्धागमोदिताः ।
अनुष्ठेया न यागाद्या वेदाद्यागमचोदिताः ॥४/७२॥
चैत्यं वन्देत चैत्य+आद्या धर्माः बुद्ध+आगम+उदिताः ।
अनुष्ठेयाः न याग+आद्या वेद+ आदि+आगम+चोदिताः ॥४/७२॥

One should offer worship to the sanctuary. (Worship of) the sanctuary and other (such) duties, prescribed in the scriptures promulgated by the Buddha, have (all) to be performed; but not sacrifices, etc., which are taught in the Vedas and other (allied) scriptures (72).

क्रियायां देवतायाश्च योगे शून्यपदे क्रमात् ।
वैभाषिकादयो बौद्धाः स्थिताश्चत्वार एव ते ॥४/७३॥
क्रियायां देवतायां च योगे शून्य+पदे क्रमात् ।
वैभाषिक+आदयः बौद्धाः स्थिताःचत्वारः एव ते ॥४/७३॥

इति बौद्धपक्षे वैभाषिकमतम् ।
इति बौद्ध+पक्षे वैभाषिक+मतम् ।

लोकायतार्हतमाध्यमिकयोगाचारसौत्रान्तिकवैभाषिकमतानि षट् समाप्तानि ॥
लोकायत+आर्हत+माध्यमिक+योगाचार+सौत्रान्तिक+वैभाषिक+मतानि षट् समाप्तानि ॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे बौद्धपक्षो नाम चतुर्थं प्रकरणम् ॥
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे बौद्ध+पक्षः नाम चतुर्थं प्रकरणम् ॥

The Bauddhas, beginning with the Vaibhāṣikas, take their stand (respectively) on action, on divinity, on (the practice of) meditation and mental concentration (Yoga), and on nothingness. They (the Bauddhas) are only (of) four (kinds) (73).

**Thus ends the system of the Vaibhāṣikas, among the doctrines adopted by the Bauddhas.**

**The theories of the Lokāyatas, Ārhatas, Mādhyamikas, Yogācāras, Sautrāntikas and Vaibhāṣikas – which are six in number – are now concluded here.**

**Thus ends the fourth chapter, known as the theory of the Bauddhas in the Sarva-darśana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

अथ वैशेषिकपक्षप्रकरणम् ॥५॥

नास्तिकान् वेदबाह्यांस्तान् बौद्धलोकायतार्हतान् ।
निराकरोति वेदार्थवादी वैशेषिकोऽधुना ॥५/१॥
नास्तिकान् वेद+बाह्यान् तान् बौद्ध+लोकायत+आर्हतान् ।
निराकरोति वेद+अर्थ+वादी वैशेषिक: अधुना ॥५/१॥

# CHAPTER V

## THE SYSATEM OF THE VAIŚEṢIKAS

Now, the Vaiśeṣikas, the upholders of the teachings of the Vedas, refute atheistic systems of the Bauddhas, the Lokāyatikas and the Ārhatas, who are the non-believers in the Vedas (वेदबाह्यान्) (01).

वेदमार्गपरिभ्रष्टा विशिष्टा: परदर्शने ।
बौद्धादयो विशिष्टास्ते न भवन्ति द्विजा: पुन: ॥५/२॥
वेद+मार्ग+परिभ्रष्टा: विशिष्टा: पर+दर्शने ।
बौद्ध+आदय: विशिष्टा: ते न भवन्ति द्विजा: पुन: ॥५/२॥

The Bauddhas and the others, who have stared away from the path of the Vedas, are worthy of honor (only) in (those other systems of theirs). Those worthy persons do not, however, constitutes Brahmins (02).

अतो बुद्धादिभिर्नित्यं वेदब्राह्मणनिन्दया ।
आत्मवञ्चकता कष्टा सर्वत्राघोषिता भुवि ॥५/३॥
अत: बुद्ध+आदिभि: नित्यं वेद+ब्राह्मण+निन्दया ।
आत्म+वञ्चकता कष्टा सर्वत्र+ आघोषिता भुवि ॥५/३॥

Therefore, the Bauddhas and the others, throuh (their) reproach of the Vedas and the Brahmins, proclaim always and everywhere (their own) pitiable self-deception (03).

प्रमाणमेव वेदा: स्यु: सर्वेश्वरकृतत्वत: ।
स एव कर्मफलदो जीवानां पारिशेष्यत: ॥५/४॥
प्रमाणम् एव वेदा: स्यु: सर्व+ईश्वर+कृतत्वत: ।
स एव कर्म+फलद: जीवानां पारिशेष्यत: ॥५/४॥

Appendix 01

The Vedas alone constitute (as revealed scripture) the authoritative criterion of truth, because they have been produced by the Lord of all. According to the logic of elimination, He alone is to giver of the fruits of (their) works (04).

जीवा वा जीवकर्माणि प्रकृति: परमाणव: ।
नेशते ह्यत्र जीवानां तत्तत्कर्मफलार्पणे ॥५/५॥
जीवा: वा जीव+कर्माणि प्रकृति: परमाणव: ।
न ईशते हि अत्र जीवानां तत्+तत्+कर्म+ फल+अर्पणे ॥५/५॥

The individual souls, or (their) works, or Primordial Matter, or the ultimate atoms are one of them capable of bestowing here (in this world) the fruits of works on individual souls (05).

जीवा: कर्मफलावाप्तौ शक्ताश्चेत्स्वसुखे रता: ।
अप्रार्थितानि दु:खानि वारयन्तु प्रयत्नत: ॥५/६॥
जीवा: कर्म+फल+अवाप्तौ शक्ता: चेत् स्व+सुखे रता: ।
अ-प्रार्थितानि दु:खानि वारयन्तु प्रयत्नत: ॥५/६॥

If individual souls be themselves capable of obtaining the fruits of works, handle them, being such as are (naturally) devoted to their own happiness, prevent by means of (their own) efforts the unwished for miseries (that often befall them) (06).

अशक्तान्यत्र कर्माणि जीवानां स्वफलार्पणे ।
अचेतनत्वादगते: स्वर्गादिफलभूमिषु ॥५/७॥
अ-शक्तानि अत्र कर्माणि जीवानां स्व+फल+अर्पणे ।
अ-चेतनत्वात् गते: स्वर्ग+आदि+ फल+भूमिषु ॥५/७॥

Works (कर्माणि) are here incapable of bestowing their own fruits on individual souls; because they (the works) are non-intelligent, and so have no access to (the power to bestow) heaven and other such regions as are (won as) the fruit of works (07).

नाचेतनत्वात्प्रकृते: फलदातृत्वसम्भव: ।
अचेतना: फलं दातुमशक्ता: परमाणव: ॥५/८॥
न अ-चेतनत्वात् प्रकृते: फल+दातृत्व+सम्भव: ।

अ-चेतना: फलं दातुम् अ-शक्ता: परमाणव: ॥५/८॥

Owing to its being non-intelligent, it is impossible for the Primordial Matter (also) to be the giver of fruits (of *karma*). The ultimate atoms, which (too) are non-intelligent, are unable to give (to any one) the fruits (of *karma*) (08).

कालोऽप्यचेतनास्तेषां न हि कर्मफलप्रद: ।
अतोऽन्य: फलदो लोके भवत्येभ्यो विलक्षण: ॥५/९॥
काल: अपि अ-चेतन: तेषां न हि कर्म+फल+प्रद: ।
अत: अन्य: फल+द: लोके भवति तेभ्य: विलक्षण: ॥५/९॥

Time also is non-intelligent, and so it surely cannot bestow on them (the individual souls) the fruits of their *karma*. Therefore (some) other Being, who is different from all these, happens to be the giver of the fruits (of *karma*) (09).

स तु प्राणिविशेषांश्च देशानपि तदाश्रयान् ।
जानन् सर्वज्ञ एवेष्टो नान्ये बौद्धादिसंमता: ॥५/१०॥
स: तु प्राणि+विशेषान् च देशान् अपि तत् आश्रयान् ।
जानन् सर्व+ज्ञ: एव इष्ट न अन्ये बौद्ध+आदि+ संमता: ॥५/१०॥

And such a Being, knowing as He does all the various living creatures and the places wherein they reside, has to be admitted to be the Omniscient One. (But) those others, whom the Bauddhas and others approve of, cannot be (so accepted) (10).

अजानन् प्राणिनो लोके हेयोपादेयमात्रवित् ।
प्रादेशिको न सर्वज्ञो नास्मदादिविलक्षण: ॥५/११॥
अ-जानन् प्राणिन: लोके हेय+उपादेय-मात्र+वित् ।
प्रादेशिक: न सर्वज्ञ: न अस्मत्+ आदि+विलक्षण: ॥५/११॥

He who does not know all the living beings in the world, but only knows what (in life) is (morally) worthy of acceptance and what worthy of rejection, and has (therefore) the scope (of his knowledge) limited - (he) is or different from each as are like ourselves and is not (hence) omniscient (11).

वेदैकदेशं दृष्ट्वा तु कारीरीवृष्टिबोधकम् ।
अदृष्टयोश्च विश्वास: कार्य: स्वर्गापवर्गयो: ॥५/१२॥
वेद+एक+देशं दृष्ट्वा तु कारीरी+वृष्टि+बोधकम् ।
अ-दृष्टयो: च विश्वास: कार्य: स्वर्ग+ अपवर्गयो: ॥५/१२॥

On knowing (the truth of) that one part of the Vedas, which teaches about the production of (the visible) showers of rain by means of the sacrifice known as *Kārīrīisṭi*, it becomes necessary to place faith in those invisible things (known as) heaven and the Absolution (अपवर्ग) (12).

कारीरीष्ट्युक्तवृष्टिश्च दृष्टव्यादृष्टनिर्णये ।
चित्रादे: पुत्रपश्वाप्तिर्द्रष्टव्यादृष्टनिर्णये ॥५/१३॥
कारीरि+इष्टि+उक्त+वृष्टि: च दृष्टव्या अ-दृष्ट+निर्णये ।
चित्र+आदे: पुत्र+पशु+आप्ति: द्रष्टव्या अ-दृष्ट+ निर्णये ॥५/१३॥

In determining (the truth regarding) the unseen (results of Vedic works), the shower of rain declared (to be produced) by (the performance of) that sacrifice, which is known as *Kārīrīisṭi*, has to be noted. The attainment of sons and cattle from the sacrifice known as *Citrā* and other such sacrifices has (also) to be noted in determining (the truth of) the unseen results (Vedic works) (13).

ज्योति:शास्त्रोक्तकालस्य ग्रहणं तन्निदर्शनम् ।
दृष्टैकदेशप्रामाण्यं यत्तूक्तं सौगतादिभि: ॥५/१४॥
ज्योति: शास्त्र+उक्त+कालस्य ग्रहणं तत् निदर्शनम् ।
दृष्ट+एक+देश+प्रामाण्यं यत् उक्तं सौगत+आदिभि: ॥५/१४॥
तच्च वेदादपहृतं सर्वलोकप्रतारकै: ।
मन्त्रव्याकरणं दृष्ट्वामन्त्रा विरचिता: पुन: ॥५/१५॥
तत् च वेदात् अपहृतं सर्व+लोक+प्रतारकै: ।
मन्त्र+व्याकरणं दृष्ट्वा मन्त्रा: विरचिता: पुन: ॥५/१५॥

In relation to (the items of) time specified in astronomy, the proof thereof is in the (timely occurrence of the) eclipse. Whatever the Bauddhas and others (like them) have taught to the effect that (all) such things are (wholly) authoritative as are (well) known (to be) partially (true) - that has been stolen from the Vedas by (these)

deceivers of the whole word. After learning the grammar of the hymns (of the Vedas), other (similar) hymns were composed anew by them (14-15).

लिपिसम्भिश्रजातास्ते सिद्धमन्त्रास्तथा कृता: ।
बौद्धागमेभ्यो दृष्टार्थो न हृता वैदिकै: क्वचित् ।।५/१६।।
लिपि+सम्भिश्र+जाता: ते सिद्ध+मन्त्रा: तथा कृता: ।
बौद्ध+आगमेभ्य: दृष्ट+अर्थो न हृता: वैदिकै: क्वचित् ।।५/१६।।

Magically effective charms produced by the bringing together of (suitable) letters - (they also) were similarly produced (anew by them). (On the other hand) nothing that has been seen (to occur in their own scriptures) has been stolen from the scriptures of the Bauddhas by those who are the followers of the Vedas (16).

वेदस्यैव षडङ्गानि यत: शीक्षादिकानि वै ।
नान्यागमाङ्गता तेषां न क्वाप्युक्ता परैरपि ।।५/१७।।
वेदस्य एव षट्+अङ्गानि यत: शिक्षा+आदिकानि वै ।
न अन्य+आगम+अङ्गता तेषां न क्व-अपि उक्ता :परै: अपि ।।५/१७।।

Because the six auxiliary-science-members, beginning with the science of phonetics and pronunciation, belong only to the Vedas, they do not form (such) members of other scriptures (then the Vedas). It is nowhere stated (to be so), even by those who are other (than the followers of the Vedas) (17).

अतो वेदबलीयस्त्वं नास्तिकागमसञ्चयात् ।
षट्पदार्थपरिज्ञानान्मोक्षं वैशेषिका विदु: ।।५/१८।।
अत: वेद+बलीयस्त्वं नास्तिक+आगम+सञ्चयात् ।
षट्+पदार्थ+परिज्ञानात् मोक्षं वैशेषिका: विदु: ।।५/१८।।

Therefore it is that the Vedas are more powerful (as authorities) than the (whole) collection of all the works of authority belonging to the atheists. The Vaiśeṣikas consider that the Absolution (मोक्ष) results through the knowledge of the six categories (18).

तदन्तर्गत एवेशो जीवा: सर्वमिदं जगत् ।
द्रव्यं गुणस्तथा कर्म सामान्यं यत्परापरम् ।।५/१९।।

तत्+अन्तर्गत: एव ईश: जीवा: सर्वम् इदं जगत्।
द्रव्यं गुण: तथा कर्म सामान्यं यत् पर+ अपरम्॥५/१९॥
विशेष: समवायश्च षट् पदार्था इहेरिता: ।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥५/२०॥
विशेष: समवाय: च षट् पदार्था: इह ईरिता: ।
पृथिवी आप: तथा तेज: वायु: आकाशम् एव च ॥५/२०॥
दिक्कालात्ममनांसीति नव द्रव्याणि तन्मते ।
पृथिवी गन्धवत्याप: सरसास्तेजस: प्रभा ॥५/२१॥
दिक्+काल+आत्म+मनांसि इति नव द्रव्याणि तत् मते ।
पृथिवी गन्धवति आप: स+रसा: तेजस: प्रभा ॥५/२१॥
अनुष्णाशीतसंस्पर्शो वायु: शब्दगुणं नभ: ।
दिक्पूर्वापरधीलिङ्गा काल: क्षिप्रचिरागत: ॥५/२२॥
अन-उष्ण+अ-शीत+संस्पश: वायु:शब्द+गुणं नभ: ।
दिक् पूर्व+अपर+धी+लिङ्गा काल: क्षिप्र+चिर+आगत: ॥५/२२॥

The Lord, the individual souls, and the whole of this world are (all) comprised within those (categories). Here (in this system) are given (these) six categories, *viz.*, substance, quality, action, generality, which is higher as well as lower, and intimate relation. According to the view of these (Vaiśeṣikas), there are nine substances, *viz.*, earth, water, light, air and ether, space, time, soul and mind. Earth possesses (the quality of) smell, water has (the quality of) taste, to light belongs (the quality of) illumination, air is neither hot nor cold to the touch, and *ākāśa* has sound for its (attributive) quality. Space is that which is indicated by the ideas of East and West, and time is that which is arrived at by means (of the ideas) of quickly and slowly (19-22).

आत्माहंप्रत्ययात्सिद्धो मनोऽन्त: करणं मतम् ।
अयोगमन्ययोगञ्च मुक्त्वा द्रव्याश्रिता गुणा: ॥५/२३॥
आत्मा अहं+प्रत्ययात् सिद्ध: मन: अन्त:+करणं मतम् ।
अ-योगम् अन्य+योगं च मुक्त्वा द्रव्य+आश्रिता: गुणा: ॥५/२३॥

The soul is proved by the I-idea, and *manas* (the faculty of attention) is understood to be the internal organ (of soul) Qualities abide in substances, so hat they are (to be perceived) not in

dissociation, (from substances), nor in association with anything other (than substances) (23).

चतुर्विंशतिधा भिन्ना गुणास्तेऽपि यथाक्रमात् ।
शब्दः स्पर्शो रसो रूपं गन्धसंयोगवेगताः ॥५/२४॥
चतुः+विंशति+धा भिन्नाः गुणाः ते अपि यथा+क्रमात् ।
शब्दः स्पर्श रसः रूपं गन्ध+ संयोग+वेगताः ॥५/२४॥
संख्याद्रवत्वसंस्कारपरिमाणविभागताः ।
प्रयत्नसुखदुःखेच्छाबुद्धिद्वेषपृथक्त्वताः ॥५/२५॥
संख्या+द्रवत्व+संस्कार+परिमाण+विभागताः ।
प्रयत्न+सुख+दुःख+इच्छा+बुद्धि+द्वेष+ पृथक्त्वताः ॥५/२५॥
परत्वञ्चापरत्वञ्च धर्माधर्मौ च गौरवम् ।
इमे गुणाश्चतुर्विंशत्यथ कर्म च पञ्चधा ॥५/२६॥
परत्वं च अ-परत्वं च धर्म+अ-धर्मौ च गौरवम् ।
इमे गुणाः चतुः+विंशति अथ कर्म च पञ्च+धा ॥५/२६॥
प्रसाराकुञ्चनोत्क्षेपा गत्यवक्षेपणे इति ।
परश्चापरमित्यत्र सामान्यं द्विविधं मतम् ॥५/२७॥
प्रसार+आकुञ्चन+उत्क्षेपाः गति+अवक्षेपणे इति ।
परं च अ-परं इति अत्र सामान्यं द्विविधं मतम् ॥५/२७॥

(These) qualities are divided into twenty-four. And they are in order as follows: sound, touch, taste, colour, (or form), smell, conjunction, speedfulness, number, fluidity, impressed innate influence, dimension, divided-ness, effort, pleasure, pain, desire, intellect, aversion, severalty, priority, posteriority, merit and demerit and heaviness. These are the twenty-four qualities. And then action is of five kinds, namely, expansion, contraction, throwing upwards, locomotion, and throwing downwards. Generality is here (in this school) known to be of two kinds, *viz.*, the higher and the lower (24-27).

परं सत्तादि सामान्यं द्रव्यत्वाद्यपरं मतम् ।
परस्परविवेकोऽत्र द्रव्याणां यैस्तु गम्यते ॥५/२८॥
परं सत्ता+आदि सामान्यं द्रव्यत्व+आदि अ-परं मतम् ।
परस्पर+विवेकः अत्र द्रव्याणां यैः तु गम्यते ॥५/२८॥
विशेषा इति ते ज्ञेया द्रव्यमेव समाश्रिताः ।

सम्बन्धः समवायः स्यात् द्रव्याणान्तु गुणादिभिः ॥५/२९॥
विशेषाः इति ते ज्ञेयाः द्रव्यम् एव समाश्रिताः ।
सम्बन्धः समवायः स्यात् द्रव्याणां तु गुण+ आदिभिः ॥५/२९॥

The higher (or the more comprehensive) one is the generality by existence, etc., while the lower (or the comparatively less comprehensive one is known to be such as substantiality (for instance). Those things, by means of which the mutual distinctions among the substances here are made out, are to be understood as forming particularities, and these (particularity) inhere only in substances. Intimate relation is the relation of substances with (such things as) qualities, etc. (28-29).

षट् पदार्था इमे ज्ञेयास्तन्मयं सकलं जगत् ।
तेषां साधर्म्यवैधर्म्यज्ञानं मोक्षस्य साधनम् ॥५/३०॥
षट् पदार्थाः इमे ज्ञेयाः तत्-मयं सकलं जगत् ।
तेषां साधर्म्य+वैधर्म्य+ज्ञानं मोक्षस्य साधनम् ॥५/३०॥

These six categories (of things) comprise (within themselves all) the objects of knowledge. The whole world is made up of them. The realization of their similarities and dissimilarity is the means of attaining the Absolution (मोक्षस्य साधनम्) (30).

द्रव्यान्तर्गत एवात्मा भिन्नो जीवपरत्वतः ।
देवा मनुष्यास्तिर्यञ्चो जीवास्त्वन्यो महेश्वरः ॥५/३१॥
द्रव्य+अन्तः+गतः एव आत्मा भिन्नः जीव+पर-त्वतः ।
देवाः मनुष्याःतिर्यञ्चः जीवाः तु अन्यः महा+ ईश्वरः ॥५/३१॥

The self, which is located within (material) substances, is itself of (two) different kinds in the form of the individual soul and of the Supreme Soul. The gods, men, and the lower animals are (all) individual souls, and the Great Lord is the other (kind of *atman*) (31).

तदाज्ञप्तक्रियां कुर्वन् मुच्यतेऽन्यस्तु बध्यते ।
श्रुतिस्मृतीतिहासाद्यं पुराणं भारतादिकम् ॥५/३२॥
तत्+आज्ञप्त+क्रियां कुर्वन् मुच्यते अन्यः तु बध्यते ।
श्रुति+स्मृति+इतिहास+आद्यं पुराणं भारत+आदिकम् ॥५/३२॥

ईश्वरज्ञेति विज्ञेया न लङ्घ्या वैदिकैः क्वचित्।
त्रिधा प्रमाणं प्रत्यक्षमनुमानागमाविति ॥५/३३॥
ईश्वर+आज्ञा इति विज्ञेया न लङ्घ्या वैदिकैः क्वचित्।
त्रिधा प्रमाणं प्रत्यक्षम् अनुमान+ आगमौ इति ॥५/३३॥
त्रिभिरेतैः प्रमाणैस्तु जगत्कर्तावगम्यते।
तस्मात्तदुक्तकर्माणि कुर्यात्तस्यैव तृप्तये ॥५/३४॥
त्रिभि:एतैः प्रमाणैः तु जगत्+कर्ता+अवगम्यते।
तस्मात् उक्त+कर्माणि कुर्यात् तस्य एव तृप्तये ॥५/३४॥

(That person), who performs the duties enjoined by Him, he is freed (from he bondage of *saṁsāra*), but the other person (who does not perform such duties) is bound down (in bondage). The Vedas, the Smṛties, the Itihāsas, etc., the Purāṇas, the Mahābhārata, etc., have all to be understood as constituting the commandment of the lord; and (this commandment) should not be transgressed at any time by those who are believers in the Vedas. The criteria of truth are of three kinds, *viz*. perception, inference, and scripture. The Creator of the World is made out (to exist) by means of these three criteria of truth. Therefore the works enjoined by Him have to be performed for the purpose of satisfying Him solely (32-34).

भक्त्यैव चार्चनीयोऽसौ भगवान्परमेश्वरः।
तत्प्रसादेन मोक्षः स्यात् करणोपरमात्मकः ॥५/३५॥
भक्त्या एव च अर्चनीयः असौ भगवान् परम+इश्वरः।
तत्+प्रसादेन मोक्षः स्यात् करण+ उपरम आत्मकः ॥५/३५॥

This divine and supreme Lord may be made to become pleased only by means of loving devotion. From His grace results the Absolution, which consists in the cessation of the activity of the instruments (of the soul) (35).

करणोपरमे त्वात्मा पाषाणवदवस्थितः।
दुःखसाध्यः सुखोच्छेदो दुःखोच्छेदवदेव नः ॥५/३६॥
करण+उपरमे तु आत्मा पाषाण+वत् अवस्थितः।
दुःख+साध्यः सुख+उच्छेदः दुःखः+ उच्छेदवत् एव नः ॥५/३६॥

On the cessation of the activity of (its) instruments, the soul exists in a condition similar to that of a stone. To us, the destruction of pleasure (also) is, like the destruction of pain, accomplishable with difficulty (36).

अत: संसारनिर्विण्णो मुमुक्षुर्मुच्यते जन: ।
पश्चान्नैयायिकस्तर्कै: साधयिष्यति न: शिवम् ।
नातिभिन्नं मतं यस्मादावयोर्वेदवादिनो: ॥५/३७॥
अत: संसार+निर्विण्ण: मुच्यते जन: ।
पश्चात् नैयायिक: तर्कै: साधयिष्यति न: शिवम् ।
न अतिभिन्नं मतं यस्मात् आवयो: वेद+वादिनो: ॥५/३७॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे वैशेषिकपक्षो नाम पञ्चमं प्रकरणम् ॥
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे वैशेषिक+पक्ष: नाम पञ्चमं प्रकरणम् ॥

Therefore, after becoming (thus) disgusted with the life of *saṁsāra*, the person, who is desirous of attaining final freedom, obtains the (wished-for) Absolution (मुमुक्षु:).

Hereafter the Naiyāyikas will prove by means of logical reasoning what is good and acceptable to us (as philosophical controversialists): for, the views (of both) of us, who uphold the Vedas (alike), do not differ very materially (37).

**Thus ends the fifth chapter, known as the system of the Vaiśeṣikas, in the Sarva-darśana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

अथ नैयायिकपक्षप्रकरणम् ॥६॥

नैयायिकस्य पक्षोऽथ संक्षेपात्प्रतिपाद्यते ।
यत्तर्करक्षितो वेदो ग्रस्त: पाखण्डदुर्जनै: ॥६/१॥
नैयायिकस्य पक्ष: अथ संक्षेपात् प्रतिपाद्यते ।
यत्+तर्क+रक्षित: वेद: ग्रस्त: पाखण्ड + दुर्जनै: ॥६/१॥

Appendix 01

# CHAPTER VI

## THE SYSTEM OF THE NAIYĀYIKAS

The theory of the Naiyāyika is briefly expounded now - (the theory of him), through whose logical reasoning the Vedas devoured by the wretched heretic folk (पाखण्डदुर्जनैः) been saved (from destruction) (01).

अक्षपादः प्रमाणादिषोडशार्थप्रबोधनात् ।
जीवानां मुक्तिमाचष्टे प्रमाणश्च प्रमेयता ॥६/२॥
अक्षपादः प्रमाण+आदि+षोडश+अर्थ+प्रबोधनात् ।
जीवानां मुक्तिम् आचष्टे प्रमाणं च प्रमेयता ॥६/२॥
निर्णयः संशयोऽन्यश्च प्रयोजननिदर्शने ।
सिद्धान्तावयवौ तर्को वादो जल्पो वितण्डता ॥६/३॥
निर्णयः संशयः अन्यः च प्रयोजन+निदर्शने ।
सिद्धान्त+अवयवौ तर्कः वादः जल्पः वितण्डता ॥६/३॥
हेत्वाभासश्छलं जातिर्निग्रहस्थानमित्यपि ।
प्रत्यक्षमनुमानाख्यमुपमानागमाविति ॥६/४॥
हेतु+आभासः छलं जातिः निग्रह+स्थानम् इति अपि ।
प्रत्यक्षम् अनुमान+आख्यम् उपमान+आगमौ इति ॥६/४॥
चत्वार्यत्र प्रमाणानि नोपमानन्तु कस्य चित् ।
प्रत्यक्षमस्मदादीनामस्त्यन्यद्योगिनामपि ॥६/५॥
चत्वारि अत्र प्रमाणानि न उपमानं तु कस्य चित् ।
प्रत्यक्षम् अस्मत् आदीनाम् अस्ति अन्यत् योगिनाम् अपि ॥६/५॥

Akṣapāda (Gautama) declares that the Absolution (मुक्तिः) results to individual souls from the knowledge of the sixteen topics beginning with the means of knowledge (प्रमाणम्). These are the means of proof, the object of knowledge, settled conclusion, and the other thing - doubt, purpose (or motive), example, demons-tration, premises, reasoning, discussion, controversy, caviling, fallacy, perversion, self-confutation and also final refutation. There are four means of proof here (in this system), *viz.*, perception and what is called inference, comparison (or analogy), and scripture. Comparison, however, is not admitted by some (as a means of proof). Perception is (firstly) that of ourselves and of others (similar to us), and there is also (secondly)

another (kind of it), *viz.*, that of the Yogis (or transcendental seers) (02-05).

पश्यन्ति योगिन: सर्वमीश्वरस्य प्रसादत: ।
स्वभावेनेश्वर: सर्वं पश्यति ज्ञानचक्षुषा ॥६/६॥
पश्यन्ति योगिन: सर्वम् ईश्वरस्य प्रसादत: ।
स्व+भावेन ईश्वर: सर्वं पश्यति ज्ञान+चक्षुषा ॥६/६॥
यत्नेनापि न जानन्ति सर्वेशं मांसचक्षुषा ।
ईश्वरं साधयत्येतदनुमानमिति स्फुटम् ॥६/७॥
यत्नेन अपि न जानन्ति सर्व+ईशं मांस+चक्षुषा ।
ईश्वरं साधयति एतत् अनुमानम् इति स्फुटम् ॥६/७॥
भूर्भूधरादिकं सर्वं सर्वविद्धेतुकं मतम् ।
कार्यत्वाद्धटवच्चेति जगत्कर्तानुमीयते ॥६/८॥
भू:+भू+धर+आदिकं सर्वं सर्व+वित्+हेतुकं मतम् ।
कार्यत्वात् घट+वत् च इति जगत्+कर्ता अनुमीयते ॥६/८॥

The Yogis see all things by means of the grace of the Lord. The Lord naturally sees all things with His eye of knowledge. The beings with the eye of flesh do not realise the lord of all even with (great) effort. It is (however) clear that the following syllogism proves the Lord: -All things such as the earth, the mountains, etc., are understood to have an Omniscient Beings as the cause (of their creation), because they are all, like pots (for instance), produced effects. It is thus that the Creator of the world is inferred (06-08).

कार्यत्वमप्यासिद्धञ्चेत्क्ष्मादे: सावयवत्वत: ।
घटकुड्यादिवच्चेति कार्यत्वमपि साध्यते ॥६/९॥
कार्यत्वम् अपि अ-सिद्धं चेत् क्ष्मा+आदे: स-अवयवत्वत: ।
घट+कुड्य+आदि+वत् च इति कार्यत्वम् अपि साध्यते ॥६/९॥

If it is said that, in regard to the earth, etc., their beings produced effects is (itself) not proved, then that also, *viz.*, their beings produced effect, may be proved by means of (the fact of) their beings made up of component parts, in the manner of pots, walls, etc., (which are all up of component parts) (09).

दृष्टान्तसिद्धदेहादेर्धर्माधर्मप्रसङ्गतः ।
न विशेषविरोधोऽत्र वाच्यो भट्टादिभिः क्वचित् ॥६/१०॥
दृष्टान्त+अ-सिद्ध+देह+आदेः धर्म+अ-धर्म+प्रसङ्गतः ।
न विशेष+विरोधः अत्र वाच्यः भट्ट+ आदिभिः क्वचित् ॥६/१०॥

In relation to (the possession) the physical body, etc., as seen (in the case of the makers of pots, makers of walls, etc.) in the above illustrative example, the question of merit and demerit (as determining the material embodiment of a soul) arises (as a matter of course). From this circumstance, no particular objection can in any respect be raised here by Bhaṭṭa and others (in relation to the proof of the world-creating Lord) (10).

उत्कर्षसमजातित्वात्सम्यग्दोषो न तादृशः ।
कार्यत्वमात्रात्कर्तृत्वमात्रमेवानुमीयते ॥६/११॥
उत्कर्ष+सम+जातित्वात् सम्यक् दोषः न तादृशः ।
कार्यत्व-मात्रात् कर्तृत्व-मात्रम् एव अनुमीयते ॥६/११॥

Any such objection is not valid (as regards God), because there is (the appropriateness of His) belonging to a class which may be (either) superior (or) equal (to that of the makers of pots and the makers of walls, etc.). What is really inferred here is simply the creatorship (of the Lord) purely from the fact that of (the world) being a produced effect (11).

दृष्टान्तस्थविशेषैस्त्वं विरोधं यदि भाषसे ।
धूमेनाग्न्यनुमानस्याप्यभावोऽपि प्रसज्यते ॥६/१२॥
दृष्टान्त+स्थ+विशेषैः त्वं विरोधं यदि भाषसे ।
धूमेन अग्नि+अनुमानस्य अपि अ-भावः अपि प्रसज्यते ॥६/१२॥

If you raise any objection (to this) with aid of (any) such peculiarities as may be found in the (given illustrative) examples, the there will also be room (even in the reasoning accepted by you) for the negation of the inference of fire from smoke (12).

अशरीरोऽपि कुरुते शिवः कार्यमिहेच्छया ।
देहानपेक्षो देहं स्वं यथा चेष्टयते जनः ॥६/१३॥
अ-शरीरः अपि कुरुते शिवः कार्यम् इह इच्छया ।
देह+अन्-अपेक्ष देहं स्वं यथा चेष्टयते जनः ॥६/१३॥

The Lord Śiva, even though He has no body, performs work here, out of (His own free) will, in the same manner in which a person, without necessarily requiring (another) body (as instrument), makes his own body move (13).

इच्छाज्ञानप्रयत्नाख्या महेश्वरगुणास्त्रय: ।
शरीररहितेऽपि स्यु: परमाणुस्वरूपवत् ॥६/१४॥
इच्छा+ज्ञान+प्रयत्न+आख्या: महेश्वर+गुणा: त्रय: ।
शरीर+रहिते अपि स्यु: परमाणु+स्वरूप+वत् ॥६/१४॥

The attributes of the great Lord are these three, *viz.* desire, knowledge and effort. These may, like the essential characteristics of atoms, exist even where there is no (built-up) body.

कार्यं क्रियां विना नात्र सा क्रिया यत्नपूर्विका ।
क्रियात्वात् साध्यतेऽस्माभिरस्मदादिक्रिया यथा ॥६/१५॥
कार्यं क्रियां विना न अत्र सा क्रिया यत्न+पूर्विका ।
क्रियात्वात् साध्यते अस्माभि:अस्मत्+आदि+ क्रिया यथा ॥६/१५॥

No effect is here produced without (a producing) action, and it is proved by us that this action has to be preceded by efforts, because it has the character of an action like the actions of persons like us (15).

सर्वज्ञीयक्रियोद्भूतक्ष्मादिकार्योपपत्तिभि: ।
ईश्वरासत्त्वमुक्तं यन्निरस्तं पारिशेष्यत: ॥६/१६॥
सर्वज्ञीय+क्रिया+उद्भूत+क्ष्मा+आदि+कार्य+उपपत्तिभि: ।
ईश्वर+अ-सत्त्वम् उक्तं यत् निरस्तं पारिशेष्यत: ॥६/१६॥

That enunciation of the non-existence of the Lord, which has been made (by our opponent), has been (thus) disproved through (the process of) elimination, by taking into account the appropriateness of the earth, etc., being such produced effects as can be caused (only) by the activity of One who is omniscient (16).

यथा वैशेषिकेणेश: पारिशेष्येण साधित: ।
तत्तर्कोऽत्रानुसन्धेय: समानं शास्त्रमावयो: ॥६/१७॥
यथा वैशेषिकेण ईश: पारिशेष्येण साधित: ।
तत्+तर्क: अत्र अनुसन्धेय: समानं शास्त्रम् आवयो: ॥६/१७॥

That logic by which the Vaiśeṣika has proved the Lord God through the process of elimination - that has to be adopted here (by us also). In this respect, both our systems are alike (17).

कालकर्मप्रधानादेरचैतन्याच्छिवोऽपर: ।
अल्पज्ञत्वात्तु जीवानां ग्राह्य: सर्वज्ञ एव स: ।।६/१८।।
काल+कर्म+प्रधान+आदे: अ-चैतन्यात् शिव: अ-पर: ।
अल्प+ज्ञ त्वात् तु जीवानां ग्राह्य: सर्व+ज्ञ एव स: ।।६/१८।।

Because time, *karma*, prakṛti, etc., are non-intelligent the Lord Śiva is different (from them). And because individual souls are all possessed of very limited knowledge, He (the Lord Śiva) has to be accepted as no other than an Omniscient Being (18).

सर्वज्ञेशप्रणीतत्वाद्वेदप्रामाण्यमिष्यते ।
स्मृत्यादीनां प्रमाणत्वं तन्मूलत्वेन सिध्यति ।।६/१९।।
सर्व+ज्ञ+ईश+प्रणीतत्वात् वेद+प्रामाण्यम् इष्यते ।
स्मृति+आदीनां प्रमाणत्वं तत्+मूलत्वेन सिध्यति ।।६/१९।।

The authoritativeness of the Vedas is accepted, because they have been brought out by the Omniscient Lord. The authoritativeness of the Smṛtis and such other (sacred writings) results from their being based upon these (Vedas) (19).

श्रौतं स्मार्तश्च यत्कर्म यथावदिह कुर्वताम् ।
स्वर्गापवर्गौ स्यातां हि नैव पाखण्डिनां क्वचित् ।।६/२०।।
श्रौतं स्मार्तं च यत् कर्म यथावत् इह कुर्वताम् ।
स्वर्ग+अपवर्गौ स्यातां हि न एव पाखण्डिनां क्वचित् ।।६/२०।।

Heaven and the Absolution (अपवर्ग:) come only to those who faithfully perform the works ordained in the Vedas and the Smṛtis, but never to the heretics (पाखण्डिनाम्) (20).

त्रियम्बकादिभिर्मन्त्रैरपि देवो महेश्वर: ।
अनुष्ठानोपयुक्तार्थस्मारकै: प्रतिपाद्यते ।।६/२१।।
त्रियम्बक+आदिभि: मन्त्रै: अपि देव: महा+ईश्वर: ।
अनुष्ठान+उपयुक्त+अर्थ+स्मारकै: प्रतिपाद्यते ।।६/२१।।

The Lord Śiva is described also in the *Triyambaka-mantra* and other such (*mantras*) by means of such things as are (calculated) to remind one of what is good to be adopted in the (daily) practice of religion (21).

कारीरीष्टयर्थवृष्ट्यादि दृष्ट्वा स्वर्गापवर्गयो: ।
विश्वासोऽदृष्टयो: कार्य: कारणाद्यै: प्रपञ्चित: ॥६/२२॥
कारीरी+इष्टि+अर्थ+वृष्टि+आदि दृष्ट्वा स्वर्ग+अपवर्गयो: ।
विश्वास: अ-दृष्टयो: कार्य: कारण+आद्यै: प्रपञ्चित: ॥६/२२॥

It has been explained by means of reasoning and other such (aids) that, on observing among other things the shower of rain as the visible result of the performance if the sacrifice known as *Kārīriṣṭi*, faith has to be placed in these (two) unseen things, *viz*. heaven and the Absolution (अपवर्ग) (22).

अप्रमाणमशेषञ्च शास्त्रं बुद्धादिकल्पितम् ।
स्यादनाप्तप्रणीतत्वादुन्मत्तानां यथा वच: ॥६/२३॥
अ-प्रमाणम् अ-शेषं च शास्त्रं बुद्ध+आदि+कल्पितम् ।
स्यात् अन-आप्त+प्रणीतत्वात् उन्मत्तानां यथा वच: ॥६/२३॥

The whole lot of the scriptures produced by Buddha and others (like him) is authoritative like the speech of the insane, because those scriptures have been composed by persons who were not wise and trustworthy (23).

बीजप्ररोहरक्षायै वृति: कण्टकिनी यथा ।
वेदार्थतत्त्वरक्षार्थं तथा तर्कमयी वृति: ॥६/२४॥
बीज+प्ररोह+रक्षायै वृति: कण्टकिनी यथा ।
वेद+अर्थ+तत्त्व+रक्षा+अर्थं तथा तर्कमयी वृति: ॥६/२४॥

What the thorny hedge is for the protection of the growth of (the crops raised from) the seeds (sown in the fields), that the hedge consisting of logical reasoning is for the safeguarding of the truths expounded in the Vedas (24).

प्रमानुग्राहकस्तर्क: स कथात्रयसंवृत: ।
वादो जल्पो वितण्डेति तिस्र एव कथा मता: ॥६/२५॥

प्रमा+अनुग्राहक: तर्क : स कथा+त्रय+संवृत: ।
वाद: जल्प: वितण्डा इति तिस्र: एव कथा: मता: ॥६/२५॥

Logical reasoning supports right knowledge and it is associated with three process of dialectics. These dialectic processes are understood to be only three, *viz*., discussion, controversy and cavil (25).

आचार्येण तु शिष्यस्य वादस्तत्त्वबुभुत्सया ।
जय: पराजयो नात्र तौ तु जल्पवितण्डयो: ॥६/२६॥
आचार्येण तु शिष्यस्य वाद: तत्त्व+बुभुत्सया ।
जय: पराजय: न अत्र तौ तु जल्प+वितण्डयो: ॥६/२६॥

A discussion is (that which is carried on) by the student with the teacher the object of learning the truth. Neither victory nor defeat is (the aim) here. Both these (arise as aims), however, in relation on controversy and cavil (26).

वादी च प्रतिवादी च प्राश्निकश्च सभापति: ।
चत्वार्यङ्गानि जल्पस्य वितण्डायास्तथैव च ॥६/२७॥
वादी च प्रतिवादी च प्राश्निक: च सभा+पति: ।
चत्वारि अङ्गानि जल्पस्य वितण्डाया: तथा एव च ॥६/२७॥

In regard to controversy, as also in regard to cavil, there are four constituent requisites, *viz.* a disputant, a counter-disputant, a questioner, and a president of the assembly (wherein the parties carry on their dialectic contests) (27).

सदुत्तरापरिज्ञानात् पराजयभये सति ।
जयेच्छलेन जात्या वा प्रतिवादी तु वादिनम् ॥६/२८॥
सत्+उत्तर+अ-परिज्ञानात् पराजय+भये सति ।
जयेत् छलेन जात्या वा प्रतिवादी तु वादिनम् ॥६/२८॥

The counter-disputant, whatever he is in dread of defeat due to his (own) ignorance of the appropriate answer, should conquer the disputant either by (the process of) perversion or by (the pointing out of) self-confutation and other such defects (in his arguments) (28).

छलं जातिं ब्रुवाणस्य निग्रहस्थानमीरयेत् ।
निग्रहस्थानमित्युक्तं कथाविच्छेदकारकम् ॥६/२९॥
छलं जातिं ब्रुवाणस्य निग्रह+स्थानम् ईरयेत् ।
निग्रह+स्थानम् इति उक्तं कथा+विच्छेद+कारकम् ॥६/२९॥

In regard to the person who utilizes (in his arguments the process of) perversion or (the pointing out of) self-confutation, one should set up a final refutation. That which puts an end to a dialectic exposition is said to be the final refutation (29).

तत्रोपचारसामान्यवाक्पूर्वं त्रिविधं छलम् ।
चतुर्वेदविदित्युक्ते कस्मिंश्चिद्वादिना द्विजे ॥६/३०॥
तत्र+उपचार+सामान्य+वाक् पूर्वं त्रि+विधं छलम् ।
चतु:+वेद:+वित् इति उक्ते कस्मिन्-चित् वादिना द्विजे ॥६/३०॥
किमत्र चित्रं ब्राह्मण्ये चतुर्वेदज्ञतोचिता ।
एवं सामान्यदृष्ट्या तु दूषिते प्रतिवादीना ॥६/३१॥
किम् अत्र चित्रं ब्राह्मण्ये चतु:वेद+ज्ञता उचिता ।
एवं सामान्य+दृष्ट्या तु दूषिते प्रति+वादीना ॥६/३१॥
वदेद्वाक्यैरनेकान्तं निग्रहस्थानमप्यथ ।
नववस्त्रो बटुश्चेति वाद्युक्ते तत्र वाक्छलम् ॥६/३२॥
वदेत् वाक्यै: अन्-एक+अन्तं निग्रह+स्थानम् अपि अथ ।
नव+वस्त्र: बटु च इति वादि+उक्ते तत्र वाक्+छलम् ॥६/३२॥
कुतोऽस्य नव वासांसीत्याचक्षाणस्य निग्रह: ।
तात्पर्यवैपरीत्येन कल्पितार्थस्य बाधनम् ॥६/३३॥
कुत: अस्य नव वांसासि इति आचक्षाणस्य निग्रह: ।
तात्पर्य+वैपरीत्येन कल्पित+ अर्थस्य बाधनम् ॥६/३३॥

Of these, (the trick of) perversion is of three kinds, being based on the secondary sense of words, on their general signification, or on the (ambiguity of the) language (used by the opponent). When it is said by a disputant that a certain dvija (or twice-born Brahmin) knows (all) the four Vedas, if the opponent finds fault with this, taking for the purpose a general view (of the situation), and says-"Is his anything wonderful? To be the knower of the four Vedas is quite in keeping with (his) being a Brahmin (द्विज)"-then, as a refutation (of this position), its over-comprehensiveness should be brought out by means

of (appropriately argumentative) sentences. When a disputant gives out (for instance)-"This Vedic student is a *nava-vastra*", there would be verbal perversion (in the controversy) there, if the speaker is refuted (by his opponent) by saying-"Where are the nine cloths of this (student)?" By reason of its being opposed to the intended purport (of speaker, this sort of reply) stultifies the meaning aimed at (by him) (30-33).

स्वस्य व्याघातकं वाक्यं दूषणक्षममेव वा ।
उत्तरं जातिरित्याहुश्चतुर्विंशतिभेदभाक् ।।६/३४।।
स्वस्य व्याघात+कं वाक्यं दूषण+क्षमम् एव वा ।
उत्तरं जातिः इति आहुः चतु+विंशति+भेद+भाक् ।।६/३४।।

An argument which is well destructive of one's own (position), or a reply which is well capable of being found fault with - that is self-confutation. This consists of twenty-four varieties (34).

चतुर्विंशतिजातिनां प्रयोक्तुः प्रतिवादिनः ।
वक्तव्यं निग्रहस्थानमसदुत्तरवादिनः ।।६/३५।।
चतुः+विंशति+जातिनां प्रयोक्तुः प्रति+वादिनः ।
वक्तव्यं निग्रह+स्थानम् अ-सत्+उत्तर+वादिनः ।।६/३५।।

Where a counter-disputant employs the twenty-four kinds of (arguments leading to) self-disputant and thus gives erroneous answers, what has to be urged (to put him down) is final refutation (35).

यथा साधर्म्यवैधर्म्यात्समोत्कर्षापकर्षतः ।
वर्ण्यावर्ण्यविकल्पाश्च प्राप्त्यप्राप्तीतिसाध्यताः ।।६/३६।।
यथा साधर्म्य+वैधर्म्यात् सम+उत्कर्ष+अपकर्ष-तः ।
वर्ण्य+अ-वर्ण्य+विकल्पाः च प्राप्ति+अ-प्राप्ति इति साध्यताः ।।६/३६।।
प्रसङ्गप्रतिदृष्टान्तावनुत्पत्तिश्च संशयः ।
अर्थापत्त्यविशेषौ च हेतुप्रकरणाह्वयौ ।।६/३७।।
प्रसङ्ग+प्रति+दृष्टान्तौ अन्-उत्पत्तिः च संशयः ।
अर्थापत्ति+अ-विशेषौ च हेतु+प्रकरण+ आह्वयौ ।।६/३७।।
कार्योपलब्ध्यनुपलब्धिनित्यानित्याश्च जातयः ।
साम्यापादकहेतुत्वात् समताजातयो मताः ।।६/३८।।

कार्य +उपलब्धि अन्-उपलब्धि+नित्य+अ-नित्या: च जातय: ।
साम्य+आपादक+हेतुत्वात् समता+जातय: मता: ॥६/३८॥

The various kinds of self-confutation are (dependent upon) what follow: likeness, unlikeness, equality, superiority, inferiority, describability, and indescribability, alterative supposition, applicability, inapplicability, and the process of accomplishing the end in view, incident, counter-illustration, ineffectiveness, doubt, presumption from circumstances, uniformity, and what are called logical proof and inconclusive argument, action, perceptibility, the invariable. Since these happen to be the means of giving rise to (the sense of) sameness (in relation to both the sides of a argument), they are (also) known as the (different) kinds of 'sameness' (in dialectics) (36-38).

सदुत्तरापरिज्ञाने स्यादेकान्तपराजय: ।
एवं जल्पवितण्डाभ्यां वेदबाह्यान्निरस्य तु ॥
वेदैकविहितं कर्म कुर्यादीश्वरतृप्तये ।
तत्प्रसादाप्तयोगेन मुमुक्षुर्मोक्षमाप्नुयात् ॥६/३९-४०॥
सत्+उत्तर+अ-परिज्ञाने स्यात् एक-अन्त+पराजय: ।
एवं जल्प+वितण्डाभ्यां वेद+बाह्यान् निरस्य तु ॥
वेद+एक+विहितं कर्म कुर्यात् ईश्वर+तृप्तये ।
तत्+प्रसाद+आप्त+योगेन मुमुक्षु: मोक्षम् आप्नुयात् ॥६/३९-४०॥

When there is complete ignorance of the right answers (to be given in an argument), absolute defeat will be the result. Accordingly, (even) by means of controversy and cavil, one has to refute those who are out side the pale of the Vedas, and then, for the purpose of satisfying the Lord God, one has to perform only such works as are enjoined in the Vedas. By means of the power of Yoga (meditation and mental concentration) obtained through His grace, he, who is desirous of obtaining the final deliverance of his soul, will obtain (that) Absolution (39-40).

नित्यानन्दानुभूति: स्यान्मोक्षे तु विषयादृते ।
वरं वृन्दावने रम्ये सृगालत्वं वृणोम्यहम् ॥६/४१॥
नित्य+आनन्द+अनुभूति: स्यात्+मोक्षे तु विषयात् ऋते ।

वरं वृन्दावने रम्ये सृगालत्वं वृणोमि अहम् ॥६/४१॥
वैशेषिकोक्तमोक्षात्तु सुखलेशविवर्जितात् ।
यो वेद विहितैर्यज्ञैरीश्वरस्य प्रसादत: ॥६/४२॥
वैशेषिक+उक्त+मोक्षात् तु सुख+लेश+विवर्जितात् ।
य: वेद विहितै: यज्ञै: ईश्वरस्य प्रसादत: ॥६/४२॥
मूर्छामिच्छति यत्नेन पाषाणवदवस्थितिम् ।
मोक्षो हि हरिभक्त्याप्तयोगेनेति पुरोदित: ॥६/४३॥
मूर्छाम् इच्छति यत्नेन पाषाण+वत्+अवस्थितिम् ।
मोक्ष: हि हरि+भक्ति+आप्त+योगेन इति पुरा उदित: ॥६/४३॥

In the condition of Absolution there will be the experience of eternal bliss without (any perception whatsoever of) sense-objects.

I choose to be a fox in the beautiful *Vṛndāvana* in preference to that altogether blissless salvation of soul-deliverance, which has been taught by the Vaiśeṣika who, by means of the sacrifice prescribed in the Vedas and by means of grace of the Lord, wishes to attain with great effort the (altogether feelingless) state of a swoon, a condition of existence similar to that of a stone. Indeed, it has been already stated that the final deliverance (of the soul) results from that Yoga, which is the outcome of loving devotion directed to Hari (or the God Viṣṇu) (41-43).

अष्टावङ्गानि योगस्य यमोऽथ नियमास्तथा ।
आसनं पवनायाम: प्रत्याहारोऽथ धारणाम् ।
ध्यानं समाधिरित्येवं तत्साङ्ख्यो विस्तरिष्यति ॥६/४४॥
अष्टौ अङ्गानि योगस्य यम: अथ नियम: तथा ।
आसनं पवन+आयाम: प्रत्याहार: अथ धारणाम् ।
ध्यानं समाधि: इति एवं तत् साङ्ख्य: विस्तरिष्यति ॥६/४४॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे नैयायिकपक्षो नाम षष्ठं प्रकरणम् ॥
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे नैयायिक+पक्ष: नाम षष्ठं प्रकरणम् ॥

Yoga has eight essential constituents, *viz.* internal selfrestraint, external restraint of conduct, assumption of postures, controlling of the breath, drawing the senses into the mind within, and sustained attention, and intense meditation, and self-realisation. The Sāṁkhya will explain these at length (44).

**Thus ends the sixth chapter, known as the theory of Naiyāyikas, in the *Sarva-darśana-siddhānta-saṅgraha*, composed by the venerable Śaṅkarācārya.**

अथ प्रभाकरपक्षप्रकरणम् ॥७॥

प्रभाकरगुरोः पक्षः संक्षेपादथ कथ्यते ।
तुष्टाव पूर्वमीमांसामाचार्यस्पर्धयापि यः ॥ ७/१॥
प्रभाकर+गुरोः पक्षः संक्षेपात् अथ कथ्यते ।
तुष्टाव पूर्व+मीमांसाम् आचार्य+स्पर्धया अपि यः ॥७/१॥

# CHAPTER VII

# THE THEORY OF PRABHĀKARA

Now, the theory of the teacher Prabhākara, who, even out of rivalry with his (own) preceptor, extolled the Pūrva-Mīmāṁsā, will be briefly described (01).

द्रव्यं गुणास्तथा कर्म सामान्यं परतन्त्रता ।
पञ्चार्थाः शक्तिसादृश्यसङ्ख्याभिस्त्वष्टधा स्मृताः ॥७/२॥
द्रव्यं गुणाः तथा कर्म सामान्यं पर+तन्त्रता ।
पञ्च+अर्थाः शक्ति+सादृश्य+सङ्ख्याभिः तु अष्ट-धा स्मृतः ॥७/२॥
न विशेषो न चाभावो भूतलाद्यतिरेकतः ।
वेदैकविहितं कर्म मोक्षदं नापरं गुरोः ॥७/३॥
न विशेषः न च अ-भावः भू+तल+आदि+अतिरेक-तः ।
वेद+एक+विहितं कर्म मोक्ष+दं न अ-परं गुरोः ॥७/३॥

According to (this) teacher, there are five categories, *viz.* substance, power, similarity and subordination - which, along with power, similarity a number, are understood to be (altogether) of eight different kinds: there is no particularity, and there is no non-existence as apart from the (correlated) surface of the earth, etc. and only that work which is ordained in the Vedas can be the bestower of the salvation of soul-emancipation, and no other (work is capable of being the bestower of such salvation) (02-03).

बध्यते स हि लोकस्तु यः काम्यप्रतिषिद्धकृत् ।
विध्यर्थवादमन्त्रैश्च नामधेयैश्चतुर्विधः ॥७/४॥
बध्यते सः हि लोकः तु यः काम्य+प्रतिषिद्ध+कृत् ।
विधि+अर्थवाद+मन्त्रैः च नामधेयैः चतुः+विधः ॥७/४॥
वेदो विधिप्रधानोऽयं धर्माधर्मावबोधकः ।
आत्मा ज्ञातव्य इत्यादिविधयस्त्वारुणे स्थिताः ॥७/५॥
वेदः विधि+प्रधानः अयं धर्म+अ-धर्म+अवबोधकः ।
आत्मा ज्ञातव्यः इति+आदि+ विधयः तु आरुणे स्थिताः ॥७/५॥
यथावदात्मनां तत्र बोधं विदधते स्फुटम् ।
बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ॥७/६॥
यथा+वत् आत्मनां तत्र बोधं विदधते स्फुटम् ।
बुद्धि+इन्द्रिय+शरीरेभ्यः भिन्नः आत्मा विभुः ध्रुवः ॥७/६॥

Indeed, a person becomes bound, when he performs desirable i.e. selfish or prohibited actions. The (contents of the) Vedas are divisible into four kinds, as mandatory injunctions (विधि), explanatory passages (अर्थवाद), metrical hymns (मन्त्रः), and names (नामधेयम्). These (Vedas) have the mandatory injunctions as their important subject matter, and teach us what constitute (our) duties as well as what do not constitute (our) duties. Such injunctions - as 'The Self has to be known' (आत्मा ज्ञातव्यः) - are contained in the Āruṇa (that is, in the Upaniṣads), and clearly enjoin there (the acquisition of) the knowledge of the self as it really is. The Self is different from the intellect, the senses, and the body, and is all pervading and unchanging (04-06).

नानाभूतः प्रतिक्षेत्रमर्थज्ञानेषु भासते ।
घटं जानाम्यहं स्पष्टमित्यत्र युगपत्त्रयम् ॥७/७॥
नाना+भूतः प्रति+क्षेत्रम् अर्थ+ज्ञानेषु भासते ।
घटं जानामि अहं स्पष्टम् इति अत्र युगपत् त्रयम् ॥७/७॥

In the cognition of objects, it appears to be varied in from in relation to every one of the (many) fields (of objective cognition). In (the perception) - "I know the pot well" - surely there arises to a person at once threefold cognition (07).

घटो विषयरूपेण कर्ताहंप्रत्ययागतः ।
स्वयंप्रकाशरूपेण ज्ञानं भाति जनस्य हि ॥७/८॥
घटः विषय+रूपेण कर्ता अहं+प्रत्यय+आगतः ।
स्वयं+प्रकाश+रूपेण ज्ञानं भाति जनस्य हि ॥७/८॥

Indeed, to the (perceiving) person, the pot appears as constituting the object of knowledge, the agential subject of knowledge (appears) as derived from the ego-idea, and the knowledge (itself appears) as a self-luminous something (08).

करणोपरमान्मुक्तिमाह वैशिषको यथा ।
दुःसहापारसंसारसागरोत्तरणोत्सुकः ॥७/९॥
करण+उपरमात् मुक्तिम् आह वैशिषकः यथा ।
दुःसह+अ-पार+संसार+सागर+ उत्तरण + उत्सुकः ॥७/९॥
प्रयत्नसुखदुःखेच्छाधर्माधर्मादिनाशतः ।
पाषाणवदवस्थानमात्मानो मुक्तिमिच्छति ॥७/१०॥
प्रयत्न+सुख+दुःख+इच्छा+धर्म+अ-धर्म+आदि+नाश-तः ।
पाषाण+वत् अवस्थानम् आत्मानः मुक्तिम् इच्छति ॥७/१०॥

The Vaiśeṣika has declared that the Absolution (मुक्तिः) results from the cessation of the activities of the instruments (of the soul). Accordingly, he, being anxious to cross the shoreless ocean of unendurable *saṁsāra*, wishes to attain that the Absolution (मुक्तिः), which is (merely) a state of the existence similar to that of a stone and is the outcome of the destruction of volitional effort, pleasure, pain, desire, merit, demerit, etc. (09-10).

दुःखसाध्यसुखोच्छेदो दुःखोच्छेदवदिष्यते ।
नित्यानन्दानुभूतिश्च निर्गुणस्य न चेष्यते ॥७/११॥
दुःख+साध्य+सुख+उच्छेदः दुःख+उच्छेद+वदिष्यते ।
नित्य+आनन्द+अनुभूतिः निर्गुणस्य न च इष्यते ॥७/११॥

The destruction of pleasure, which is (itself) achieved with pain, is as desirable as the destruction of pain (itself). The experience of eternal bliss cannot, moreover, be admitted in relation to the attributeless (soul) (11).

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
अन्य: सन्यासिनां मार्गो जाघटीति न कर्मिणाम् ॥७/१२॥
न बुद्धि+भेदं जनयेत् अ-ज्ञानां कर्म+सङ्गिनाम् ।
अन्य: सन्यासिनां मार्ग: जाघटीति न कर्मिणाम् ॥७/१२॥

One should not create a change of view in (the minds of) those ignorant persons who are attached to ritualistic works. The path to be adopted by those who have renounced the world is different, (and that) is not at all suited to those who are devoted to ritualistic works (12).

तस्माद्यागादयो धर्मा: कर्तव्या विहिता यत: ।
अन्यथा प्रत्यवाय: स्यात्कर्मण्येवाधिकारिणाम् ॥७/१३॥
तस्मात् याग+आदय: धर्मा: कर्तव्या: विहिता: यत: ।
अन्यथा प्रत्यवाय: स्यात् कर्मणि एव अधिकारिणाम् ॥७/१३॥

Therefore, considering that they are enjoined (in the scripture), sacrifice and other religious duties have (all) to be performed. Otherwise, the harm of sinfulness will befall those who are qualified only to live the life of ritualistic works (13).

कर्ममात्रैकशरणा: श्रेय: प्राप्स्यन्त्यनुत्तमम् ।
न देवता चतुर्थ्यन्तविनियोगादृते परा ॥७/१४॥
कर्म-मात्र+एक+शरणा: श्रेय: प्राप्स्यन्ति अन्-उत्तमम् ।
न देवता चतुर्थी+अन्त+विनियोगात् ऋते परा ॥७/१४॥

Those, who solely depend upon (such) works alone, will (also) attain unsurpassable good (in the end). There is (in fact) no superior deity other than what is aimed at by the use of the ending of the fourth (or dative) case (14).

वेदबाह्यान्निराकृत्य भट्टाचार्यैर्गते पथि ।
चक्रे प्रभाकर: शास्त्रं गुरु: कर्माधिकारिणाम् ॥७/१५॥
वेद+बाह्यान् निराकृत्य भट्टाचार्यै: गते पथि ।
चक्रे प्रभाकर: शास्त्रं गुरु: कर्म अधिकारिणाम् ॥७/१५॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे प्रभाकरपक्षो नाम सप्तमप्रकरणम् ॥

इति श्रीमत् शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे प्रभाकर+पक्ष: नाम सप्तम+प्रकरणम् ॥

On the lines laid down by his preceptor, Bhaṭṭa (Kumārila), this teacher Prabhākara has set at naught (all) those who (then) stood outside the pale of the Vedas, and promulgated (his) authoritative teaching in relation to those who are qualified (merely) for (the life of ritualistic) works (15).

**Thus ends the seventh chapter, known as the theory of Prabhākara, in the Sarva-darśana-siddhānta-saṅgraha, composed by the venerable Śaṅkarācārya.**

अथ भट्टाचार्यपक्षपकरणम् ॥८॥

बौद्धादिनास्तिकध्वस्त वेदमार्गं पुरा किल ।
भट्टाचार्यः कुमारांशः स्थापयामास भूतले ॥८/१॥
बौद्ध+आदि+न-आस्तिक+ध्वस्त+वेद+मार्गं पुरा किल ।
भट्ट+आचार्यः कुमार+अंशः स्थापयामास भू+तले ॥८/१॥

# CHAPTER VIII

## THE SYSTEM OF (KUMĀRILA) BHAṬṬĀCĀRYA

The great teacher Bhaṭṭa, who was a particular incarnation of Kumāra (the war-god), established well on earth the (religious) path of the Vedas, which had been in fact set at naught by the Bauddhas and other atheists in former times (01).

त्यक्त्वा काम्यनिषिद्धे द्वे विहिताचरणान्नरः ।
शुद्धान्तःकरणो ज्ञानी परं निर्वाणमृच्छति ॥८/२॥
त्यक्त्वा काम्य+निषिद्धे द्वे विहित+आचरणात् नरः ।
शुद्ध+अन्तःकरणः ज्ञानी परं निर्वाणम् ऋच्छति ॥८/२॥

On giving up both those (kinds of) works, which have (either) the attainment of particular desired objects in view, or are prohibited by the scripture, the wise man, whose mind is purified, attains the Absolution (निर्वाणम्) through performing such works as are ordained (in the scripture) (02).

काम्यकर्माणि कुर्वाणेः काम्यकर्मानुरूपतः ।
जनित्वैवोपभोक्तव्यं भूयः काम्यफलं नरैः ॥८/३॥

काम्य+कर्माणि कुर्वाणे: काम्य+कर्म+अनुरूप-त: ।
जनित्वा एव उपभोक्तव्यं भूय: काम्य+फलं नरै: ।।८/३।।

The results of the works, that have particular desired objects in view, have, in accordance with those (very) works having (such) specially desired objects in view, to be enjoyed only after being born again by (those) men who perform the works with specially desired objects in view (03).

कृमिकीटादिरूपेण जनित्वा तु निषिद्धकृत् ।
निषिद्धफलभोगी स्यादधोऽधो नरकं व्रजेत् ।।८/४।।
कृमि+ कीट+आदि+रूपेण जनित्वा तु निषिद्ध+ कृत् ।
निषिद्ध+फल+भोगी स्यात् अध: अध: नरकं व्रजेत् ।।८/४।।

(04 But he, who performs the works prohibited by the scripture, has, after being born in the form of worms, insects, etc., to enjoy the (bitter) fruits of forbidden works, and has to go lower and lower down into hell (03).

अतो विचार्य विज्ञेयौ धर्माधर्मौ विपश्चिता ।
चोदनैकप्रमाणौ तौ न प्रत्यक्षादिगोचरौ ।।८/५।।
अत: विचार्य विज्ञेयौ धर्म+अ-धर्मौ विपश्चिता ।
चोदना+एक+प्रमाणौ तौ न प्रत्यक्ष+ आदि+गोचरौ ।।८/५।।

Therefore, both duty and non-duty (धर्माधर्मौ) have to be (clearly) made out by the wise man after due enquiry. Both of them have scriptural injunction as their authoritative basis and do not fall within the scope of perception and such other (criteria of truth) (05).

विध्यर्थवादैर्मन्त्रैश्च नामधेयैश्चतुर्विध: ।
वेदो विधिप्रधानोऽयं धर्माधर्मावबोधक: ।।८/६।।
विधि+अर्थवादै: मन्त्रै: च नामधेयै: चतु:+विध: ।
वेद: विधि+प्रधान: अयं धर्म+अ-धर्म+अवबोधक: ।।८/६।।

The Vedas contain four different kinds (of topics), *viz.* mandatory injunctions (विधि), explanatory passages (अर्थवाद), sacrificial formulas (मन्त्र), and names (नामधेय). The Vedas have the mandatory injunctions

for their chief subject matter, and thus teach us (mainly) about duties and non-duties (06).

निवर्तकं निषिद्धाद्यत् पुसां धर्मप्रवर्तकम् ।
वाक्यं तच्चोदना वेदे लिङ्लोट्तव्यादिलाञ्छितम् ॥८/७॥
निवर्तकं निषिद्धात् यत् पुसां धर्म+प्रवर्तकम् ।
वाक्यं तत् चोदना वेदे लिङ्+लोट्+तव्य+ आदि+लाञ्छितम् ॥८/७॥

That (kind of) sentence in the Vedas happens to be a commandment which turns men from what is forbidden, or makes them become engaged in the performance of prescribed duties; and it is indicated by means of the potential mood, the imperative mood, the passive participles and other (similar verbal forms) (07).

निषिद्धनिन्दकं यत्तु विहितार्थप्रशंसकम् ।
वाक्यमत्रार्थवाद: स्याद्विध्यंशत्वात्प्रमाणकम् ॥८/८॥
निषिद्ध+निन्दकं यत् तु विहित+अर्थ+प्रशंसकम् ।
वाक्यम् अत्र अर्थ+वाद: स्यात् विधि+ अंशत्वात् प्रमाणकम् ॥८/८॥

Whatever sentence here (in the Vedas) censures forbidden things of praises such things as are enjoined - that is an arthavada: it has the force of an authoritative means of knowledge, for the reason that it forms as auxiliary part of injunctions (08).

कर्माङ्गभूता मन्त्रा: स्युरनुष्ठेयप्रकाशका: ।
यागादेर्नामभूतानि नामधेयानि हि श्रुतौ ॥८/९॥
कर्म+अङ्ग+भूता: मन्त्रा: स्यु: अनुष्ठेय+प्रकाशका: ।
याग+आदे: नाम+भूतानि नामधेयानि हि श्रुतौ ॥८/९॥

The sacrificial formulas are those constituent elements of rituals, which throw light on what has to be accomplished (through such works). Those things which happen to be the names of sacrifices, etc., in the Vedas, they are the names (नामधेय) in fact (09).

आत्मा ज्ञातव्य इत्यादिविधयस्त्वारुणेषु ये ।
बोधं विदधते ब्रह्मण्यात्मनां परमात्मनि ॥८/१०॥
आत्मा ज्ञातव्य: इति+आदि विधय:तु आरुणेषु ये ।
बोधं विदधते ब्रह्मणि आत्मनां परम+आत्मनि ॥८/१०॥

The injunction, "The Ātman (or Self) has to be known"- and other (similar injunctions) which are given in the Āruṇas (or Upaniṣads) enjoin on individual souls the knowledge relating to the Brahman who is he supreme Souls (10).

दूषयन्त्यनुमानाभ्यां बौद्धा वेदमपि स्फुटम् ।
तन्मूललब्धधर्मादेरपलापस्तु सिध्यति ।।८/११।।
दूषयन्ति अनुमानाभ्यां बौद्धाः वेदम् अपि स्फुटम् ।
तत्+मूल+लब्ध+धर्म+आदेः अपलापः तु सिध्यति ।।८/११।।

On the strength of the two (following) logical syllogisms, the Bauddhas distinctly find fault even with the Vedas: and the denial of the duties, etc., which are derived from those (Vedas themselves) as source, follows (thence) as a matter of course (11).

वेदोऽप्रमाणं वाक्यत्वाद्रथ्यापुरुषवाक्यवत् ।
अथानाप्तप्रणीतत्वादुन्मत्तानां यथा वचः ।।८/१२।।
वेदः अ-प्रमाणं वाक्यत्वात् रथ्या+पुरुष+वाक्य+वत् ।
अथ अन्-आप्त+प्रणीतत्वात् उन्मत्तानां यथा वचः ।।८/१२।।

(Firstly), the Vedas are no authoritative means of knowledge, because they possess the characteristics of spoken sentences (even) like he sentences of the man in the street. Again (they are not authoritative) because they are the productions of unwise and untrustworthy persons, like the speech of the insane (12).

तदयुक्तमिमौ हेतू भवेतामप्रयोजकौ ।
वाक्यत्वमात्राद्वेदस्य न भवत्यप्रमाणता ।।८/१३।।
तत् अ-युक्तम् इमौ हेतू भवेताम् अ-प्रयोजकौ ।
वाक्यत्व-मात्रात् वेदस्य न भवति अ-प्रमाणता ।।८/१३।।

This (argument) is not right: the two reasons given above are quite ineffective (here). Simply because they (the Vedas) happen to be (made up of) sentences, it does not follow that the Vedas have not the character of an authoritative means of knowledge (13).

अनाप्तपुरुषोक्तत्वं हेतुस्ते न प्रयोजकः ।
स्यादनाप्तोक्ततामात्रादप्रामाण्यं न च श्रुतेः ।।८/१४।।

अन्-आप्त+पुरुष+उक्तत्वं हेतुः ते न प्रयोजकः ।
स्यात् अन्-आप्त+उक्तता-मात्रात् अ-प्रामाण्यं न च श्रुतेः ॥८/१४॥

The (other) reason given by you, to the effect that they are composed by unwise and untrustworthy persons, is (also) useless (here). Want of authoritativeness (in relation to ordinary utterances) may well result from the mere fact of (their) having been uttered by an unwise and untrustworthy person. But it cannot be so in the case of revealed scriptures (14).

नित्यवेदस्य चानाप्तप्रणीतत्वं न दुष्यति ।
विप्रलम्भादयो दोषा विद्यन्ते पुङ्गिरा सदा ॥८/१५॥
नित्य+वेदस्य च अन्-आप्त+प्रणीतत्वं न दुष्यति ।
विप्रलम्भ+आदयः दोषाः विद्यन्ते पुं+ गिरा सदा ॥८/१५॥

The character of being produced by unwise and untrustworthy persons cannot (at all) become (associated as) a blemish with the eternal Vedas. In regard to human utterances, (however), there may always be the faults of deceitfulness, etc., (in association with them) (15).

वेदस्यापौरुषेयत्वाद्दोषाशङ्कैव नास्ति नः ।
वेदस्यापौरुषेयत्वं केचिन्नैयायिकादयः ॥८/१६॥
वेदस्य अ-पौरुषेयत्वात् दोष+आशङ्का एव न अस्ति नः ।
वेदस्य अ-पौरुषेयत्वं केचित् नैयायिक+ आदयः ॥८/१६॥
दूषयन्तीश्वरोक्तत्वान्मन्यमानाः प्रमाणताम् ।
पौरुषेयो भवेद्वेदो वाक्यत्वाद्भारतादिवत् ॥८/१७॥
दूषयन्ति ईश्वर+उक्तत्वात् मन्यमानाः प्रमाणताम् ।
पौरुषेयः भवेत् वेदः वाक्यत्वात् भारत+ आदि+वत् ॥८/१७॥
सर्वेश्वरप्रणीतत्वे प्रामाण्यमपि सुस्थितम् ।
प्रामाण्यं विद्यते नेति पौरुषेयेषु युज्यते ॥८/१८॥
सर्व+ईश्वर+प्रणीतत्वे प्रामाण्यम् अपि सुस्थितम् ।
प्रामाण्यं विद्यते न इति पौरुषेयेषु युज्यते ॥८/१८॥
वेदे वक्तुरभावाच्च तद्वार्तारपि सुदुर्लभा ।
वेदस्य नित्यता प्रोक्ता प्रामाण्येनोपयुज्यते ॥८/१९॥
वेदे वक्तुः अ-भावात् च तत्+वार्ता अपि सुदुर्लभा ।
वेदस्य नित्यता प्रोक्ता प्रामाण्येन उपयुज्यते ॥८/१९॥

As (we hold that) the Vedas are not personal productions, we have no suspicion of any faultiness whatsoever (in relation to them). A few Naiyāyikas and other, who believe in the authoritativeness (of the Vedas) on account of their having been given out by the Lord, take objection to the view that the Vedas do not possess the characteristics of personal productions, (and say) that the Vedas are to them of (divinely) personal origin, inasmuch as they possess the character of (being made up of) sentences like the Bhārata and other such works, and that (nevertheless) the authoritativeness (of the Vedas) is also well established in that they have been produced by the Lord of all. In regard to (all) works of personal origin, it is right to ask whether or not there is authoritativeness (in them). There being no speaker in respect of the (original productive utterance of the) Vedas, even such a talk (about authoritativeness) is impossible (in relation to them). The eternality which is predicated of the Vedas (by us) is (therefore) utilized to establish their authoritativeness (16-19).

सर्वेश्वरप्रणीतत्वं प्रामाण्यस्यैव कारणम् ।
तदयुक्तं प्रमाणेन केनात्रेश्वरकल्पना ॥८/२०॥
सर्व+ईश्वर+प्रणीतत्वं प्रामाण्यस्य एव कारणम् ।
तत् अ-युक्तं प्रमाणेन केन अत्र ईश्वर+ कल्पना ॥८/२०॥

(To hold) that the reason of the authoritativeness (of the Vedas) is (to be found) entirely in their being produced by the Lord of all - that is not right. With the help of which criterion of truth is the Lord in this connection assumed to exist (20)?

स यद्यागमकल्पः स्यान्नित्योऽनित्यः किमागमः ।
नित्यश्चेत्तं प्रतीशस्य केयं कर्तृत्वकल्पना ॥८/२१॥
सः यदि आगम+कल्पः स्यात् नित्यः अ-नित्यः किम् आगमः ।
नित्यः चेत् तं प्रति ईशस्य का इयं कर्तृत्व+कल्पना ॥८/२१॥

If He be so assumed with the aid of scripture, then (it is asked) whether the scripture is eternal or non-eternal. If it be eternal, then what is (the meaning of) this assumption of the agency of the Lord in regard to it (as a thing produced by Him) (21)?

अनित्यागमपक्षे स्यादन्योऽन्याश्रयदूषणम् ।
आगमस्य प्रमाणत्वमीश्वरोक्तत्वेश्वरस्ततः ॥८/२२॥

अ-नित्य+आगम+पक्षे स्यात् अन्य: अन्य+आश्रय+दूषणम् ।
आगमस्य प्रमाणत्वम् ईश्वर+उक्त्या ईश्वर: तत: ॥८/२२॥
आगमात्सिध्यतित्येवमन्योऽन्याश्रयदूषणम् ।
स्वत एव प्रमाणत्वमतो वेदस्य सुस्थितम् ॥८/२३॥
आगमात् सिध्यति इति एवम् अन्य:-अन्य+आश्रय+दूषणम् ।
स्व-त: एव प्रमाणत्वम् अत: वेदस्य सुस्थितम् ॥८/२३॥

In regard to the view (that the scripture is) non-eternal, there will arise the fallacy of reciprocal dependence. That the authoritativeness of the scripture is due to its being the language of the Lord, and that the Lord is (in His turn) established by means of that same scripture, is accordingly the fallacy of reciprocal dependence (here). Therefore, it is well established that the Vedas are possessed of authoritativeness altogether in themselves (22-23).

धर्माधर्मौ च वेदैकगोचरावित्यपि स्थितम् ।
ननु वेदं विना साक्षात्करामलकवत्स्फुटम् ॥८/२४॥
धर्म+अ-धर्मौ च वेद+एक+गोचरौ इति अपि स्थितम् ।
ननु वेदं विना स+अक्षात् कर+ आमलक+वत् स्फुटम् ॥८/२४॥
पश्यन्ति योगिनो धर्मं कथं वेदैकमानता ।
तदयुक्तं न योगी स्यादस्मदादिविलक्षण: ॥८/२५॥
पश्यन्ति योगिन: धर्मं कथं वेद+एक+मानता ।
तत् युक्तं न योगी स्यात् अस्मत्+ आदि+विलक्षण: ॥८/२५॥

Further, it is also (thus) established that (the teachings bearing upon) duty and non-duty fall entirely within the scope of the Vedas. It may, however, be objected (here) that, (even) without the Vedas, the Yogis perceive directly and clearly (what is) duty, in the manner of (other persons perceiving) the fruit of the emblic myrobalan when placed on the palm of the hand. How (then) can the Vedas be the sole source of authority (in relation to duty)? It is not right to say so (in objection), the Yogi cannot be different in nature from such as are like ourselves (24-25).

सोऽपि पञ्चेन्द्रियै: पश्यन् विषयं नातिरिच्यते ।
प्रत्यक्षमनुमानाख्यमुपमानमनन्तरम् ॥८/२६॥
स: अपि पञ्च+इन्द्रियै: पश्यन् विषयं न अतिरिच्यते ।
प्रत्यक्षम् अनुमान+आख्यम् उपमानम् अन् -अन्तरम् ॥८/२६॥

अर्थापत्तिरभावश्च न धर्मं बोधयन्ति वै ।
तत्तदिन्द्रिययोगेन वर्तमानार्थबोधकम् ॥८/२७॥
अर्थ+आपत्तिः अ-भावः च न धर्मं बोधयन्ति वै ।
तत्+तत् इन्द्रिय+योगेन वर्तमान+अर्थ +बोधकम् ॥८/२७॥
प्रत्यक्षं न हि गृह्णाति सोऽप्यतीतमनागतम् ।
धर्मेण नित्यसम्बन्धिरूपस्याभावतः क्वचित् ॥८/२८॥
प्रत्यक्षं न हि गृह्णाति सः अपि अतीतम् अन्-आगतम् ।
धर्मेण नित्य+सम्बन्धि+रूपस्य अ-भाव-तः क्वचित् ॥८/२८॥
नानुमानमपि व्यक्तं धर्माधर्मावबोधकम् ।
धर्मादिसदृशाभावादुपमानमपि क्वचित् ॥८/२९॥
न अनुमानम् अपि व्यक्तं धर्म+अ-धर्म अवबोधकम् ।
धर्म+आदि+सदृश+अ-भावत् उपमानम् अपि क्वचित् ॥८/२९॥
सादृश्यग्राहकं नैव धर्माधर्मावबोधकम् ।
सुखस्यकारणं धर्मो दुःखस्याधर्म इत्यपि ॥८/३०॥
सादृश्य+ग्राहकं न एव धर्म+अ-धर्म+अवबोधकम् ।
सुखस्य कारणं धर्मो दुःखस्य अ-धर्म इति अपि ॥८/३०॥
अर्थापत्त्यात्र सामान्यमात्रे ज्ञाते न दुष्यति ।
सामान्यमननुष्ठेयं किञ्चातीतं तदा भवेत् ॥८/३१॥
अर्थ+आपत्त्या अत्र सामान्य+मात्रे ज्ञाते न दुष्यति ।
सामान्यम् अन्-अनुष्ठेयं किं च अतीतं तदा भवेत् ॥८/३१॥

He also perceives objects with the help of the five senses and does not go beyond. Perception and what is called inference, and then comparison (or analogy), presumption from circumstances, and also the negative proof of non-perception -circumstances, (these) do not indeed teach duty. Perception, which gives rise to the knowledge of existing things by means of the contact of the several senses (with them), cannot surely apprehend that which has passed away or that which has not (yet) arrived. Owing to the non-existence of anything which has the character of being an invariable concomitant of duty, inference also does not evidently give rise to the knowledge of duty and non-duty. As there is nothing (at all) anywhere which resembles duty, etc., comparison (or analogy), which (only) apprehends similarities, cannot be the means of making out duty and non-duty. If, means of the evidence of circumstantial presumption, only a general

proposition arrived at to the effect that duty is the cause of pleasure and non-duty (the cause) of pain, there is nothing wrong (in it). (But) a general rule cannot be put into practice. Moreover, (such a rule) may then be found to be too late (in coming, when duty has to be actually judged by its result) (26-31).

यागादयो ह्यनुष्ठेया विशेषा विधिचोदिता: ।
अभावाख्यं प्रमाणं न पुण्यापुण्यप्रकाशकम् ॥८/३२॥
याग+आदय: हि अनुष्ठेया: विशेषा: विधि+चोदिता: ।
अ-भाव+आख्यं प्रमाणं न पुण्य+ अ-पुण्य+प्रकाशकम् ॥८/३२॥
प्रमाणपञ्चकाभावे तत् सदा वर्तते यत: ।
वेदैकगोचरौ तस्माद्धर्माधर्माविति स्थितम् ॥८/३३॥
प्रमाण+पञ्चक+अ-भावे तत् सदा वर्तते यत: ।
वेद+एक+गोचरौ तस्मात् धर्म+अ-धर्मौ इति स्थितम् ॥८/३३॥

Sacrifices, etc. are (all) to be adopted in practice, being the particular things enjoined by the mandatory injunctions (in the Vedas). The (negative) proof of non-perception cannot throw light on merit (as associated with duty) and no demerit (as associated with non-duty), because it is always in the absence of the (first) five means of knowledge that this (negative proof of non-perception) has scope to operate. Therefore, it is established that duty and non-duty fall exclusively within the scope (of the authority) of the Vedas (32-33).

वेदैकविहितं कर्म मोक्षदं नापरं तत: ।
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयो: ॥८/३४॥
वेद+एक+विहितं कर्म मोक्ष+दं न अ-परं तत: ।
मोक्ष+अर्थी न प्रवर्तेत तत्र काम्य+ निषिद्धयो: ॥८/३४॥

The work which is enjoined exclusively by the Vedas yields the Absolutuion, and none other than that (yields such deliverance). Therefore, one who is desirous of final deliverance, should not, in respect of this matter, be engaged (either) in those (activities) which have particular objects of desire in view or in those which are prohibited (by the Vedas) (34).

नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ।
आत्माज्ञातव्य इत्यादिविधिभि: प्रतिपादिते ॥८/३५॥

नित्य+नैमित्तिके कुर्यात् प्रत्यवाय+जिहासया ।
आत्मा+ज्ञातव्य: इति+आदि+ विधिभि: प्रतिपादिते ॥८/३५॥
जीवात्मनां प्रबोधस्तु जायते परमात्मनि ।
प्रत्याहारादिकं योगमभ्यस्यन्विहितक्रिय: ॥८/३६॥
जीव+आत्मनां प्रबोध: तु जायते परम+आत्मनि ।
प्रत्याहार+आदिकं योगम् अभ्यस्यन् विहित+क्रिय: ॥८/३६॥
मन:करणकेनात्मा प्रत्यक्षेणावसीयते ।
भिन्नाभिन्नात्मकस्त्वात्मा गोवत्सदसदात्मत: ॥८/३७॥
मन:+करणकेन आत्मा प्रत्यक्षेण अवसीयते ।
भिन्न+अ-भिन्न+आत्मक: तु आत्मा गो+वत् सत्+अ-सत्+आत्म-त: ॥
जीवरूपेण भिन्नोऽपि त्वभिन्न: पररूपत: ।
असत्स्याज्जीवरूपेण सद्रूप: पररूपत: ॥८/३८॥
जीव+रूपेण भिन्न: अपि तु अ-भिन्न: पर+रूप-त: ।
अ-सत् स्यात् जीव+रूपेण सत्+रूप: पर+रूप-त: ॥८/३८॥

One should perform the daily obligatory and the occasionally obligatory (works) with the object of avoiding the harm of sinfulness that will (otherwise) arise. In regard to the Supreme Self taught in (the scriptural injunction) - "The Self is certainly (capable of being) born in the individual selves. The Ātman (or Self) of him, who performs the works enjoined (in the scripture) and practices the Yoga consisting of the Sense-withdrawal (प्रत्याहार) and the other constituent elements, is (indeed) realised at last through direct perception (by him) with the aid of the (internal) organ of the mind as the instrument. The Self is both differentiated and undifferentiated, and is like the (conception of the) ox, (e.g.), both the real and unreal. Although (the Ātman is) differentiated when in the form of individual souls, yet He is undifferentiated as the Supreme (Soul) - is unreal in the form of individual selves and real in the form of the Supreme (Self) (35-38).

शाबलेयादि गोष्वेव यथा गोत्वं प्रतीयते ।
परमात्मा त्वनुस्यूतवृत्तिर्जीवेऽपि बुध्यताम् ॥८/३९॥
शाबलेय+आदि गोषु एव यथा गोत्वं प्रतीयते ।
परम+आत्मा तु अनुस्यूत+वृत्ति: जीवे अपि बुध्यताम् ॥८/३९॥

Just as the generic characteristics of the ox are made out only in relation to particular oxen characterized by the variegated color (and the other colors), so the Supreme Soul also has to be understood to exist as if continuously threaded through (all) the individual souls (39).

त्रैयम्बकादिभिर्मन्त्रैः पूज्यो ध्येयो मुमुक्षुभिः ।
ध्यात्वैवारोपिताकारं कैवल्यं सोऽधिगच्छति ॥८/४०॥
त्रैयम्बक+आदिभिः मन्त्रैः पूज्यः ध्येयः मुमुक्षुभिः ।
ध्यात्वा एव आरोपित+आकारं कैवल्यं सः अधिगच्छति ॥८/४०॥

By means of the *mantras* known as *traiyambaka*, etc., He is to be worshipped and meditated upon by all those who are desirous of Absolution (मुमुक्षुभिः). He (who thus worships and meditates upon God obtains the (blessed) condition of true self-abidance, even by meditating upon Him as possessed of (some) superimposed form (40).

परानन्दानुभूतिः स्यान्मोक्षे तु विषयादृते ।
विषयेषु विरक्ताः स्युर्नित्यानन्दानुभूतितः ।
गच्छन्त्यपुनरावृत्तिं मोक्षमेव मुमुक्षवः ॥८/४१॥
पर+आनन्द+अनुभूतिः स्यात् मोक्षे तु विषयात् ऋते ।
विषयेषु विरक्ताः स्युः नित्य+आनन्द +अनुभूति-तः ।
गच्छन्ति अ-पुनः आवृत्तिं मोक्षम् एव मुमुक्षवः ॥८/४१॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे भट्टाचार्यपक्षो नाम अष्टमं प्रकरणम् ।
इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे भट्टाचार्य+पक्षः नाम अष्टमं प्रकरणम् ।

In the state of Absolution, there occurs, (even) in the absence of the objects of the senses, the experience of the eternal bliss. Through the experience of eternal bliss, all those, who are desirous of Absolution, become freed from attachment to he objects of the senses, and reach that condition of Absolution (मोक्षमेव) from which there is no returning (to this world of *saṁsāra*) (41).

**Thus ends the eighth chapter, known as the system of Bhaṭṭācārya, in the Sarva- darsana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

Appendix 01

अथ साङ्ख्यपक्षप्रकरणम् ॥९॥

साङ्ख्यदर्शनसिद्धान्त: संक्षेपादथ कथ्यते ।
साङ्ख्यशास्त्रं द्विधाभूतं सेश्वरञ्च निरीश्वरम् ॥९/१॥
साङ्ख्य+दर्शन+सिद्धान्त: संक्षेपात् अथ कथ्यते ।
साङ्ख्य+शास्त्रं द्वि-धा+भूतं स+ईश्वरं च नि:+ईश्वरम् ॥९/१॥

# CHAPTER IX

## THE SYSTEM OF THE SĀṀKHYAS

Now the doctrines of the Sāṁkhya will be briefly described. The science of the Sāṁkhyas is of two kinds, namely, thiestical and non-theistical (01).

चक्रे निरीश्वरं साङ्ख्यं कपिलोऽन्यत्पतञ्जलि: ।
कपिलो वासुदेव: स्यादनन्त: स्यात्पतञ्जलि: ॥९/२॥
चक्रे नि:+ईश्वरं साङ्ख्यं कपिल: अन्यत् पतञ्जलि: ।
कपिल: वासुदेव: स्यात् अनन्त: स्यात् पतञ्जलि: ॥९/२॥

Kapila produced the non-theistical (Sāṁkhya) and Patañjali (produced) the other. Kapila is (the incarnation of) Vāsudeva (Viṣṇu), and Patañjali is (the incarnation of) Ananta (the divine serpent) (02).

ज्ञानेन मुक्तिं कपिलो योगेनाह पतञ्जलि: ।
योगी कपिलपक्षोक्तं तत्त्वज्ञानमपेक्षते ॥९/३॥
ज्ञानेन मुक्तिं कपिल: योगेन आह पतञ्जलि: ।
योगी कपिल+पक्ष+उक्तं तत्त्व+ज्ञानम् अपेक्षते ॥९/३॥

Kapila teaches that the Absolution (मुक्तिम्) results through knowledge, while Patañjali teaches (that it results) from Yoga (or practical application). A Yogi (however) stands in need of that knowledge of the ultimate principles which is given out in the system of Kapila (03).

श्रुतिस्मृतीतिहासेषु पुराणे भारतादिके ।
साङ्ख्योक्तं दृश्यतेस्पष्टं तथा शैवागमादिषु ॥९/४॥
श्रुति+स्मृति+इतिहासेषु पुराणे भारत+आदिके ।
साङ्ख्य+उक्तं दृश्यते स्पष्टं तथा शैव+आगम+आदिषु ॥९/४॥

## Appendix 01

In the Vedas, the Smṛtis, the Itihāsas, the Purāṇas the Mahābhārata, etc., and also in the scriptures of the *Śaiva*s and others, the teachings given in the Sāṁkhya (system) are clearly seen (to be adopted) (04).

व्यक्ताव्यक्तविवेकेन पुरुषस्यैव वेदनात्।
दुःखत्रयनिवृत्तिः स्यादेकान्तात्यान्ततो नृणाम्॥१/५॥
व्यक्त+अ-व्यक्त+विवेकेन पुरुषस्य एव वेदनात्।
दुःख+त्रय+निवृत्तिः स्यात् एक+ अन्त+अत्यान्त-तः नृणाम्॥१/५॥

From the discrimination of the manifest and the unmanifest, 'the knowledge of the the individual soul (पुरुष) itself results and through this (knowledge) there arises to men unfailingly the absolute cessation of the three miseries (05).

दुःखमाध्यात्मिकं चाधिभौतिकं चाधिदैविकम्।
आध्यात्मिकं मनोदुःखं व्याधयः पिटकादयः॥
आधिभौतिकदुःखं स्यात् कीटादिप्राणीसम्भवम्।
वर्षातपादिसम्भूतं दुःखं स्यादाधिदैविकम्॥१/६-७॥
दुःखम् आध्यात्मिकं च आधिभौतिकं च आधिदैविकम्।
आध्यात्मिकं मनः+दुःखं व्याधयः पिटक+आदयः।
आधिभौतिक+दुःखं स्यात् कीट+आदि+प्राणि+सम्भवम्।
वर्षा+आतप+आदि+ सम्भूतं दुःखं स्यात् आधिदैविकम्॥१/६-७॥

Misery is Mental pain and diseases (आध्यात्मिक), or Caused by animals (आधिभौतिक), or Caused by Fate (आधिदैविक). The *ādhyātmika* (misery) consists of metal pain and of diseases such boils, etc. the *ādhibhautika* misery is that which is caused by worms and other such living creatures. The *ādhidaivika* misery is that which is caused by rain, sun, etc. (06-07).

एकान्तात्यन्ततो दुःखं निवर्तेतात्मवेदनात्।
उपायान्तरतो मोक्षः क्षयातिशयसंयुतः॥१/८॥
एक+अन्त+अत्यन्त-तः दुःखं निवर्तेत् आत्म+वेदनात्।
उपाय+अन्तर-तः मोक्षः क्षय+अतिशय+संयुतः॥१/८॥

By means of the knowledge of the individual soul, all the miseries unfailingly and absolutely cease to be. The freedom which results (to the soul) from other means (than this knowledge of the Self) is subject to decadence and improvement (08).

न चौषधैर्न यागाद्यैः स्वर्गादिफलहेतुभिः ।
त्रैगुण्यविषयैर्मोक्षस्तत्त्वाज्ञानादृते परैः ॥९/९॥
न च औषधैः न याग+आद्यैः स्वर्ग+आदि+फल+हेतुभिः ।
त्रैगुण्य+विषयैः मोक्षः तत्त्व+ज्ञानात् ऋते परैः ॥९/९॥

Except by means of the knowledge of the ultimate principles, the Absolution (मोक्षः) cannot arise: (it cannot be produced) by any other means, such as medicinal and magical herbs, sacrifices, etc. which give rise to (the attainment of) heaven and other similar results, and (thus) fall within the scope of the three 'qualities' (of *sattva, rajas,* and *tamas*) (09).

पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तादिकानि यः ।
वेत्ति तस्यैव विस्पष्टमात्मज्ञानं भविष्यति ॥९/१०॥
पञ्च+विंशति+तत्त्वानि व्यक्त+अ-व्यक्त+आदिकानि यः ।
वेत्ति तस्य एव वि+स्पष्टम् आत्म+ज्ञानं भविष्यति ॥९/१०॥

To him alone, who knows he twenty-five principles consisting of the manifest, the unmanifest, etc. there comes the clear knowledge of the self (10).

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसेत् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र सशंयः ॥९/११॥
पञ्च+विंशति+तत्त्व-ज्ञः यत्र कुत्र आश्रमे वसेत् ।
जटी मुण्डी शिखी व अपि मुच्यते न अत्र सशंयः ॥९/११॥

He who knows the twenty-five principles may live in whatever estate of life (he likes). Whether he (happens to) be a person characterised by mattted hair or by shaven head or by locks of hair - (he) will obtain final freedom: there is no doubt about this (11).

पञ्चविंशतितत्त्वानि पुरुषः प्रकृतिर्महान् ।
अहङ्कारश्च शब्दश्च स्पर्शरूपरसास्तथा ॥९/१२॥

पञ्च+विंशति+तत्त्वानि पुरुष: प्रकृति: महान् ।
अहङ्कार: च शब्द: च स्पर्श+रूप+रसा: तथा ॥९/१२॥
गन्ध: श्रोत्रं त्वक्च चक्षुर्जिह्वा घ्राणश्च वागपि ।
पाणि: पादस्तथा पायुरुपस्थश्च मनस्तथा ॥९/१३॥
गन्ध: श्रोत्रं त्वक् च चक्षु: जिह्वा घ्राणं च वाक् अपि ।
पाणि: पाद: तथा पायु: उपस्थ: च मन: तथा ॥९/१३॥
पृथिव्यापस्तथा तेजो वायुराकाशमित्यपि ।
सृष्टिप्रकारं वक्ष्यामि तत्त्वात्मकमिदं जगत् ॥९/१४॥
पृथिवी आप: तथा तेज: वायु: आकाशम् इति अपि ।
सृष्टि+प्रकारं वक्ष्यामि तत्त्व+ आत्मकम् इदं जगत् ॥९/१४॥

The twenty-five principles are: Individual soul (पुरुष), Primordial Matter (प्रकृति), Cosmic intelligence (महत्), Egoity (अहङ्कार), similarly sound, touch color (or form), and taste, and smell, the ear the skin, the eye, the tongue, the nose and again speech, hands, feet, the anus (as the organ of evacuation), the organ of reproduction, and similarly mans (the faculty of attention), earth and water, light, air, and ether (*akasa*) also.

I shall now explain the manner of creation. This world is made up of the principles (now mentioned) (12-14).

सर्वं हि प्रकृते: कार्यं नित्यैका प्रकृतिर्जडा ।
प्रकृतेस्त्रिगुणावेशादुदासीनोऽपि कर्तृवत् ॥९/१५॥
सर्वं हि प्रकृते: कार्यं नित्या एका प्रकृति: जडा ।
प्रकृते: त्रि+गुणा+आवेशात् उदासीन: अपि कर्तृ+वत् ॥९/१५॥
स चेतनावत्तद्योगात्सर्ग: पङ्ग्वन्धयोगवत् ।
प्रकृतिर्गुणसाम्यं स्याद्गुणा: सत्वं रजस्तम: ॥९/१६॥
स: चेतना-वत् तत्+योगात् सर्ग: पङ्गु+अन्ध+योग+वत् ।
प्रकृति: गुण+साम्यं स्यात् गुणा: सत्वं रज: तम: ॥९/१६॥

Everything (in the world) is indeed product of the Primordial Matter. The Primordial Matter is eternal, one, and non-intelligent. Although he (the *ātman*) is passively indifferent, yet, being influenced by the three qualities of the Primordial Matter, he appears as if he were an agent (in the act of creation). Through the association (of Primordial matter) with that (*ātman*) possessed of consciousness,

there arises creation. (This is) like the association of a lame with a blind one (for mutual helpfulness). The Primordial Matter forms the equilibrium of the three qualities: the qualities are *sattva*, *raja*s, and *tama*s (15-16).

सत्त्वोदये सुखं प्रीति: शान्तिर्लज्जाङ्गलाघवम् ।
क्षमा धृतिरकार्पण्य दमो ज्ञानप्रकाशनम् ॥९/१७॥
सत्त्व+उदये सुखं प्रीति: शान्ति: लज्जा अङ्ग+लाघवम् ।
क्षमा धृति: अ-कार्पण्य दम: ज्ञान+प्रकाशनम् ॥९/१७॥

When *sattva,* raises, then (will there be born) pleasure, love, tranquility, modesty, lightness of body, patience and forgiveness, courage, magnanimity, restraint of the senses, and the illumination of knowledge (17).

रजोगुणोदये लोभ: सन्ताप: कोपविग्रहौ ।
अभिमानो मृषावाद: प्रवृत्तिर्दम्भ इत्यपि ॥९/१८॥
रज:+गुण:+उदये लोभ: सन्ताप: कोप+विग्रहौ ।
अभिमान: मृषा+वाद: प्रवृत्ति: दम्भ इति अपि ॥९/१८॥

When the quality of *raja*s raises, then (there will be born) covetousness, anguish, anger, quarrel, egotism, lying, worldly activity, and boastfulness also (18).

तमोगुणोदये तन्द्री मोहो निद्राङ्गगौरवम् ।
आलस्यमप्रबोधश्च प्रमादश्चैवमादय:॥९/१९॥
तम:+गुण:+उदये तन्द्री मोह: निद्रा अङ्ग+गौरवम् ।
आलस्यम् अ-प्रबोध: च प्रमाद: च एवम् आदय:॥९/१९॥

When quality of tamas raises, then (there will be born) drowsiness, stupidity, sleep, heaviness of body, laziness, ignorance, and carelessness, so forth (19).

व्यासाभिप्रेतसिद्धान्ते वक्ष्येऽहं भारते स्फुटम् ।
त्रैगुण्याविततिं सम्यग्विस्तरेण यथातथम् ॥९/२०॥
व्यास+अभिप्रेत+सिद्धान्ते वक्ष्ये अहं भारते स्फुटम् ।
त्रैगुण्य+विततिं सम्यक् विस्तरेण यथा+तथम् ॥९/२०॥

## Appendix 01

In connection with the system as thought out by Vyāsa in the Mahābhārata, I shall clearly describe well as they are, and at great length, (all) the details in respect of (these) three 'qualities' (20).

प्रकृते: स्यान्महांस्तस्मादहङ्कारस्ततोऽप्यभूत् ।
तन्मात्राख्यानि पञ्च स्यु: सूक्ष्मभूतानि तानि हि ।।९/२१।।
प्रकृते: स्यात् महान् तस्मात् अहङ्कार: तत: अपि अभूत् ।
तन्मात्र+आख्यानि पञ्च स्यु: सूक्ष्म+भूतानि तानि हि ।।९/२१।।

The Cosmic Intelligence (महत्) is produced out of the the Primordial Matter, and out of this (Cosmic Intelligence) the principle of egoity (अहङ्कार:). Out of this are produced the five (things) known as the rudimentary principles (तन्मात्राणि), they are indeed subtle elements (21).

वाक्पाणिपादसंज्ञानि पायूपस्थौ तथैव च ।
शब्द: स्पर्शस्तथा रूपं रसो गन्ध इतीरिता: ।।९/२२।।
वाक्+पाणि+पाद+संज्ञानि पायु+उपस्थौ तथा एव च ।
शब्द:स्पर्श:तथा रूपं रस: गन्ध: इति ईरिता: ।।९/२२।।
खं वाय्वग्न्यम्बुपृथ्व्य: स्यु: सूक्ष्मा एव न चापरे ।
पट: स्याच्छुक्लतन्तुभ्य: शुक्ल एव यथा तथा ।।९/२३।।
खं वायु+अग्नि+अम्बु+पृथ्व्य: स्यु: सूक्ष्मा: एव न च अ-परे ।
पट: स्यात् शुक्ल+ तन्तुभ्य: शुक्ल: एव यथा तथा ।।९/२३।।
त्रिगुणानुगुणं तस्मात्तत्त्वसृष्टिरपि त्रिधा ।
सत्त्वात्मकानि सृष्टानि तेभ्यो ज्ञानेन्द्रियाण्यथ ।।९/२४।।
त्रि+गुण+अनु+गुणं तस्मात् तत्त्व+सृष्टि: अपि त्रि-धा ।
सत्त्व+आत्मकानि सृष्टानि तेभ्य: ज्ञान+इन्द्रियाणि अथ ।।९/२४।।

From these are produced what are called speech, hands and feet, the anus (as the organ of evacuation), the organ of reproduction, and what are spoken of as sound, touch, and color (or form), and taste and smell, and also ether, air, fire, water and earth - only as they are in the subtle condition but not otherwise.

Just as a cloth, which is produced out of white threads, is purely white, so also the creation of the principles of nature is of three kinds in accordance with the three 'qualities' (of the Primordial Matter).

The things having the nature of the quality of *sattva* have been created (first); and then out of them have been produced the (various) organs of sense (22-24).

श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणमित्यत्र पञ्चकम् ।
तैः शब्दस्पर्शरूपाणि रसगन्धौ प्रवेत्त्यसौ ॥१/२५॥
श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणम् इति अत्र पञ्चकम् ।
तैः शब्द+स्पर्श+रूपाणि रस+ गन्धौ प्रवेत्ति असौ ॥१/२५॥

These (organs) are five (in number), *viz.*, the ear, the skin, the eye, the tongue and the nose. By means of these, he (i.e. पुरुष) perceives sound, touch, colour (or form), taste and smell (respectively) (25).

रजोगुणोद्भवानि स्युस्तेभ्यः कर्मेन्द्रियाण्यथ ।
वाक्पाणिपादसंज्ञानि पायूपस्थौ तथैव च ॥१/२६॥
रजः+गुण+उद्भवानि स्युः तेभ्यः कर्मेन्द्रियाणि अथ ।
वाक्+पाणि+पाद+संज्ञानि पायुः उपस्थौ तथा एव च ॥१/२६॥
वचनादानगमनविसर्गानन्दकर्म च ।
मनोऽन्तःकरणाख्यं स्यात् ज्ञेयमेकादशेन्द्रियम् ॥१/२७॥
वचन+आदान+गमन+विसर्ग+अनन्द+कर्म च ।
मनः अन्तः+करण+आख्यं स्यात् ज्ञेयम् एकादश+इन्द्रियम् ॥१/२७॥

(Then) there are those (things) which have been produced out of the quality of *raja*s, and out of them (have been derived) afterwards the organs of activity, consisting of what are known and (the organ of) speech, hands and feet, and the anus (as the organ of evacuation), and also the organ of reproduction; and similarly (are) also (derived) the activities of speaking, seizing, going, evacuating the bowels, and enjoying pleasure. The internal organ मनः has to be understood to be the eleventh organ (26-27).

तमोगुणोद्भवान्येभ्यो महाभूतानि जज्ञिरे ।
पृथिव्यापस्तथा तेजो वायुराकाश इत्यपि ॥१/२८॥
तमः+गुणः+उद्भवानि एभ्यः महा+भूतानि जज्ञिरे ।
पृथिवी आपः तथा तेजः वायुः आकाश इति अपि ॥१/२८॥

Out of other things, derived, from the quality of *tamas,* the elements *viz.* earth, water, light, and air and ether have been born (28).

पञ्चविंशतितत्त्वानि प्रोक्तान्येतानि वै मया ।
एतान्येव विशेषेण ज्ञातव्यानि गुरोर्मुखात् ॥१/२९॥
पञ्च+विंशति+तत्त्वानि प्रोक्तानि एतानि वै मया ।
एतानि एव विशेषेण ज्ञातव्यानि गुरो: मुखात् ॥१/२९॥

These are indeed the twenty-five principles that have been given out by me. These are the very (things) that have to be learnt in detail through the mouth of a preceptor (29).

आत्मान: प्रलये लीना: प्रकृतौ सूक्ष्मदेहिन: ।
गुणकर्मवशाद्ब्रह्मस्थावरान्तस्वरूपिण: ॥१/३०॥
आत्मान: प्रलये लीना: प्रकृतौ सूक्ष्म+देहिन: ।
गुण+कर्म+वशात् ब्रह्म+स्थावर+अन्त +स्वरूपिण: ॥१/३०॥

The souls (आत्मान:) are at the time of universal dissolution absorbed into the प्रकृति, (they) being (then) possessed of subtle bodies. Under the influence of the 'qualities' (of Primordial Matter) and their own karmas (or impressed results of works), they (the individual souls) assume various (physical) forms (beginning with) that of (the four-faced Brahama and ending with that of inanimate objects (30).

प्रकृतौ सूक्ष्मरूपेण स्थितमेवाखिलं जगत् ।
अभिव्यक्तं भवत्येव नासदुत्पत्तिरिष्यते ॥१/३१॥
प्रकृतौ सूक्ष्म+रूपेण स्थितम् एव अखिलं जगत् ।
अभिव्यक्तं भवति एव न अ-सत् उत्पत्ति: इष्यते ॥१/३१॥

In fact the whole of this world exists in a subtle form in the Primordial Matter (itself). It only becomes manifest (in creation). It is not desirable (to hold) that the production (of a entity) out of non-entity is (possible) (31).

असदुत्पत्तिपक्षे च शशशृङ्गादि सम्भवेत् ।
असत्तैलं तिलादौ चेत्सिकताभ्योऽपि तद्भवेत् ॥१/३२॥
अ-सत्+उत्पत्ति+पक्षे च शश+शृङ्ग+आदि सम्भवेत् ।
अ-सत् तैलं तिलादौ चेत् सिकताभ्य: अपि तत् भवेत् ॥१/३२॥

According to the view that (an entity) may be produced out of non-entity, things like the horns of a hare would also become possible (as entities). If the oil (produced out of sesame seeds) does not already exist in the sesame, then it must be possible to find it in sand and such other things also (32).

जनितं जनयेच्चेति यस्तु दोषस्त्वयेरितः ।
अभिव्यक्तिमते न स्यादभिव्यञ्जक कारणैः ॥१/३३॥
जनितं जनयेत् चेति यः तु दोषः त्वया ईरितः ।
अभिव्यक्ति+मते न स्यात् अभिव्यञ्जक+कारणैः ॥१/३३॥

The fault pointed out by you, that, (in this system), a produced effect has also to become a producer, cannot prove to be (fault at all) in relation to the view which maintains (creation to be a modified) manifestation (of what has been already in existence): because there are causes (here) which give rise to (such) manifestations (of modification) (33).

आत्मानो बहवः साध्या देहे देहे व्यवस्थिताः ।
एकश्चेद्युगपत्सर्वे म्रियेरन् सम्भवन्तु वा ॥१/३४॥
आत्मानः बहवः साध्या देहे देहे व्यवस्थिताः ।
एकः चेत् युगपत् सर्वे म्रियेरन् सम्भवन्तु वा ॥१/३४॥
पश्येयुर्युगपत्सर्वे पुंस्येकस्मिन् प्रपश्यति ।
अतः स्यादात्मनानात्वमद्वैतं नोपपद्यते ॥१/३५॥
पश्येयुः युगपत् सर्वे पुंसि एकस्मिन् प्रपश्यति ।
अतः स्यात् आत्म+नानात्वम् अद्वैतं न उपपद्यते ॥१/३५॥

Individual souls may be proved to exist in every one of the bodies (of all kinds of beings), and (they) are (thus) many in number. If (the soul of all beings) be (only) one, (then) all (beings) would have to die at the same time or be born (at the same time), (or) when one man saw (anything), all would have to see (that same thing) at that same time. Hence the multiplicity of souls follows (as a logical consequence), and (the idea of) non-duality (in regard to the *ātman*) is inappropriate (34-35).

आत्मा ज्ञातव्य इत्यादिविधिभि: प्रतिपादित: ।
निवृत्तिरूपधर्म: स्यान्मोक्षदोऽन्य: प्रवर्तक: ।।१/३६।।
आत्मा ज्ञातव्य इति+आदि+विधिभि: प्रतिपादित: ।
निवृत्ति+रूप+धर्म: स्यात् मोक्ष+द: अन्य: प्रवर्तक: ।।१/३६।।

The teaching, given in the scriptural injunction "The Self has to be known, etc." and in other similar injunctions, relates to such duties to turn (men) away from (worldly) activity, and bestows (on them) the final freedom of the soul. The other (kinds of prescribed duty) leads (men) to (worldly) activity (36).

अग्निष्टोमादयो यज्ञा: काम्या: स्युर्विहिता अपि ।
प्रवृतिधर्मास्ते ज्ञेया यत: पुंसां प्रवर्तका: ।।१/३७ ।।
अग्निष्टोम+आदय: यज्ञा: काम्या: स्यु: विहिता: अपि ।
प्रवृति+धर्मा: ते ज्ञेया: यत: पुंसां प्रवर्तका: ।।१/३७ ।।

Although the sacrifices, known as *Agniṣtoma*, are enjoined in the scripture, yet they are all intended for the attainment of (certain) desired objects. These (ritual works) have (all) to be understood to constitute the duties that appertain to active (worldly) life, inasmuch as they ample (men to live) the life of (worldly) activity (37).

धर्मेणोर्ध्वगति: पुंसामधर्मात्स्यादधोगति: ।
ज्ञानेनैवापवर्ग: स्यादज्ञानाद्बध्यते नर: ।।१/३८।।
धर्मेण ऊर्ध्व +गति: पुंसाम् अ-धर्मात् स्यात् अध: गति: ।
ज्ञानेन एव अपवर्ग: स्यात् अ-ज्ञानात् बध्यते नर: ।।१/३८।।

People rise aloft by means of (the righteousness of) duty. They go down by means of the (the unrighteousness of) non-duty. The Absolution (अपवर्ग:) results exclusively from knowledge. The man gets into the bondage (of *Saṁsāra*) through ignorance (38).

ब्रह्मापर्णतया यज्ञा: कृतास्ते मोक्षदा यदि ।
अयज्ञत्वप्रसङ्ग: स्यान्मन्त्रार्थस्यान्यथाकृते: ।।१/३९।।
ब्रह्म+अपर्ण तया यज्ञा: कृता: ते मोक्ष+दा: यदि ।
अ-यज्ञत्व+प्रसङ्ग: स्यात् मन्त्र+अर्थस्य अन्यथा+कृते: ।।१/३९।।

If the sacrifices which are performed as offerings unto the Brahman, give rise to the Absolution (मोक्ष), then it follows that they are not sacrifices at all for the reason that the meaning of the *mantra*s (to be used in them) is made (thus) into something other (than itself) (39).

तस्माद्यागादयो धर्माः संसारेषु प्रवर्तकाः ।
निषिद्धेभ्योऽपि कर्तव्याः पुंसां सम्पत्तिहेतवः ॥९/४०॥
तस्मात् याग+आदयः धर्माः संसारेषु प्रवर्तकाः ।
निषिद्धेभ्यः अपि कर्तव्याः पुंसां सम्पत्ति+हेतवः ॥९/४०॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे कपिलवासुदेवसाङ्ख्यपक्षो नाम नवमं प्रकरणम् ।

इति श्रीमत् शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे
कपिल+वासुदेव+साङ्ख्य+पक्षः नाम नवमं प्रकरणम् ।

Accordingly, sacrifices and other such duties lead (men) to the worldly existence (संसारेषु). (Still) such things as give rise to the prosperity of men have (often) to be accomplished even with the aid of uncommended means (40).

**Thus ends the ninth chapter, known as the Sāṁkhya system of Kapila Vāsudeva, in the Sarva-darśana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

अथ पतञ्जलिपक्षः ॥१०॥

अथ सेश्वरसाङ्ख्यस्य वक्ष्ये पक्षं पतञ्जलेः ।
पतञ्जलिरनन्तः स्याद्योगशास्त्रप्रवर्तकः ॥१०/१॥
अथ स+ईश्वर+साङ्ख्यस्य वक्ष्ये पक्षं पतञ्जलेः ।
पतञ्जलिः अनन्तः स्यात् योग+शास्त्र +प्रवर्तकः ॥१०/१॥

Appendix 01

# CHAPTER X

## THE SYSTEM OF PATAÑJALI

I shall now explain the system of Patañjali, which is the theistic Sāṁkhya. Patañjali is (the incarnation) Ananta (the divine serpant) is the promulgator of the science of Yoga (01).

पञ्चविंशतितत्त्वानि पुरुषं प्रकृते: परम् ।
जानतो योगसिद्धि: स्याद्योगाद्दोषक्षयो भवेत् ॥१०/२॥
पञ्च+विंशति+तत्त्वानि पुरुषं प्रकृते: परम् ।
जानत: योग+सिद्धि: स्यात् योगात् दोष+ क्षय: भवेत् ॥१०/२॥

One, who knows the twenty-five principles and the Lord (पुरुष:) beyond the *Prakṛti*, acquires perfection in Yoga, through Yoga the destruction of the evil is brought about (02).

पञ्चविंशतितत्त्वानि पुरुष: प्रकृतिर्महान् ।
अहङ्कारश्च तन्मात्रा विकाराश्चापि षोडश ॥१०/३॥
पञ्च+विंशति+तत्त्वानि पुरुष: प्रकृति: महान् ।
अहङ्कार: तन्मात्रा विकारा: च अपि षोडश ॥१०/३॥
महाभूतानि चेत्येतदृषिणैव सुविस्तृतम् ।
ज्ञानमात्रेण मुक्ति: स्यादित्यालस्यस्य लक्षणम् ॥१०/४॥
महा+भूतानि च इति एतत ऋषिणा एव सुविस्तृतम् ।
ज्ञान+मात्रेण मुक्ति: स्यात् इति आलस्यस्य लक्षणम् ॥१०/४॥

The twenty-five principles, *viz.*, the individual soul (पुरुष:), the Primordial Matter (प्रकृति), the Cosmic Intelligence (महत्), the Egoity (अहङ्कार:), the sixteen (principles) consisting of the rudimentary elemental principles with (their) modifications, also the (five) great elements - these have all been well explained by the great age (Kapila) himself. The view that the final emancipation of the soul results from pure (and simple) knowledge is indicative of mere laziness (03-04).

ज्ञानिनोऽपि भवत्येव दोषैर्बुद्धिभ्रम: क्वचित् ।
गुरूपदिष्टविद्यातो नष्टाविद्योऽपि पुरुष: ॥१०/५॥

ज्ञानिन: अपि भवति एव दोषै: बुद्धि+भ्रम: क्वचित् ।
गुरु+उपदिष्ट+विद्या-त: नष्ट+अ-विद्य: अपि पुरुष: ॥१०/५॥
देहदर्पणदोषांस्तु योगेनैव विनाशयेत् ।
सम्यग्ज्ञातो रसो यद्वद्गुडादेर्नानुभूयते ॥१०/६॥
देह+दर्पण+दोषान् तु योगेन एव विनाशयेत् ।
सम्यक्+ज्ञात: रस: यत्+वत् गुड+आदे: न अनुभूयते ॥१०/६॥
पित्तज्वरयुतैस्तस्माद्दोषानेव विनाशयेत् ।
गुरूपदिष्टविद्यस्य विरक्तस्य नरस्य तु ॥१०/७॥
पित्त+ज्वर+युतै: तस्मात् दोषान् एव विनाशयेत् ।
गुरु+उपदिष्ट+विद्यस्य विरक्तस्य नरस्य तु ॥१०/७॥
दोषक्षयकरस्तस्माद्योगादन्यो न विद्यते ।
अविद्योपात्तकर्तृत्वात्कामात्कर्माणि कुर्वते ॥१०/८॥
दोष+क्षय+कर: तस्मात् योगात् अन्य: न विद्यते ।
अ-विद्या उपात्त+कर्तृत्वात् कामात् कर्माणि कुर्वते ॥१०/८॥
तत: कर्मविपाकेन जात्यायुर्भोगसम्भव: ।
पञ्चक्लेशास्त्वविद्या च रागद्वेषौ तदुद्भवौ ॥१०/९॥
तत: कर्म+विपाकेन जाति+आयु: भोग+सम्भव: ।
पञ्च+क्लेशा: तु अविद्या च राग+ द्वेषौ तत्+उद्भवौ ॥१०/९॥
अस्मिताभिनिवेशौ च तत्राविद्यैव कारणम् ।
आत्मबुद्धिरविद्या स्यादनात्मनि कलेवरे ॥१०/१०॥
अस्मि-ता+अभिनिवेशौ च तत्र अ-विद्या एव कारणम् ।
आत्म+बुद्धि:अ-विद्या स्यात् अन्-आत्मनि कलेवरे ॥१०/१०॥

Even in the case of one who has acquired knowledge, mental misapprehension certainly occurs occasionally through errors. Although a person has his ignorance destroyed by means of the knowledge imparted to him by his preceptor, still it is only by means of Yoga that he can destroy that stain of evil well-known sweet taste of jaggery, etc., is not, for example, (actually) experienced by those who suffer from bilious fever. Therefore one should destroy (these) tainting evils (which cling to the body). There is nothing other than Yoga, which can accordingly destroy these evils appertaining to a man, who has acquired knowledge through the teachings of his preceptor, and has become free from attachment to (all) worldly objects of desire. (Men) do actions out of (selfish) desires, because of

(the idea of their own) agency (in relation to these actions) which is due to ignorance. Then, in consequence of the ripening of (their) actions (the impressed influence of works), there results (to them) birth, life, and enjoyment. The 05 afflictions and the ignorance, while desire and aversion are born out of it i.e. egoity. Ignorance is indeed the cause of all these (afflictions). Ignorance is the superimposition of the idea of the self on the body which is non-self (05-10).

पञ्चभूतात्मको देहो देही त्वात्मा ततोऽपर: ।
तज्जन्यपुत्रपौत्रादिसन्तानेऽपि ममत्वधी: ॥१०/११॥
पञ्च+भूत+आत्मक: देह: देही तु आत्मा तत: अ-पर: ।
तत्+जन्य+पुत्र+पौत्र+आदि+ सन्ताने अपि ममत्व+धी: ॥१०/११॥
अविद्या देहभोग्ये वा गृहक्षेत्रादिके तथा ।
नष्टाविद्योऽथ तन्मूलरागद्वेषादिवर्जित: ॥१०/१२॥
अ-विद्या देह+भोग्ये वा गृह+क्षेत्र+आदिके तथा ।
नष्ट+अ-विद्य: अथ तत्+मूल+राग +द्वेष+आदि+वर्जित: ॥१०/१२॥
मुक्तये योगमभ्यस्येदिहामुत्रफलास्पृह: ।
चित्तवृत्तिनिरोधे स्याद्योग: स्वस्मिन्नवस्थिति: ॥१०/१३॥
मुक्तये योगम् अभ्यस्येत् इह+अमुत्र+फल+अ-स्पृह: ।
चित्त+वृत्ति+निरोधे स्यात् योग: स्वस्मिन् अवस्थिति: ॥१०/१३॥

The body is made up of the five (great) elements (of nature). But the owner of the body is the self that is different from it. In regard to sons, grandsons, and such other progeny, which are all the offspring of that (body), as also in regard to the enjoyable objects of the body, such as houses, lands, etc., - the idea that they are all one's own is also ignorance. Therefore, after his ignorance is destroyed, and after he is freed from desire and aversion, which are due to that (ignorance), the person, who is not desirous of the fruits of works here (in this word) and there (in the other), should practice Yoga with the object of attaining the Absolution (मुक्तये). Yoga is that self-abidance (of the soul) which is consequent upon the suppression of the functionation of the thinking principle (11-13).

वृत्तयो नात्र वर्ण्यन्ते क्लिष्टाक्लिष्टविभेदिता: ।
क्रियायोगं प्रकुर्वीत साक्षाद्योगप्रवर्तकम् ॥१०/१४॥
वृत्तय: न अत्र वर्ण्यन्ते क्लिष्ट+अ-क्लिष्ट+विभेदिता: ।
क्रिया+योगं प्रकुर्वीत साक्षात् योग+प्रवर्तकम् ॥१०/१४॥

(These) functioning (of the thinking principle), which are differentiated into those which are associated with the 'afflictions', and those which are not (so) associated here. One should practise the Yoga of Application (क्रियायोगम्) leading directly to the discipline of Yoga (14).

क्रियायोगस्तपो मन्त्रजपो भक्तिर्दृढेश्वरे ।
क्लेशकर्मविपाकादिशून्य: सर्वज्ञ: ईश्वर: ॥१०/१५॥
क्रिया+योग: तप: मन्त्र+जप: भक्ति: दृढा ईश्वरे ।
क्लेश+कर्म+विपाक+आदि+शून्य: सर्व+ज्ञ: ईश्वर: ॥१०/१५॥

The Yoga of Application consists of penance, silent repetition of prayer-formulas, and firm devotion to the Lord (ईश्वरे). The Lord is free from the 'afflictions' and from the influence of the fructification of *karma* (operating as merit or demerit) and from other such things, and is (also) omniscient (at the same time) (15).

स कालेनानवच्छेदाद् ब्रह्मादीनां गुरुर्मत: ।
तद्वाचक: स्यात्प्रणवस्तज्जपो वाच्यभावनम् ॥१०/१६॥
स: कालेन अन्-अवच्छेदाद् ब्रह्म+आदीनां गुरु:+मत: ।
तत्+वाचक: स्यात् प्रणव: तत्+जप: वाच्य+भावनम् ॥१०/१६॥

Because He is not limited by time, (He) is considered to be superior to Brahmā and the other (gods). The mystict syllable Om (प्रणव:) is denotative of Him; and the silent repetition thereof (gives rise to) the mental comprehension of what is denoted by it (16).

योगान्तरायनाश: स्यात्तेन प्रत्यङ्मनो भवेत् ।
आलस्यं व्याधयस्तीव्रा: प्रमादस्त्यानसंशया: ॥१०/१७॥
योग+अन्तराय+नाश: स्यात् तेन प्रत्यक् मन: भवेत् ।
आलस्यं व्याधय: तीव्रा: प्रमाद+ स्त्यान+संशया: ॥१०/१७॥
अनवस्थितचित्तत्वमश्रद्धा भ्रान्तिदर्शनम् ।

दु:खानि दौर्मनस्यश्च विषयेषु च लोलता ॥१०/१८॥
अन्-अवस्थित+चित्तत्वम् अ-श्रद्धा भ्रान्ति+दर्शनम् ।
दु:खानि दौर्मनस्यं च विषयेषु च लोलता ॥१०/१८॥
श्वासप्रश्वासदोषौ च देहकम्पो निरङ्कुश: ।
इत्येवमादयो दोषा योगविघ्ना: स्वभावत: ॥१०/१९॥
श्वास+प्रश्वास+दोषौ च देह+कम्प: निरङ्कुश: ।
इति एवम् आदय: दोषा: योग+विघ्ना: स्वभाव-त: ॥१०/१९॥

The destruction of the obstacles to (the practice of Yoga takes place (in this manner), and thereby the mind becomes turned inwards (towards itself). Laziness, severe ailments, carelessness, languor, doubt, unsteadiness of mind, want of faith, deluded perception, pain, cheerlessness of mind, ardent attachment to the objects of the senses, defects appertaining to breathing in and to breathing out, unrestrainable shivering of the body - these and other similar evils form naturally the obstacles to Yoga (17-19).

ईश्वरप्रणिधानेन तस्माद्विघ्नान्विनाशयेत् ।
मैत्र्यादिभिर्मन:शुद्धिं कुर्याद्योगस्य साधनम् ॥१०/२०॥
ईश्वर+प्रणिधानेन तस्मात् विघ्नान् विनाशयेत् ।
मैत्री+आदिभि: मन:+शुद्धिं कुर्यात् योगस्य साधनम् ॥१०/२०॥

One should accordingly destroy the obstacles (to Yoga) by means of the earnest worship of the Lord. The purification of the mind, as a means for attaining success in Yoga, has to be accomplished through (the continued exercise of) friendliness and other such (suitable feelings) (20).

मैत्रीं कुर्यात्सुधीर्लोके करुणां दु:खिते जने ।
धर्मेऽनुमोदनं कुर्यादुपेक्षामेव पापिनाम् ॥१०/२१॥
मैत्रीं कुर्यात् सुधी: लोके करुणां दु:खिते जने ।
धर्मे अनुमोदनं कुर्यात् उपेक्षम् एव पापिनाम् ॥१०/२१॥

(The feeling of) friendliness should be exercised in relation to me of wisdom, and (that of) pity in relation to persons in distress. Pleased satisfaction should be shown in relation to righteousness, and indifference in relation to those that are sinful (21).

भगवत्क्षेत्रसेवा च सज्जनस्य च सङ्गतिः ।
भगवच्चरिताभ्यासो भावना प्रत्यगात्मनः ॥१०/२२॥
भगवत्+क्षेत्र+सेवा च सज्जनस्य च सङ्गतिः ।
भगवत्+चरित+अभ्यासः भावना प्रत्यक्+आत्मनः ॥१०/२२॥
इत्येवमादिभिर्यत्नैः संशुद्धं योगिनो मनः ।
शक्तं स्यादतिसूक्ष्माणां महतामपि भावने ॥१०/२३॥
इति+एवम् आदिभिः यत्नैः संशुद्धं योगिनः मनः ।
शक्तं स्यात् इति सूक्ष्माणां महताम् अपि भावने ॥१०/२३॥

Devotional service in holy places of pilgrimage, association with good people, repeated endeavour to live the life of the Lord, (the effort to arrive at) the metal comprehension of the inner soul - by means of these and other similar endeavour the mind of the Yogi (becomes) well purified, and is (then) enabled to conceive (correctly) the things which are very minute as also the things which are (very) big (22-23).

योगाङ्गकारणाद्दोषे नष्टे ज्ञानप्रकाशनम् ।
अष्टावङ्गानि योगस्य यमोऽथ नियमस्तथा ॥१०/२४॥
योग+अङ्ग+कारणात् दोषे नष्टे ज्ञान+प्रकाशनम् ।
अष्टौ अङ्गानि योगस्य यमः अथ नियमः तथा ॥१०/२४॥
आसनं पवनायामः प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येवं तानि विस्तरतो यथा ॥१०/२५॥
आसनं पवन+आयामः प्रत्याहारः अथ धारणा ।
ध्यानं समाधिः इति एवं तानि विस्तर-तः यथा ॥१०/२५॥

When that which is harmful is removed from what constitutes the instrument (for the practice) of the (various) constituent parts of Yoga, (then there arises) the illumination of knowledge. The constituents of Yoga are eight in number, *viz*. internal self-control, external regulation, bodily postures, control of the breath, withdrawal of the senses from outside objects, fixity of attention, meditative concentration, and attentive self-realization. They are (described) in detail thus (24-25): -

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।
यमा: पञ्च भवन्त्येते जात्याद्यनुगुणा मता: ॥१०/२६॥
अ-हिंसा सत्यम् अ-स्तेयं ब्रह्मचर्य+परिग्रहौ ।
यमा: पञ्च भवन्ति एते जाति+आदि+ अनुगुणा: मता: ॥१०/२६॥

Abstaining from (inflicting) injury, truthfulness, abstention from stealing, celibacy, and freedom from acquisitive covetousness—these are the five elements of internal selfcontrol, which are known to be in accordance with (one's) birth, etc. (26)

नियमा: शौचसन्तोषतपोमन्त्रेशसेवना: ।
यमस्य नियमस्यापि सिद्धौ वक्ष्ये फलानि च ॥१०/२७॥
नियमा: शौच+सन्तोष+तप:+मन्त्र+ईश+सेवना: ।
यमस्य नियमस्य अपि सिद्धौ वक्ष्ये फलानि च ॥१०/२७॥

The elements of external regulation are cleanliness, gladsome contentment, austerity, (repetition of) religious hymns (or mystical formulas), the worship of the Lord. Now, I shall describe the results of internal self control and of external regulation when they are successfully carried out (27).

अहिंसाया: फलं तस्य सन्निधौ वैरवर्जनम् ।
सत्यादमोघवाक्त्वं स्यादस्तेयाद्रत्नसङ्गति: ॥१०/२८॥
अ-हिंसाया: फलं तस्य सन्निधौ वैर+वर्जनम् ।
सत्यात् अ-मोघ+वाक्त्वं स्यात् अ-स्तेयात् रत्न+सङ्गति: ॥१०/२८॥

The result of abstaining from (all) injury is the abandonment of enmity near where he (who abstains from injury) happens to be. From truthfulness arises the non-vanity of language, and from abstention from stealing comes the acquisition of (all) gems (of value) (28).

ब्रह्मचर्याद्वीर्यलाभो जन्मधीरपरिग्रहात् ।
शौचात्स्वाङ्गेऽजुगुप्सा स्याद्दुर्जनस्पर्शवर्जनम् ॥१०/२९॥
ब्रह्मचर्यात् वीर्य+लाभ: जन्म+धी: अ-परिग्रहात् ।
शौचात् स्व+अङ्गे जुगुप्सा स्यात् दुर्जन+स्पर्श+वर्जनम् ॥१०/२९॥

From celibacy comes the acquisition of energy, and from the freedom from acquisitive covetousness there arises the knowledge of

(past) births. Cleanliness gives rise to the absence of disgust in connection with one's own body, as also to the avoidance of contact with wicked people (29).

सत्त्वशुद्धिः सौमनस्यमैकात्म्येन्द्रियवश्यते ।
आत्मदर्शनयोग्यत्वं मनःशौचफलं भवेत् ॥१०/३०॥
सत्त्व+शुद्धिः सौमनस्यम् ऐकात्म्य+इन्द्रिय+वश्यते ।
आत्म+दर्शन+योग्यत्वं मनः+शौच+फलं भवेत् ॥१०/३०॥

The results of mental purity are the purification of (the whole) constitution, good-minded-ness, singleness of purpose, subjugation of the senses, and fitness for self-realization (30).

अनुत्तमसुखावाप्तिः सन्तोषाद्योगिनो भवेत् ।
इन्द्रियाणाञ्च कायस्य सिद्धिः स्यात्तपसः फलम् ॥१०/३१॥
अन्-उत्तम+सुख+अवाप्तिः सन्तोषात् योगिनः भवेत् ।
इन्द्रियाणां च कायस्य सिद्धिः स्यात् तपसः फलम् ॥१०/३१॥

He Yogi obtains unsurpassable joy as the result of his gladsome contentment. The result of (the practice of) austerity is to endow the sense and the body with superior powers (31).

इन्द्रियस्य तु सिध्द्या स्याद्दूरालोकादिसम्भवः ।
कायसिध्द्याणिमादिः स्यात्तस्य दिव्यशरीरिणः ॥१०/३२॥
इन्द्रियस्य तु सिध्द्या स्याद् दूर+आलोक+आदि+सम्भवः ।
काय+सिद्धि+अणिमा+ आदिः स्यात् तस्य दिव्य+शरीरिणः ॥१०/३२॥

Therefore the endowment of the senses with superior powers, there arises the ability to see objects at a distance, etc. By means of the endowment of the body with superior powers, he, who has (thus come to possess) a divinely gifted body, acquires the (supra-normal) power of becoming as small as an atom and other such (powers) (32).

जपेन देवताकर्षः समाधिस्त्वीशसेवया ।
आसनं स्यात् स्थिरसुखं द्वन्द्वनाशस्ततो भवेत् ॥१०/३३॥
जपेन देवता+आकर्षः समाधिः तु ईश+सेवया ।
आसनं स्यात् स्थिर+सुखं द्वन्द्व+नाशः ततः भवेत् ॥१०/३३॥

Through the silent repetition of religious hymns (or mystical prayer-formulas), there results the attraction of the gods (towards the aspirant), and through the worship of the Lord, there arises Self-realization (समाधि:). That which is firm and agreeable if the (proper) posture (in all cases), thereby the destruction of the pairs of opposites (such as heat and cold, pain and pleasure, desire and aversion) takes place (33).

पद्मभद्रमयूराख्यैर्वीरस्वस्तिककुक्कुटै: ।
आसनैर्योगशास्त्रोक्तैरासितव्यश्च योगिभि: ॥१०/३४॥
पद्म+भद्र+मयूर+आख्यै: वीर+स्वस्तिक+कुक्कुटै: ।
आसनै: योग+शास्त्र+उक्तै: आसितव्यं च योगिभि: ॥१०/३४॥

The Yogis have to adopt in sitting the postures called padma, bhadra, and mayūra, as also the vīra, svastika, and kukkuṭa postures - which are all described in (works bearing on) the science of Yoga (34).

प्राणापाननिरोध: स्यात् प्राणायामस्त्रिधा हि स: ।
कर्तव्यो योगिना तेन रेचपूरककुम्भकै: ॥१०/३५॥
प्राण+अपान+निरोध: स्यात् प्राण+आयाम: त्रि-धा हि स: ।
कर्तव्य: योगिना तेन रेच+पूरक+कुम्भकै: ॥१०/३५॥

The control of breath consists in a regulated restraint (exercised) in relation to inspiration and expiration; it is in fact to be practiced by the (aspiring) Yogi in the three ways known as recaka, puraka, and kumbhaka (35).

रेचनाद्रेचको वायो: पूरणात्पूरको भवेत् ।
सम्पूर्णकुम्भवत्स्थानादचल: स तु कुम्भक: ॥१०/३६॥
रेचनात् रेचक: वायो: पूरणात् पूरक: भवेत् ।
सम्पूर्ण+कुम्भ+वत्+स्थानात् अ-चल: स: तु कुम्भक: ॥१०/३६॥

Recaka results from expelling the air that is within, puraka results from filling in (the lungs) with air, but kumbhka is (the condition) characterised by motionlessness (of air) owing to (it) being (then) as if in a well-filled pot (36).

प्राणायामश्चतुर्थः स्याद्रेचपूरककुम्भकान् ।
हित्वा निजस्थितिर्वायोरविद्यापापनाशिनी ॥१०/३७॥
प्राण+आयाम: चतुर्थ: स्यात् रेचक+पूरक+कुम्भकान् ।
हित्वा निज+स्थिति: वायो: अ-विद्या+पाप+नाशिनी ॥१०/३७॥

There is a fourth (kind of) breath-control, in which the air is its own (natural) condition, being dissociated from the *recaka*, *puraka* and *kumbhaka* (processes); this (state of the natural self-abidance of the breath) destroys the sins arising out of (one's) nescience (37).

इन्द्रियाणाञ्च चरतां विषयेभ्यो निवर्तनम् ।
प्रत्याहारो भवेत्तस्य फलमिन्द्रियवश्यता ॥१०/३८॥
इन्द्रियाणां च चरतां विषयेभ्य: निवर्तनम् ।
प्रत्याहार: भवेत् तस्य फलम् इन्द्रिय+वश्यता ॥१०/३८॥

The process of sense-withdrawal consists in drawing away the wandering senses from their objects; and the result of this (process) is the subjugation of the senses (38).

चित्तस्य देशबन्ध: स्याद्धारणा द्विविधा हि सा ।
देशबाह्यान्तरत्वेन बाह्य: स्यात्प्रतिमादिक: ॥१०/३९॥
चित्तस्य देश+बन्ध: स्यात् धारणा द्वि-विधा हि सा ।
देश+बाह्य+अन्तरत्वेन बाह्य: स्यात् प्रतिमा+आदिक: ॥१०/३९॥

Fixing the attention is the (process of) fixing the mind on some (object well defined in) space and it is in fact of two kinds, in consequence of (this defined) space being internal or external. The external (object defined in) space consists of images and such other things (39).

देशस्त्वाभ्यन्तरो ज्ञेयो नाभिचक्रहृदादिक: ।
चित्तस्य बन्धनं तत्र वृत्तिरेव न चापरम् ॥१०/४०॥
देश: तु आभ्यन्तर: ज्ञेय: नाभि+चक्र +हृद्+आदिक: ।
चित्तस्य बन्धनं तत्र वृत्ति: एव न च अ-परम् ॥१०/४०॥

The internal (object defined in) space consists of the circle of the navel, the heart, and so on. The fixing of the mind thereon is merely (directing) its existence (to be) there, (it is) nothing else (40).

नाभिचक्रादिदेशेषु प्रत्ययस्यैकतानता ।
ध्यानं समाधिस्तत्रैव त्वात्मनः शून्यवत्स्थितिः ॥१०/४१॥
नाभि+चक्र+आदि+देशेषु प्रत्ययस्य एकतानता ।
ध्यानं समाधिः तत्र एव तु आत्मनः शून्य+वत् स्थितिः ॥१०/४१॥

Meditative concentration (ध्यानम्) is a continued oneness of the idea (or conception in the mind) in relation to the circle of the navel or other such (objects in definite internal) positions. Self-realization (समाधिः), however, consists in the endurance of the soul in relation to those same (positions) in the manner of a thing that is emptied of all its contents (41).

धारणादित्रये त्वेकविषये पारिभाषिकी ।
संज्ञा संयम इत्येषा त्रयोच्चारणलाघवात् ॥१०/४२॥
धारणा+आदि+त्रये तु एक+विषये पारिभाषिकी ।
संज्ञा संयम इति एषा त्रय+उच्चारण+लाघवात् ॥१०/४२॥

In relation to the three (constituents of Yoga), beginning with the fixing of attention (धारणा) and looked upon as forming one topic (of description), there is, for the purpose of easily mentioning (all) three of them (at once) the technical name of samyama (42 ).

योगिनः संयमजयात् प्रज्ञालोकः प्रवर्तते ।
संयमः स तु कर्तव्यो विनियोगोऽत्र भूमिषु ॥१०/४३॥
योगिनः संयम+जयात् प्रज्ञा+लोकः प्रवर्तते ।
संयमः सः तु कर्तव्यः विनियोगः अत्र भूमिषु ॥१०/४३॥

By success in (the practice of) samyama, the expansion of the vision of wisdom takes place in the case of the Yogi. This samyama has indeed to practiced, and its practical utilization has to be in (accordance with) the following steps (43).

पञ्चभ्योऽपि यमादिभ्यो धारणादित्रयं भवेत् ।
अन्तरङ्गं हि निर्बीजसमाधिः स्यात्ततः परम् ॥१०/४४॥
पञ्चभ्यः अपि यम+आदिभ्यः धारणा+आदि+त्रयं भवेत् ।
अन्तरङ्गं हि निर्बीज+समाधिः स्यात् ततः परम् ॥१०/४४॥

The three (constituents of Yoga), beginning with the fixing of attention (धारणा), are indeed more essential (to the practice of Yoga) than the (remaining) five, beginning with internal self-control (yama). That self-realization (समाधि:), which is absolute and indefinable, is higher than these three (44).

अजित्वात्वपरां भूमिं नारोहेद्भूमिमुत्तराम् ।
अजित्वारोहणे भूमिर्योगिन: स्युरुपद्रवा: ॥१०/४५॥
अ-जित्वा तु अ-परां भूमिं न आरोहेत् भूमिम् उत्तराम् ।
अ-जित्वा आरोहणे भूमि: योगिन: स्यु: उपद्रवा: ॥१०/४५॥
हिक्काश्वासप्रतिश्यायकर्णदन्ताक्षिवेदना: ।
मूकताजडताकासशिरोरोगज्वरास्त्विति ॥१०/४६॥
हिक्का+श्वास+प्रतिश्याय+कर्ण+दन्त+अक्षि+वेदना: ।
मूकता+जडता+कास+शिर:+ रोग+ज्वरा: तु इति ॥१०/४६॥

Without winning success in (the practice of what happens to be) the lower step, one should not ascend to the higher (step). In ascending to the (higher) step without winning mastery (over the lower one), the Yogi will be prone to (suffer from) aliments, such as hiccough, hard breathing, catarrh, pain in the ears and teeth and eyes, dumbness, dullness, cough, headache and fever (45-46).

यस्येश्वरप्रसादेन योगो भवति तस्य तु ।
न रोगा: सम्भवन्त्येते येऽधरोत्तरभूमिजा: ॥१०/४७॥
यस्य+ईश्वर+प्रसादेन योग: भवति तस्य तु ।
न रोगा: सम्भवन्ति एते ये अधर+उत्तर+ भूमि+जा: ॥१०/४७॥

In relation to the person to whom (success in) Yoga comes through the grace of the Lord, these ailments born of the lower and the higher steps do not at all occur (47).

एक एवाखिलो धर्मो बाल्यकौमारयौवने: ।
वार्धकेन तु कालेन परिणामाद्विनश्यति ॥१०/४८॥
एक: एव अखिल: धर्म: बाल्य+कौमार+यौवने: ।
वार्धकेन तु कालेन परिणामात् विनश्यति ॥१०/४८॥

The whole (body) of (one's) attributes (dharma) is only one (as an integral whole): by undergoing modifications in the form of childhood, boyhood, youth, and old age, that (one and the same body of attributes), however, perishes in time (at last) (48).

पराग्भूतस्य यातीडापिङ्गलाभ्यामहर्निशम् ।
कालस्तं शमयेत्प्रत्यगभियातः सुषुम्नया ॥१०/४९॥
पराक्+भूतस्य याति इडा+पिङ्गलाभ्याम् अहः+निशम् ।
कालः तं शमयेत् प्रत्यक् अभियातः सुषुम्नया ॥१०/४९॥

In the case of a person, who has directed his mid outwards, time passes away by day and by night through the iḍā and piṅgalā. He, who has directed his mind inwards, has to affect the cessation of that (flow of time) with the help of the suṣumṇā (49).

मुक्तिमार्गः सुषुम्ना स्यात् कालस्तत्र हि वञ्चितः ।
चन्द्रादित्यात्मकः कालस्तयोर्मार्गद्वयं स्फुटम् ॥१०/५०॥
मुक्ति+ +मार्गः सुषुम्ना स्यात् कालः तत्र हि वञ्चितः ।
चन्द्र+आदित्य+आत्मकः कालः तयोः मार्ग+द्वयं स्फुटम् ॥१०/५०॥

The suṣumṇā is the path of liberation; time is indeed deceived therein Time consists of (what is determined with the aid of) the moon and the sun, their two paths are well known (50).

क्षीरात्समुद्धृतं त्याज्यं न पुनः क्षीरतां व्रजेत् ।
पृथक्कृतो गुणेभ्यस्तु भूयो नात्मा गुणी भवेत् ॥१०/५१॥
क्षीरात् समुद्धृतं तु आज्यं न पुनः क्षीरतां व्रजेत् ।
पृथक् कृतः गुणेभ्यः तु भूयः न आत्मा गुणी भवेत् ॥१०/५१॥

The clarified butter which is got out of milk cannot again assume the condition of milk. (Similarly), the the soul that has been separated from the 'qualities' cannot again become the possessor of 'qualities' (51).

यथा नीता रसेन्द्रेण धातवः शातकुम्भताम् ।
पुनरावृत्तये न स्युस्तद्वदात्मापि योगिनाम् ॥१०/५२॥
यथा नीताः रस+इन्द्रेण धातवः शातकुम्भताम् ।
पुनः+आवृत्तये न स्युः तत्+वत् आत्मा अपि योगिनाम् ॥१०/५२॥

Just as the metallic ores, that have been turned into gold by the philosopher's stone, cannot return to their former condition, so also the soul of the Yogis (cannot return to its pervious captive condition) (52).

नाडीचक्रगतिर्ज्ञेया योगमभ्यस्यतां सदा ।
सुषुम्ना मध्यवंशास्थिद्वारेणतु शिरोगता ॥१०/५३॥
नाडी+चक्र+गतिः ज्ञेया योगम् अभ्यस्यतां सदा ।
सुषुम्ना मध्य+वंश+अस्थि+द्वारेण तु शिरः+गता ॥१०/५३॥

Those who practice Yoga should always know the manner of arrangement of the system of blood-vessel-tubes. The suṣumṇā goes into the head through an opening in the central backbone (53).

इडा च पिङ्गला घ्राणप्रदेशे सव्यदक्षिणे ।
इडा चन्द्रस्य मार्गः स्यात्पिङ्गला तु रवेस्तथा ॥१०/५४॥
इडा च पिङ्गला घ्राण+प्रदेशे सव्य+दक्षिणे ।
इडा चन्द्रस्य मार्गः स्यात् पिङ्गला तु रवेः तथा ॥१०/५४॥

The iḍā and the piṅgalā are on the left and the right of the region of the nose, the iḍā is the path of the moon, and similarly the piṅgalā is the path of sun (54).

कुहूरधो गता लिङ्गं वृषणं पायुमप्यसौ ।
विश्वोदरा धारणा च सव्येतरकरौ क्रमात् ॥१०/५५॥
कुहूः अधः गता लिङ्गं वृषणं पायुम् अपि असौ ।
विश्व+उदरा धारणा च सव्य+इतर+ करौ क्रमात् ॥१०/५५॥

The kuhū is below, and goes to the genital organ and the testes and also to the anus, the viśvodarā and the dhāraṇa (go) respectively to the left and to the other (i.e., the right) hands (55).

सव्येतराङ्घ्री विज्ञेयौ हस्तिजिह्वायशस्विनी ।
सरस्वती तु जिह्वा स्यात् सुषुम्नापृष्ठानिर्गता ॥१०/५६॥
सव्य+इतर+अङ्घ्री विज्ञेयौ हस्ति+जिह्वा+यशस्विनी ।
सरस्वती तु जिह्वा स्यात् सुषुम्ना+पृष्ठ+निर्गता ॥१०/५६॥

The hasti-jihvā and the yaśasvnī are known to be (of) the left and of the other (i.e., the right) feet; the sarasvatī is (of) the tongue and starts from behind the suṣumṇā (56 ).

तत्पार्श्वयोः स्थितौ कर्णौ शङ्खिनी च पयस्विनी ।
गान्धारी सव्यनेत्रं स्यान्नेत्रं पूषा तु दक्षिणम् ॥१०/५७॥
तत्+पार्श्वयोः स्थितौ कर्णौ शङ्खिनी च पयस्विनी ।
गान्धारी सव्य+नेत्रं स्यात् नेत्रं पूषा तु दक्षिणम् ॥१०/५७॥

The saṁkhinī and the payasvinī are on the two sides of it, and are (of) the two ears, the gāṅdhārī is (of) the left eye, and the pūṣan is (of) the right eye (57).

ज्ञानकर्मेन्द्रियाणि स्युर्नाड्यः कण्ठाद्विनिःसृताः ।
नाड्यो हि योगिनां ज्ञेयाः सिरा एव न चापराः ॥१०/५८॥
ज्ञान+कर्म+इन्द्रियाणि स्युः नाड्यः कण्ठात् विनिःसृताः ।
नाड्यः हि योगिनां ज्ञेयाः सिराः एव न च अ-पराः ॥१०/५८॥

The blood-vessel-tubes proceeding from the neck are (those of) the organs of sense and activity. The Yogis have to understand (these) nāḍis to be (merely) the tubular vessels and nothing else (58).

प्राणादिवायुसञ्चारो नाडीष्वेव यथा तथा ।
ज्ञातव्यो योगशास्त्रेषु तद्व्यापारश्च दृश्यताम् ॥१०/५९॥
प्राण+आदि+वायु+सञ्चारः नाडीषु एव यथा तथा ।
ज्ञातव्यः योग+शास्त्रेषु तत्+ व्यापारः च दृश्यताम् ॥१०/५९॥

The movement of the principal vital air and of its other varieties, which takes place only in (these) tubular vessels, should be made out exactly as it is. The functions of those (various kinds vital air) have to be learnt from (works on) the science of Yoga (59).

योगी तु संयमस्थाने संयमात्सर्वविद्भवेत् ।
पूर्वजातिपरिज्ञानं संस्कारे संयमाद्भवेत् ॥१०/६०॥
योगी तु संयम+स्थाने संयमात् सर्व+वित् भवेत् ।
पूर्व+जाति+परिज्ञानं संस्कारे संयमात् वेत् ॥१०/६०॥

## Appendix 01

The Yogi becomes the knower of all things by practicing saṁyama in relation to suitably defined objects of by practicing control of mind (संयम:) in relation to the innate impressions (stored up in the mind), there arises the knowledge of former births (60).

हस्त्यादिनां बलानि स्युर्हस्त्यादिस्थानसंयमात् ।
मैत्र्यादि लभते योगी मैत्र्यादिस्थानसंयमात् ॥१०/६१॥
हस्ति+आदिनां बलानि स्यु: हस्ति+आदि+स्थान+संयमात् ।
मैत्री+आदि लभते योगी मैत्री+आदि+स्थान+संयमात् ॥१०/६१॥

By practicing saṁyama in relation to elephants and other such (objects) as defined in space, the strength of elephants and other like (animals) will result. The Yogi obtains (the feeling of) friendliness, etc. by practicing saṁyama in relation to friendliness and other such (objects of meditation) (61).

चन्द्रे स्यात्संयमात्तस्य तारकाव्यूहवेदनम् ।
ध्रुवेऽनागतविज्ञानं सूर्ये स्याद्भुवनेषु धी: ॥१०/६२॥
चन्द्रे स्यात् संयमात् तस्य तारका+व्यूह+वेदनम् ।
ध्रुवे अन्-आगत+विज्ञानं सूर्ये स्यात् भुवनेषु धी: ॥१०/६२॥

He will obtain the knowledge of (all) the constellations of stars by practicing saṁyama in relation to the moon. By practicing samyama in relation to the pole star, the knowledge of the future is the result; and from the saṁyama relating to the sun, there results the knowledge of (all) the words (62).

कायव्यूहपरिज्ञानं नाभिचक्रे तु संयमात् ।
क्षुत्पिपासानिवृत्ति: स्यात्कर्णकूपे तु संयमात् ॥१०/६३॥
काय+व्यूह+परिज्ञानं नाभि+चक्रे तु संयमात् ।
क्षुत्+पिपासा+निवृत्ति: स्यात् कर्ण+कूपे तु संयमात् ॥१०/६३॥

From the saṁyama relating to the circle of the navel, there arises the knowledge of the arrangements of the various parts in the construction of the body. And from the saṁyama relating to the cavity of the ear, the cessation of hunger and thirst results (63).

कर्णनाड्यां भवेत्स्थैर्यमर्थज्योतिषि सिद्धधीः ।
जिह्वाग्रे रससंवित्स्यान्नासाग्रे गन्धवेदनम् ॥१०/६४॥
कर्ण+नाड्यां भवेत् स्थैर्यम् अर्थ+ज्योतिषि सिद्ध+धीः ।
जिह्वा+अग्रे रस+संवित् स्यात् नासा+अग्रे गन्ध+वेदनम् ॥१०/६४॥

Steadiness results from (the saṁyama relating to) the nāḍi of the ear, and the knowledge of perfected beings (results) from (the saṁyama relating to) material light. From (the saṁyama relating to) the tip of the tongue, the consciousness of taste results, and (from that relating to) the tip of the nose the feeling of smell (results) (64).

अभ्यासादनिशं तस्माद्देहकान्तिः शुभाकृतिः ।
क्षुदादिविनिवृत्तिश्च जायते वत्सराद्यतः ॥१०/६५॥
अभ्यासात् अ-निशं तस्मात् देह+कान्तिः शुभ+आकृतिः ।
क्षुधा+आदि+विनिवृत्तिः च जायते वत्सरात् यतः ॥१०/६५॥
संवत्सरेण विविधा जायन्ते योगसिद्धयः ।
यथेष्टचरितं ज्ञानमतीताद्यर्थगोचरम् ॥१०/६६॥
संवत्सरेण विविधाः जायन्ते योग+सिद्धयः ।
यथा+इष्ट+चरितं ज्ञानम् अतीत+आदि+ अर्थ+गोचरम् ॥१०/६६॥
स्वदेहेन्द्रियसंशुद्धिर्जरामरणसंक्षयः ।
वैराग्येण निवृत्तिः स्यात्संसारे योगिनोऽचिरात् ॥१०/६७॥
स्व+देहे+इन्द्रिय+संशुद्धिः जरा+मरण+संक्षयः ।
वैराग्येण निवृत्तिः स्यात् संसारे योगिनः अ-चिरात् ॥१०/६७॥

By the constant practice (of Yoga), the color of the (Yogi's) body comes to be of a beautiful complexion. In the course of a year the cessation of hunger and thirst is also brought about, in as much as the various powers and perfections due to Yoga are produced (generally) in one year - such (powers and perfections) as moving about as one desires, the knowledge relating to things long past, &c., the purification of one's own body and senses, and the weakening (of the grip) of old age ad death. Soon after, with the aid of renunciation, freedom from the recurrence of re-births (संसार) results to the Yogi (65-67).

अणिमाद्यष्टकं तस्य योगसिद्धस्य जायते ।
तेन मुक्तिविरोधो न शिवस्येव यथा तथा ॥१०/६८॥
अणिमा+आदि+अष्टकं तस्य योग+सिद्धस्य जायते ।
तेन मुक्ति+विरोध: न शिवस्य एव यथा तथा ॥१०/६८॥

To the person, who has accomplished success in (the practice of) Yoga, comes the eight (extraordinary powers), beginning with (the power of) becoming as minute as an atom. As in the case of Śiva, so indeed (in his case) there can be, in consequence of this (acquisition of powers), no obstruction to the final freedom of the soul (68).

अणिमा लघिमा चैव महिमा प्राप्तिरीशता ।
प्राकाम्यश्च तथेशित्वं वशित्वं यत्र कामदम् ॥१०/६९॥
लघिमा च एव महिमा प्राप्ति: ईशता ।
प्राकाम्यं च तथा ईशित्वं वशित्वं यत्र कामदम् ॥१०/६९॥

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे
पतञ्जलि सेश्वरसाङ्ख्यपक्षो नाम दशमं प्रकरणम् ।

इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे
पतञ्जलि स+ईश्वर+साङ्ख्य+पक्ष: नाम दशमं प्रकरणम् ।

And among them (we have) the power of becoming extremely minute (अणिमा), the power of becoming extremely light (लघिमा), and similarly the power of becoming extremely great (महिमा), the power of reaching things anywhere and from anywhere (प्राप्ति), (the weightiness of) ruler-ship (isata), irresistible will (प्राक्राम्य), and similarly masterfulness (ईशित्व), and that power of subduing all things (वशित्व) which yields (to one all that one may) desire (69).

**Thus ends the tenth chapter, known as the system of Patañjali, the theistic Sāṁkhya, in the Sarva-darśana-siddhānta-saṅgraha composed by the venerable Śaṅkarācārya.**

Appendix 01

# CHAPTER XI

अथ वेदव्यासपक्षप्रकरणम् ॥११॥

## THE SYSTEM OF VEDAVYĀSA.

सर्वशास्त्राविरोधेन व्यासोक्तो भारते द्विजैः ।
गृह्यते साङ्ख्यपक्षाद्धि वेदसारोऽथ वैदिकैः ॥११/१॥
सर्व+शास्त्र+अ-विरोधेन व्यास+उक्तः भारते द्विजैः ।
गृह्यते साङ्ख्य+पक्षात् हि वेद+सारः अथ वैदिकैः ॥११/१॥

Now, the essence of the Vedas, which has been given out by Vyāsa in the Mahābhārata so as to be in agreement with all the Śāstras, is in fact derived from the system of the Sāṁkhyas by the believers in the Vedas (01).

पुरुषः प्रकृतिश्चेति द्वयात्मकमिदं जगत् ।
परः शयानस्तन्मात्रपुरे तु पुरुषः स्मृतः ॥११/२॥
पुरुषः प्रकृतिः च इति द्वय+आत्मकम् इदं जगत् ।
परः शयानः तन्मात्र+पुरे तु पुरुषः स्मृतः ॥११/२॥

This world is made up of two things, *viz.* the and the Primordial Matter. The higher (of these two), abiding in the 'city' made up of the rudimentary elemental principles, is held to be the Person (02).

तन्मात्राः सूक्ष्मभूतानि प्रायस्ते त्रिगुणाः स्मृताः ।
प्रकृतिर्गुणसाम्यं स्याद्गुणाः सत्वं रजस्तमः ॥११/३॥
तन्मात्राः सूक्ष्म+भूतानि प्रायः ते त्रि+गुणाः स्मृताः ।
प्रकृतिः गुण+साम्यं स्यात् गुणाः सत्वं रजः तमः ॥११/३॥

(These) rudimentary principles are (indeed) the elements in their subtle condition, and they are mostly held to be characterised by the three 'qualities' (of sattva, rajas and tamas). The Primordial Matter (denotes) the (condition of) equalization of (these) 'qualities'; and the qualities are sattva, rajas and tamas (03).

बन्धः पुंसो गुणावेशो मुक्तिर्गुणविवेकधीः ।
गुणस्वभावैरात्मा स्यादुत्तमो मध्यमोऽधमः ॥११/४॥
बन्धः पुंसः गुण+आवेशः मुक्तिः+गुण+विवेक+धीः ।
गुण+स्वभावैः आत्मा स्यात् उत्तमः मध्यमः अधमः ॥११/४॥

A man's bondage (in matter) is (his) happening to be swayed by the 'qualities', and his emancipation (from that bondage) is to know how to discriminate between (these) 'qualities'. According to the nature of the 'qualities' (which sway it), and *ātman* (or soul) is of the best, or of the middling, or of the worst kind (04).

उत्तमः सात्त्विकः श्लेष्मप्रकृतिस्स जलात्मकः ।
राजसो मध्यमो ह्यात्मा स पित्तप्रकृतिर्मतः ॥११/५॥
उत्तमः सात्त्विकः श्लेष्म+प्रकृतिः सः जल+आत्मकः ।
राजसः मध्यमः हि आत्मा सः पित्त+प्रकृतिः मतः ॥११/५॥
अधमस्तामसो वातप्रकृतिर्यत्तमो मरुत् ।
सत्त्वं शुक्लं रजो रक्तं धूम्रवर्णं तमो मतम् ॥११/६॥
अधमः तामसः वात+प्रकृतिःयत् तमः मरुत् ।
सत्त्वं शुक्लं रजः रक्तं धूम्र+वर्णं तमः मतम् ॥११/६॥

The best (*ātman*) is (that of) one who is endowed with the quality of sattva, and has a phlegmatic temperament and is of the nature of (the element of) water. The middling (variety of) ā*tman* is in fact he who is endowed with the quality of rajas, and he is known to be of a bilious temperament. The worst (*ātman*), who is endowed with the quality of tamas is of a rheumatic (or windy) temperament, for tamas is wind (looked upon as a humor of the body). The quality of sattva is (conceived to be) white (in color), the quality of rajas (to be) red, and the quality of tamas (to be) gray (or) black (05-06).

जलाग्निपवनात्मानः शुक्लरक्तासितास्ततः ।
तत्तदाकारचेष्टाद्यैर्लक्ष्यन्ते सात्त्विकादयः ॥११/७॥
जल+अग्नि+पवन+आत्मानः शुक्ल+रक्त+अ-सिताः ततः ।
तत्+तत्+आकार+चेष्टा+आद्यैः लक्ष्यन्ते सात्त्विक+आदयः ॥११/७॥

Therefore the persons endowed with the quality of sattva, and the others (endowed with the other qualities), have (respectively) the

nature of water, fire, and wind, and are white, red, and black (in colour). (They are) distinguished by means of their respective appearances, activities,etc. (07).

प्रियङ्गुदूर्वाशस्त्राब्जहेमवर्णः कफात्मकः ।
गूढास्थिबन्धः सुस्निग्धपृथुवक्षा बृहत्तनुः ॥११/८॥
प्रियङ्गु+दूर्वा+शस्त्र+अब्ज+हेम+वर्णः कफ+आत्मकः ।
गूढ+अस्थि+बन्धः सुस्निग्ध +पृथु+वक्षाः बृहत् तनुः ॥११/८॥

(The person characterised by the quality of sattva) has the color of priyangu or of the dūrva grass or of (shining) weapons of war or of lotuses or of gold, and is phlegmatic in temperament, the joints of his bones are invisible, he has a compact and broad chest, his body is big (and well grown) (08).

गम्भीरो मांसल सौम्यो गजगामी महामनाः ।
मृदङ्गनादो मेधावी दयालुः सत्यवागृजुः ॥११/९॥
गम्भीरः मांसल सौम्यः गज+गामी महा+मनाः ।
मृदङ्ग+नादः मेधावी दयालुः सत्य+ वाक् ऋजुः ॥११/९॥

He is deep (and dignified), muscular and handsome, and has the (steady) gait of the elephant; he is noble-minded, and his voice is like (the sound of) the tabor, he is intelligent, merciful, truthful in speech, and straightforward (09).

क्षुत्तृड्दुःखपरिक्लेशैरतप्तो धर्मतस्तथा ।
अनेकपुत्रभृत्याढ्यो भूरिशुक्लो रतिक्षमः ॥११/१०॥
क्षुत्+तृष्+दुःख+परिक्लेशैः अ-तप्तः धर्मतः तथा ।
अनेक+पुत्र+भृत्य+आढ्यः भूरि+ शुक्लः रति+क्षमः ॥११/१०॥

He is not (apt to be) trouble by the annoyances of petty griefs, and he is similarly (not troubled) by heart, he is abundantly blessed with many sons and servants, is possessed of great vital potency, and is capable of enjoying delightful pleasures (10).

धर्मात्मा मितभाषी च निष्ठुरं वक्तिन क्वचित् ।
बाल्येऽप्यरोदनोऽलोलो न बुभुक्षार्दितो भृशम् ॥११/११॥

धर्म+आत्मा मित+भाषी च निष्ठुरं वक्ति न कचित् ।
बाल्ये अपि अ-रोदन: अ-लोल: न बुभुक्षा अर्दित: भृशम् ॥११/११॥

He has a virtuous disposition, and is moderate in speech, in no case does he speaks harshly, even in boyhood, he happens to be free from crying (in consequen-ce of disappointment), and is unaffected by unsteady wishful-ness, he is never very much tormented by hunger (11).

भुङ्क्तेऽल्पं मधुरं कोष्णं तथापि बलवानसौ ।
अप्रतीकारतो वैरं चिरं गूढं वहत्यसौ ॥११/१२॥
भुङ्क्ते अल्पं मधुरं क+उष्णं तथा अपि बलवान् असौ ।
अ-प्रतीकार-त: वैरं चिरं गूढं वहति असौ ॥११/१२॥

He eats (generally) a small quantity of sweet and gently warm food, and yet he is strong; he inwardly puts up with enmities for long without retaliation (12).

धृतिर्बुद्धि: स्मृति: प्रीति: सुखं लज्जाङ्गलाघवम् ।
आनृण्यं समतारोग्यमकार्पण्यमचापलम् ॥११/१३॥
धृति: बुद्धि: स्मृति: प्रीति: सुखं लज्जा+अङ्ग+लाघवम् ।
आनृण्यं समता+आरोग्यम् अ-कार्पण्यम् अ-चापलम् ॥११/१३॥

Courage, intelligence, memory, love, happiness, modesty, agility of body, freedom from indebtedness, equanimity in behaviors, healthfulness, absence of mean-ness, steadiness of purpose (13).

इष्टापूर्तविशेषेणां क्रतूनामविकत्थनम् ।
दानेन चानुग्रहमस्पृहा च परार्थत: ॥११/१४॥
इष्टापूर्त+विशेषेणां क्रतूनाम् अ-विकत्थनम् ।
दानेन च अनुग्रहम् अ-स्पृहा च पर+ अर्थ-त: ॥११/१४॥

Not (being prone) to indulge in boastful talk about pious deeds done in response to religion and charity, bestowing favors by the giving of gifts, and freedom from covetousness in relation to the wealth of others (14).

सर्वभूतदया चेति गुणैर्ज्ञेयोऽत्र सात्त्विकः ।
रजोगुणपरिच्छेद्यो राजसोऽत्र यथा जनः ॥११/१५॥
सर्व+भूत+दया च इति गुणैः ज्ञेयः अत्र सात्त्विकः ।
रजः+गुण+परिच्छेद्यः राजसः अत्र यथा जनः ॥११/१५॥

And mercy for all beings - it is by means of these attributes that he who is characterised by sattva has to be diagnosed here (in this world). The man who is characterised by rajas has to be distinguished here similarly by the attributes that appertain to rajas (15).

रजः पित्तं तदेवाग्निस्तत्पित्तजस्तु वा ।
तीव्रतृष्णो बुभुक्षार्तः पैत्तिकोऽमितभोजनः ॥११/१६॥
रजः पित्तं तत् एव अग्निः तत्+पित्त+जः तु वा ।
तीव्र+तृष्णः बुभुक्षा+आर्तः पैत्तिकः अ-मित+भोजनः ॥११/१६॥

Rajas is bile and that is fire itself; or perhaps (this) here is the product of that bile. The (rajas) man of bilious temperament is characterised by unbearable thirst and is (much) troubled by hunger. He is given to unlimited eating (16).

पिङ्गकेशोऽल्परोमा च ताम्रवक्त्राङ्घ्रिहस्तकः ।
धर्मासहिष्णुरुष्णाङ्ग स्वेदनः पूतिगन्धयुक् ॥११/१७॥
पिङ्ग+केशः अल्प+रोमा च ताम्र+वक्त्र+अङ्घ्रि+हस्तकः ।
धर्म+अ-सहिष्णुः उष्ण+ अङ्ग स्वेदनः पूति+गन्ध+युक् ॥११/१७॥

The hair (on his head) is brown, and he has few hairs (on the body), his face and feet and hands are ruddy: he cannot bear heat - and has a warm body, he perspires freely, and is possessed of an offensive smell (17).

स्वस्थो विरेचनादेवं मृदुकोष्ठोऽतिकोपनः ।
शूरः सुचरितो मानी क्लेशभीरुश्च पण्डितः ॥११/१८॥
स्वस्थः विरेचनात् एवं मृदु+कोष्ठः अति-कोपनः ।
शूरः सु-चरितः मानी क्लेश+भीरुः च पण्डितः ॥११/१८॥

He becomes healthy through the clearings of bowels, and thus the possessor of a soft abandon, he is apt to become very angry, and

proves to be a hero of excellent bearing and of (high) self-respect, he is in dread of distress, and is endowed with (great) earning (18).

माल्यानुलेपनादीच्छुरतिस्वस्थोज्ज्वलाकृतिः ।
अल्पशुक्लोऽल्पकामश्च कामिनीनामनीप्सितः ॥११/१९॥
माल्य+अनुलेपन+आदि+इच्छुः अति-स्वस्थ+उज्ज्वल+आकृतिः ।
अल्प+शुक्लः अल्प+कामः च कामिनीनाम् अन्-ईप्सितः ॥११/१९॥

He is fond of flower-garlands and fragrant unguents, etc., and has a very happy and bright appearance, he has (comparatively) small vital potency, and his carnal desires are very limited; he is not a loved favorite with women (19).

बाल्येऽपि पलितं धत्ते रक्तरोमाथ नीलिकाम् ।
बली साहसिको भोगी सम्प्राप्तविभवः सदा ॥११/२०॥
बाल्ये अपि पलितं धत्ते रक्त+रोमा+अथ नीलिकाम् ।
बली साहसिकः भोगी सम्प्राप्त+ विभवः सदा ॥११/२०॥

Even in boyhood, he puts on gray hairs, (or) having red hairs, hebecomes subject to the eye affection (called) *nīlikā*, he is physically strong, enterprising, given to enjoyments, and is always in possession of wealth and greatness (20).

भुङ्क्तेऽतिमधुरं चार्द्रं भक्ष्यं कट्वम्लनिः स्पृहः ।
नात्युष्णभोजी पानीयमन्तरा प्रचुरं पिबन् ॥११/२१॥
भुङ्क्ते अति-मधुरं च आर्द्रं भक्ष्यं कटु+अम्ल+निः-स्पृहः ।
न अति-उष्ण+भोजी पानीयम् अन्तरा प्रचुरं पिबन् ॥११/२१॥

He always eats such food as is sweet and fresh, he has no liking for what is pungent and sour, he takes food which is not very hot, drinking much water while (doing so) (21).

नेत्रं चात्यल्पपक्ष्मास्य भवेच्छीतजलप्रियः ।
कोपेनार्काभितापेन रागमाशु प्रयाति च ॥११/२२॥
नेत्रं च अति-अल्प+पक्ष्मा अस्य भवेत् शीत+जल+प्रियः ।
कोपेन अर्क+अभितापेन रागम् आशु प्रयाति च ॥११/२२॥

His eyes have very thin and scanty eye-ashes, and he is apt to be fond of cold water; through anger and through the heat of the sun, he becomes quickly reddened in color (22).

अत्यागित्वमकारुण्यं सुखदु:खोपसेवनम् ।
अहङ्कारादसत्कारश्चिन्ता वैरोपसेवनम् ॥११/२३॥
अ-त्यागित्वम् अ-कारुण्यं सुख+दु:ख+उपसेवनम् ।
अहङ्कारात् अ-सत्कार: चिन्ता वैर+उपसेवनम् ॥११/२३॥
परभार्यापहरणं ह्रीनाशोऽनार्जवन्त्विति ।
राजसस्य गुणा: प्रोक्तास्तामसस्य गुणा यथा ॥११/२४॥
पर+भार्या+अपहरणं ह्री+नाश: अन्-आर्जवं तु इति ।
राजसस्य गुणा: प्रोक्ता: तामसस्य गुणा: यथा ॥११/२४॥

Illiberality, unmerciful-ness, enjoyments based upon pleasure and pain, disregard of others out of personal pride, anxiety, cherishing enmity, taking away another's wife, shamelessness, and hypocrisy - these are said to be the attributes of him who is characterised by rajas. And the attributes of the person characterised by tamas are as follow (23-24):

अधर्मस्तामसो ज्ञेयस्तामसो वातिको जन: ।
अधन्यो मत्सरी चोर: प्राकृतो नास्तिको भृशम् ॥११/२५॥
अ-धर्म: तामस: ज्ञेय: तामस: वातिक: जन: ।
अधन्य: मत्सरी चोर: प्राकृत: नास्तिक: भृशम् ॥११/२५॥

It must be understood that unrighteousness is the outcome of tamas, and the person characterised by tamas is dominated by (the humor of) wind. He is wretched, envious, he is a thief, is unrefined, and firmly atheistic (25).

दीर्घस्फुटितकेशान्त: कृश: कृष्णोऽतिलोमश: ।
अस्निग्धविरलस्थूलदन्तो धूसरविग्रह: ॥११/२६॥
दीर्घ+स्फुटित+केश+अन्त: कृश: कृष्ण: अति-लोमश: ।
अ-स्निग्ध+विरल+स्थूल+ दन्त: धूसर+विग्रह: ॥११/२६॥

The ends of his hairs are split to a length, he is lean, black and very hairy, his teeth are rough, incompactly set, and thick, and his body is gray with dust (26).

चञ्चलास्य धृतिर्बुद्धिश्चेष्टा दृष्टिर्गतिः स्मृतिः ।
सौहार्दमस्थिरं तस्य प्रलापोऽसङ्गतस्सदा ॥११/२७॥
चञ्चला अस्य धृतिः बुद्धिः चेष्टा दृष्टिः गतिः स्मृतिः ।
सौहार्दम् अ-स्थिरं तस्य प्रलापः अ-सङ्गतः सदा ॥११/२७॥

His courage, intellect, activity, eye-sight, movement and memory are (all) unsteady, his friendship is unenduring, and his talk is always incoherent (27).

बह्वाशी मृगयाशीलो मलिष्ठः कलहप्रियः ।
शीतासहिष्णुश्चपलो दोषधीर्जर्जरस्वरः ॥११/२८॥
बहु आशी मृगया+शीलः मलिष्ठः कलह+प्रियः ।
शीत+अ-सहिष्णुः चपलः दोष+धीः जर्जर+स्वरः ॥११/२८॥

He is a gourmand, is addicted to hunting, and is full of dirt and fond of quarrels, he is incapable of bearing cold, is fickle-minded and fault-finding, and has a rough (broken) voice (28).

सन्नासक्तचलालापो गीतवाद्यरतः सदा ।
मधुरात्युष्णभोजी च भक्ष्यपक्वाम्लसस्पृहः ॥११/२९॥
सन्न+सक्त+चल+आलापः गीत+वाद्य+रतः सदा ।
मधुर+अति-उष्ण+भोजी च भक्ष्य+पक्व+अम्ल+सस्पृहः ॥११/२९॥

His changeful talk (ever) relates to what is near at hand and he is always given to take delight in music and musical instruments; he enjoys sweets and other such things, and is (also) fond of well-cooked and sour eatables (29).

अल्पपित्तकफः प्रेक्ष्योऽस्वल्पनिद्रोऽल्पजीवनः ।
एवमादिगुणैर्ज्ञेयस्तामसो वातिको जनः ॥११/३०॥
अल्प+पित्त+कफः प्रेक्ष्यः स-अल्प+निद्रः अल्प+जीवनः ।
एवम् आदि+गुणैः ज्ञेयः तामसः वातिकः जनः ॥११/३०॥

He is seen to be possessed of very little bile and phlegm, he sleeps much and lives with the aid of scanty livelihood. By means of these and other similar characteristics, the tamas person, who is (as such) affected with wind (as a humor of the body), has to be diagnosed (30).

पञ्चभूतगुणान्वक्ष्ये त्रैगुण्यान्नातिभेदिन: ।
जङ्गमानाञ्च सर्वेषां शरीरे पञ्च धातव: ।
प्रत्येकश: प्रभिद्यन्ते यै: शरीरं विचेष्टते ॥११/३१॥
पञ्च+भूत+गुणान् वक्ष्ये त्रैगुण्यात् न अति-भेदिन: ।
जङ्गमानां च सर्वेषां शरीरे पञ्च धातव: ।
प्रत्येक-श: प्रभिद्यन्ते यै: शरीरं विचेष्टते ॥११/३१॥
त्वक् च मांसं तथास्थीनि मज्जा स्नायुश्च पञ्चम: ।
इत्येतदिह संख्यातं शरीरे पृथिवीमयम् ॥११/३२॥
त्वक् च मांसं तथा अस्थीनि मज्जा स्नायु: पञ्चम: ।
इति एतत् इह संख्यातं शरीरे पृथिवी-मयम् ॥११/३२॥
तेजोऽग्नितस्तथा क्रोधश्चक्षुरूष्मा तथैव च ।
अग्निर्जरयते चापि पञ्चाग्नेया: शरीरिणाम् ॥११/३३॥
तेज: अग्नित: तथा क्रोध: चक्षु: उष्मा तथा एव च ।
अग्नि: जरयते च अपि पञ्च+ आग्नेया: शरीरिणाम् ॥११/३३॥
श्रोत्रं घ्राणमथास्यञ्च हृदयं कोष्ठमेव च ।
आकाशात्प्राणिनामेते शरीरे पञ्च धातव: ॥११/३४॥
श्रोत्रं घ्राणम् अथ आस्यं च हृदयं कोष्ठम् एव च ।
आकाशात् प्राणिनाम् एते शरीरे पञ्च धातव: ॥११/३४॥
श्लेष्मा पित्तमथ स्वेदो वसा शोणितमेव च ।
इत्याप: पञ्चधा देहे भवन्ति प्राणिनां सदा ॥११/३५॥
श्लेष्मा पित्तम् अथ स्वेद: वसा शोणितम् एव च ।
इति आप: पञ्च-धा देहे भवन्ति प्राणिनां सदा ॥११/३५॥
प्राणात्प्राणयते देही व्यानाद्व्यायच्छते सदा ।
गच्छत्यपानोऽर्वाक् चैव समानो हृद्यवस्थित: ॥११/३६॥
प्राणात् प्राणयते देही व्यानात् व्यायच्छते सदा ।
गच्छति अपान: अर्वाक् च एव समान: हृदि अवस्थित: ॥११/३६॥

उदानादुच्छ्वसिति च वृत्तिभेदाश्च भाषते ।
इत्येते वायवः पञ्च चेष्टयन्तीह देहिनः ॥११/३७॥
उदानात् उच्छ्वसिति च वृत्ति+भेदाः च भाषते ।
इति एते वायवः पञ्च चेष्टयन्ति इह देहिनः ॥११/३७॥

I shall now describe the characteristics of the five elements, which (characteristics) do not differ very much from the three qualities (of sattva, rajas and tamas).

In the body of all moveable beings, (there are) five kinds of constituent materials, which are different from one another, and it is by means of them that the body puts forth (its) activities. The skin, the flesh and the bones, the marrow and the tendon as the fifth - these (materials) in the body are considered to be made up of (the element of) earth. Power and similarly anger, and the eyes and also heat are derived out of (the element of) fire; and (this) fire also causes (the things eaten) to be digested. (These are) the five igneous products which belong to embodied beings. The ear and the nose and the mouth, the heart and the abdomen as well - these five constituent parts in the body of living beings are the outcome of the element of ether (akasa). Phlegm, bile and sweat, fat and blood as well - thus is (the element of) water found always in five forms in the body of living beings. Through the inspiratory viral air, the embodi-ed being is made to live; through circulatory vital air, he always grows in size and develops; the excretory vital air goes downwards, and the digestive vital air exists in the center (of the abdomen), through the upward expiratory vital air, he (the embodied being) breathes out and gives utterance to the various kinds of significant words. Thus these five (different kinds of) vital air cause (all) embodied beings to manifest their activities here (31-37).

इष्टानिष्टसगन्धश्च मधुरः कटुरेव च ।
निर्हारी सङ्गतः स्निग्धो रूक्षो विशद एव च ।
एवं नवविधो ज्ञेयः पार्थिवो गन्धविस्तरः ॥११/३८॥
इष्ट+अन्-इष्ट+स-गन्धः च मधुरः कटुः एव च ।
निर्हारी सङ्गतः स्निग्धः रूक्षः विशदः एव च ।
एवं नव+विधः ज्ञेयः पार्थिवः गन्ध+विस्तरः ॥११/३८॥

The detail varieties (of the quality) of small, which characterizes the (element of) earth, have to be understood as consisting of the following nine kinds, *viz.* the agreeable-like, the disagreeable-like, the sweet, similarly the pungent, the diffusive, the inherent, the delicate, the powerful, and the distinct (38).

मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा ।
एवं षड्विधविस्तारो रसो वारिमयो मतः ॥११/३९॥
मधुरः लवणः तिक्तः कषायः अम्लः कटुः तथा ।
एवं षट्+विध+विस्तारः रसः वारि+मयः मतः ॥११/३९॥

The (quality of) taste, which is characteristic of (the element of) water is of the following six kinds in detail, *viz.* the sweet, the saltish, the bitter, the astringent, the sour and the pungent (39).

ह्रस्वो दीर्घस्तथा स्थूलश्चतुरश्रोऽथ वृत्तवान् ।
शुक्लः कृष्णस्तथा रक्तो नीलः पीतोऽरुणस्तथा ॥११/४०॥
ह्रस्वः दीर्घः तथा स्थूलः चतुः अश्रः अथ वृत्त+वान् ।
शुक्लः कृष्णः तथा रक्तः नीलः पीतः अरुणः तथा ॥११/४०॥
एवं द्वादशविस्तारो ज्योतिषोऽपि गुणः स्मृतः ।
षड्जर्षभौ च गान्धारो मध्यमः पञ्चस्तथा ॥११/४१॥
एवं द्वादश+विस्तारः ज्योतिषः अपि गुणः स्मृतः ।
षट्+ज+ऋषभौ च गान्धारः मध्यमः पञ्चः तथा ॥११/४१॥
धैवतो निषधश्चैव सप्तैते शब्दजा गुणाः ।
उष्णः शीतं सुखं दुःखं स्निग्धो विशद एव च ॥११/४२॥
धैवतः निषधः च एव सप्त एते शब्द+जाः गुणाः ।
उष्णः शीतं सुखं दुःखं स्निग्धः विशदः एव च ॥११/४२॥
कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदुदारुणौ ।
एवं द्वादशविस्तारो वायव्यो गुण उच्यते ॥११/४३॥
कठिनः चिक्कणः श्लक्ष्णः पिच्छिलः मृदु+दारुणौ ।
एवं द्वादश+विस्तारः वायव्यः गुणः उच्यते ॥११/४३॥

The qualities (derived) from (the element of) water is of the following twelve (varieties) in detail, (namely), short, long and stout, square and rotund, white, black, and similarly red, blue, yellow and tawny.

The following seven notes (of the gamut) are the qualities obtained out of sound: (and they are) - *ṣaḍja*, *ṛṣabha* and *gāndhāra*, *madhyama*, and similarly *Pañcama*, *dhaivata*, and also *niṣadha*.

The qualities produced out of (the element of) air are the following twelve in detail: (and they are) - the hot, the cold, the pleasurable, the painful, the smooth, and also the clean, the hard, the sticky, the fine, the thick, the soft and the rough (40-43).

आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह ।
अव्याहतैश्चेतयते न वेत्ति विषमागतैः ॥११/४४॥
आकाश+जं शब्दम् आहुः एभिः वायु+गुणैः सह ।
अ-व्याहतैः चेतयते न वेत्ति विषम+ आगतैः ॥११/४४॥
अथाप्ययते नित्यं धातुभिस्तैस्तु पञ्चभिः ।
आपोऽग्निर्मरुतश्चैव नित्यं जाग्रति देहिषु ॥११/४५॥
अथ+आप्ययते नित्यं धातुभिः तैः तु पञ्चभिः ।
आपः अग्निः मरुतः च एव नित्यं जाग्रति देहिषु ॥११/४५॥

Along with these qualities that are (derived out of the element) of air, they mention that sound is derived out (of the element) of ether.

With the aid of those (above mentioned) five constituent materials (of the body), one lives (well) in possession of consciousness, if they are not disorganized, if they become disorganized, one loses consciousness, (and it is through them that) one always attains growth and development. In (all) embodied beings, (the elements of) water, fire and air are ever (active and) wakeful (44-45).

चतुर्व्यूहात्मको विष्णुश्चतुर्धैवाकरोज्जगत् ।
ब्रह्मक्षत्रियविट्शूद्रांश्चतुर्वर्णान् गुणात्मकान् ॥११/४६॥
चतुः+व्यूह+आत्मकः विष्णुः चतुः-धा एव अकरोत् जगत् ।
ब्रह्म+क्षत्रिय+विट्+ शूद्रान् चतुः+वर्णान् गुणात्मकान् ॥११/४६॥
विप्रः शुक्लो नृपो रक्तः पीतो वैश्योऽन्त्यजोऽसितः ।
विस्तृत्य धर्मशास्त्रे हि तेषां कर्म समीरितम् ॥११/४७॥
विप्रः शुक्लः नृपः रक्तः पीतः वैश्यः अन्त्य+जः अ-सितः ।
विस्तृत्य धर्म+शास्त्रे हि तेषां कर्म समीरितम् ॥११/४७॥

Viṣṇu, who has four forms of manifestation, created the world in four ways, and (created) also the classes, *viz.* the Brahmin, the Kṣatriya, the Vaiśya and Śūdra, which have (all) their (respective) natures (determ-ined) by qualities.

The Brahmin is white, the Kṣatriya is red, the Vaiśya is yellow, and the Śūdra is black. It is in fact in the Dharmaśāstra that their (respective) vocations are described in detail (46-47).

एकस्मिन्नेव वर्णे तु चातुर्वर्ण्यं गुणात्मकम् ।
मोक्षधर्मेऽधिकारित्वसिद्धये मुनिरभ्यधात् ॥११/४८॥
एकस्मिन् एव वर्णे तु चातुर्वर्ण्यं गुणात्मकम् ।
मोक्ष+धर्मे अधिकारित्व+सिद्धये मुनिः अभ्यधात् ॥११/४८॥

The sage (Vyāsa), with the object of establishing the title (of all persons) to that (life of) righteous duty, which leads to the final deliverance of the soul from bondage, declared that in every class (of them) as determined by qualities (48).

स कर्मदेवतायोगज्ञानकाण्डेष्वनुक्रमात् ।
प्रवर्तयति तत्कर्मपरिपाकक्रमं विदन् ॥११/४९॥
सः कर्म+देवता+योग+ज्ञान+काण्डेषु अनुक्रमात् ।
प्रवर्तयति तत्+कर्म+परिपाक+क्रमं विदन् ॥११/४९॥

Knowing the manner in which the actions of these (various kinds of persons) comes to bear fruits, he (Vyāsa) has ordained them to follow (according to their personal fitness) the scriptural sections dealing respectively with works, with the worship of the divinity and with (divine) wisdom (49).

ऋजवः शुद्धवर्णाभाः क्षमावन्तो दयालवः ।
स्वधर्मनिरता ये स्युस्ते द्विजेषु द्विजातयः ॥११/५०॥
ऋजवः शुद्ध+वर्ण+आभाः क्षमावन्तः दयालवः ।
स्व+धर्म+निरताः ये स्युः ते द्विजेषु द्विजातयः ॥११/५०॥

Among those who are Brahmin (by birth), those (alone) are Brahmins (in reality), who are straight-forward and possess the luster of pure (white) color, who possess (also) forgiveness and are kindly in

disposition, and are devoted to their own (appropriate) duties (in life) (50).

कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः ।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥११/५१॥
काम+भोग+प्रियाः तीक्ष्णाः क्रोधनाः प्रिय+साहसाः ।
त्यक्त+स्व+धर्माः रक्त+अङ्गाः ते द्विजाः क्षत्रतां गताः ॥११/५१॥

Those Brahmins (by birth) have come to assume the condition of Kṣatriyas - (those) who are fond of enjoying objects of desire, and are harsh and angry and are given to daring deeds, and have (thus) abandoned their own (appropriate) duties, and are possessed of bodies that are red in color (51).

गोषु वृत्तिं समाधाय पीताः कृष्युपजीविनः ।
न स्वकर्म करिष्यति ते द्विजा वैश्यतां गताः ॥११/५२॥
गोषु वृत्तिं समाधाय पीताः कृषि+उपजीविनः ।
न स्व+कर्म करिष्यति ते द्विजाः वैश्यतां गताः ॥११/५२॥

Those Brahmins (by birth) have become Vaiśyas - who live by tending cattle, who are yellow-colored, and earn their livelihood by means of agricultue, and (hence) do not do their own (appropriate Brahminical) duties (52).

हिंसानृतप्रियाः क्षुद्राः सर्वकर्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥११/५३॥
हिंसा+अनृत+प्रियाः क्षुद्राः सर्व+कर्म+उपजीविनः ।
कृष्णाः शौच+परिभ्रष्टाः ते द्विजाः शूद्रतां गताः ॥११/५३॥

Those Brahmins (by birth) have become Śūdras - (those) who are fond of injuring others and of speaking falsehood, who are mean, and do all kinds of work for the sake of (their) livelihood, and are black in color, and have fallen away from purity (53).

समयाचारनिःशेषकृत्यभेदैर्विमोहयन् ।
मोक्षदो विष्णुरेव स्याद्देवदैतेयरक्षसाम् ॥११/५४॥
समय+आचार+निःशेष+कृत्य+भेदैः विमोहयन् ।
मोक्ष+दः विष्णुः एव स्यात् देव+ दैतेय+रक्षसाम् ॥११/५४॥

Viṣṇu, who causes bewilderment to the gods, daityas, and rākṣasas, by means of the distinctions relating to (various) conventional and common duties, is Himself the bestower of final beatitude on all of them (54).

चतुर्भिर्जन्माभिर्मुक्तिर्द्वेषेण रजतस्तव ।
भवेदिति वरो दत्तः पुण्डरीकाय विष्णुना ॥११/५५॥
चतुर्भिः जन्मभिः मुक्तिः द्वेषेण रजतः तव ।
भवेत् इति वरः दत्तः पुण्डरीकाय विष्णुना ॥११/५५॥

This is the boon given by Viṣṇu to Puṇḍarīka, *viz.* that Absolution (मुक्तिः) would come to him in the course of four re-births, for the reason that he was devoted (to Him) in hatred (55).

रजः सत्त्वतमोमार्गैस्तदात्मानः स्वकर्मभिः ।
प्राप्यते विष्णुरेवैको देवदैत्यनिशाचरैः ॥११/५६॥
रजः+सत्त्व+तमः+मार्गैः तत्+आत्मानः स्व+कर्मभिः ।
प्राप्यते विष्णुः एव एकः देव+दैत्य+निशाचरैः ॥११/५६॥

In consequence of their own works, which follow the courses of (the qualities of) rajas, sattva and tamas, (the various beings) happen to be of the nature of those (qualities): and (it is) the one only Viṣṇu (who) is attained by the gods, by the daityas and by the rākṣasas (equally) (56).

ब्रह्मविष्णुहराख्याभिः सृष्टिस्थितिलयानपि ।
हरिरेव करोत्येको रजः सत्त्वतमोवशात् ॥११/५७॥
ब्रह्म+विष्णु+हर+आख्याभिः सृष्टि+स्थिति+लयान् अपि ।
हरिः एव करोति एकः रजः सत्त्व+तमः+वशात् ॥११/५७॥
सात्त्विकास्त्रिदशाः सर्वे त्वसुरा राजसा मताः ।
तामसा राक्षसाः शीलप्रकृत्याकृतिवर्णतः ॥११/५८॥
सात्त्विकाः+त्रिदशाः सर्वे तु असुराः राजसाः मताः ।
तामसाः राक्षसाः शील+प्रकृति+ आकृति+वर्णतः ॥११/५८॥

Through the influence of the qualities of rajas, sattva and tamas, the one Viṣṇu Himself, under the names of Brahmā, Viṣṇu and Śiva, performs (in relation to the world) the (threefold) work of creation,

sustentation and destruction. By means of their conduct, nature, shape and colour, all the gods are made out to be endowed with (the quality of) sattva, (all) the daityas to be endowed with (the quality of) rajas, and (all) the rākṣasas to be endowed with (the quality of) tamas (57-58).

धर्मः सुराणां पक्षः स्यादधर्मोऽसुररक्षसाम् ।
पिशाचादेरधर्मः स्यादेषां लक्ष्म रजस्तमः ॥११/५९॥
धर्मः सुराणां पक्षः स्यात् अ-धर्मः अ-सुर+रक्षसाम् ।
पिशाच+आदेः अ-धर्मः स्यात् एषां लक्ष्म रजः तमः ॥११/५९॥

Virtue is (representative) of the leaning of the gods, and vice of that of the asuras and rākṣasas. Vice is (also representative of the leaning) of the piśācas and other such beings: their distinguishing qualities are rajas and tamas (59).

ईश्वराज्ज्ञानमन्विच्छेच्छ्रियमिच्छेद्धुताशनात् ।
आरोग्यं भास्करादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ॥११/६०॥
ईश्वरात् ज्ञानम् अन्विच्छेत् श्रियम् इच्छेत् हुताशनात् ।
आरोग्यं भास्करात् इच्छेत् मोक्षम् इच्छेत् जनार्दनात् ॥११/६०॥

One should wish to obtain knowledge from Śiva, one should wish to obtain prosperity from Agni (the fire god), one should wish to obtain health from the sun-god and one should wish to obtain the Absolution (मोक्षम्) from Viṣṇu (60).

यस्मिन्पक्षे तु यो जातः सुरो वाप्यसुरोऽपि वा ।
स्वधर्म एव तस्य स्यादधर्मेऽप्यत्र धर्मवित् ॥११/६१॥
यस्मिन् पक्षे तु यः जातः सुरः वा अपि अ-सुरः अपि वा ।
स्व+धर्मः एव तस्य स्यात् अ-धर्मे अपि अत्र धर्म+वित् ॥११/६१॥

In whatsoever category (of beings) a being, who knows (his) duty, is born here - whether he be (born as) a god or an asura - he has to adopt his own duty (in life), although it (happens to) be what may not be duty (otherwise) (61).

वेदत्रयोक्ता ये धर्मास्तेऽनुष्ठेयास्तु सात्त्विकैः ।
अधर्मोऽथर्ववेदोक्तो राजसैस्तामसैः श्रितः ॥११/६२॥

वेद+त्रय+उक्ता: ये धर्मा: ते अनुष्ठेया: तु सात्त्विकै: ।
अ-धर्म: अथर्व+वेद+उक्त: राजसै: तामसै: श्रित: ॥११/६२॥

The duties, which are enjoined in the three Vedas, have to be adopted by those who are endowed with the quality of sattva. What is (ordinary) no (such) duty and is given out in the Arthaveda - (that) is restored to by those who are endowed with (the quality of) rajas as well as by those who are endowed with (the quality of) tamas (62).

विष्णुक्रमणपर्यन्तो यागोऽस्माकं यथा तथा ।
राजसैस्तामसैर्ब्रह्मरुद्राविज्यौ तु तद्गुणौ ॥११/६३॥
विष्णु+क्रमण+पर्यन्त: याग: अस्माकं यथा तथा ।
राजसै: तामसै: ब्रह्म+रुद्रौ इज्यौ तु तत्+गुणौ ॥११/६३॥

Just as (all our) sacrifices culminate us in the attainment of Viṣṇu, so also those who are endowed with (the quality of) rajas, and those who are endowed with (the quality of) tamas, have to worship through (suitable) sacrifices Brahmā and Śiva, who are (respectively) characterised by those qualities (63).

निजधर्मपथाऽऽयातानुगृह्णात्यसौ हरि: ।
मुच्यते निजधर्मेण परधर्मो भयावह: ॥११/६४॥
निज+धर्म+पथा+आयातान् अनुगृह्णाति असौ हरि: ।
मुच्यते निज+धर्मेण पर+धर्म: भयावह: ॥११/६४॥

Viṣṇu bestows blessings on those who come (to him) along with their own (prescribed) path of duty. One is released (from the bondage of *saṁsāra*) by means of one's own duties. The duty prescribed for another, (if adopted by those for whom it is not prescribed), brings on fear (to such persons) (64).

एक एव परो विष्णु: सुरासुरनिशाचरान् ।
त्रिगुणानुगुणं नित्यमनुगृह्णाति लीलया ॥११/६५॥
एक: एव पर: विष्णु: सुर+अ-सुर+निशा-चरान् ।
त्रि+गुण+अनुगुणं नित्यम् अनुगृह्णाति लीलया ॥११/६५॥

Viṣṇu, who is supreme and one only, ever bestows blessings, out of (His own) sweet pleasure, on the gods, the *asuras*, and the

*rākṣasas*, in ways which are accordant with the three qualities (of sattva, rajas and tamas) (65).

इति श्रीमच्छङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसङ्ग्रहे वेदव्यासोक्तमहाभारतपक्षो नामैकादशं प्रकरणम् ॥

इति श्रीमत्+शङ्कराचार्य+विरचिते सर्व+दर्शन+सिद्धान्त+सङ्ग्रहे
वेदव्यास+उक्त+महाभारत+पक्ष: नाम एकादशं प्रकरणम् ॥

**Thus ends the eleventh chapter, known as the system of the Mahābhārata as enunciated by Vedavyāsa, in the Sarva- darśana-siddhānta-aṅgraha composed by the venerable Śaṅkarācārya.**

# CHAPTER XII

अथ वेदान्तपक्षप्रकरणम् ॥१२॥

## THE VEDĀNTA SYSTEM

वेदान्तशास्त्रसिद्धान्त: संक्षेपादथ कथ्यते ।
तदर्थप्रवणा: प्राय: सिद्धान्ता: परवादिनाम् ॥१२/१॥
वेदान्त+शास्त्र+सिद्धान्त: संक्षेपात् अथ कथ्यते ।
तत्+अर्थ+प्रवणा: प्राय: सिद्धान्ता: पर+वादिनाम् ॥१२/१॥

Now the established conclusion of the Vedantic scriptures will be briefly given out (here). The conclusion of (all) other philosophic disputants mostly tend to (prove the truth of) that conclusion (01).

ब्रह्मार्पणकृतै: पुण्यैर्ब्रह्मज्ञानाधिकारिभि: ।
तत्त्वमस्यादिवाक्यार्थो ब्रह्म जिज्ञास्यते बुधै: ॥१२/२॥
ब्रह्म+अर्पण+कृतै: पुण्यै: ब्रह्म+ज्ञान+अधिकारिभि: ।
तत् त्वम् असि आदि+वाक्य+ अर्थ: ब्रह्म जिज्ञास्यते बुधै: ॥१२/२॥

The Brahman, who forms the import of (Upaniṣadic) passages, such as- "That thou art," has to be enquired into by those wise persons, who, through the good results of (their) works offered up unto the Brahman, have become qualified for (attaining) the knowledge of the Brahman (02).

नित्यानित्यविवेकित्वमिहामुत्रफलास्पृहा ।
शमो दमो मुमुक्षुत्वं यस्य तस्याधिकारिता ॥१२/३॥
नित्य+अ-नित्य+विवेकित्वम् इह+अमुत्र+फल+अ-स्पृहा ।
शम: दम: मुमुक्षुत्वं यस्य तस्य अधिकारिता ॥१२/३॥

He (alone) has the (required) qualifications (for the conduct of this enquiry), who possesses the power to discriminate the eternal from the non-eternal, and is free from the desire to (enjoy) the fruits (of works) here (in this world) as well as there (in the other world), and is also characterised by (internal mental) tranquility, the restraint of the senses, and the desire to obtain the Absolution (मुमुक्षुत्वम्) (03).

तत्त्वमस्येव नान्यस्त्वं तच्छब्दार्थ: परमेश्वर: ।
त्वंशब्दार्थ: पुरोवर्ती तिर्यङ्मर्त्यादिकोऽपर: ॥१२/४॥
तत् त्वम् असि एव न अन्य: त्वं तत् शब्द+अर्थ: परम+ईश्वर: ।
त्वं-शब्द+अर्थ: पुर: वर्ती तिर्यच्+मर्त्य+आदि+क: अ-पर: ॥१२/४॥

"That certainly *art* thou: thou art one other." The meaning of the word *That* (here) is the supreme Lord: the meaning of the word *thou* is (any) other (being) that may be (pointed to) before (us) - a beast, or a man, or any other (being) (04).

तादात्म्यमसिशब्दार्थो ज्ञेयस्तत्त्वंपदार्थयो: ।
सोऽयं पुरुष: इत्यादिवाक्ये तादात्म्यवन्मत: ॥१२/५॥
तादात्म्यम् असि-शब्द+अथ: ज्ञेय: तत्-त्वं-पद-अर्थयो: ।
स: अयं पुरुष: इति+आदि +वाक्ये तादात्म्य+वत् मत: ॥१२/५॥

The meaning of the word *art* (here) has to be understood to be the (predication) of identity between the meaning of the word *That* and the meaning of the word *thou.* (This is) considered to be similar to the (predication) of identity (expressed) in such sentences as - "This is that man" (05).

स्यान्मतं तत्त्वमस्यादिवाक्यं सिद्धार्थबोधनात् ।
कथं प्रवर्तकं पुंसां विधिरेव प्रवर्तक: ॥१२/६॥

स्यात् मतं तत्-त्वम्-असि आदि वाक्यं सिद्ध+अर्थ+बोधनात् ।
कथं प्रवर्तकं पुंसां विधि: एव प्रवर्तक: ॥१२/६॥

Let (this your) opinion be (granted to be true). (But then), seeing that the sentence - "That thou art", and other such (sentences) give rise (only) to the knowledge of such things, as are (of themselves already) well made out (without any reference to any association with any action), how can such (sentences) prompt men to (live) the active life? It is only a mandatory injunction that induces activity (06).

आत्मा ज्ञात्यव्य इत्यादिविविभि: प्रतिपादिता: ।
यजमाना: प्रशस्यन्ते तत्त्ववादैरिहारुणै: ॥१२/७॥
आत्मा ज्ञात्यव्य: इति+आदि+विविभि: प्रतिपादिता: ।
यजमाना: प्रशस्यन्ते तत्त्व+वादै: इह आरुणै: ॥१२/७॥

Those sacrifice's, who are purported to be referred to by means of injunction passages, such as - "The self has to be known", etc., (they) are (merely) eulogized in the Āruṇas, which are discussions bearing upon reality (07).

बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुव: ।
नानाभूत: प्रतिक्षेत्रमर्थवृत्तिषु भासते ॥१२/८॥
बुद्धि+इन्द्रिय+शरीरेभ्य: भिन्न: आत्मा विभु: ध्रुव: ।
नाना+भूत: प्रति+क्षेत्रम् अर्थ+वृत्तिषु भासते ॥१२/८॥

The self (atman) is different from the intellect, the senses and the body, it is all-pervading and unchangeable, and appears to be manifold in (our) perceptions of things (by reason of its manifesting itself separately) in every (separate) ground of (its) habitation, (that is, in every perceivable object) (08).

व्यर्थातो ब्रह्मजिज्ञासा वाक्यस्यान्यपरत्वत: ।
अत्र ब्रूम: समाधानं न लिङेव प्रवर्तक: ॥१२/९॥
व्यर्था अत: ब्रह्म+जिज्ञासा वाक्यस्य अन्य+पर-त्वत: ।
अत्र ब्रूम: समाधानं न लिङेव प्रवर्तक: ॥१२/९॥

Consequently the enquiry into the Brahman is fruitless, inasmuch as the sentence ("That thou art", or any other like it in the Āruṇas)

means what is other (than a commandment). To this (objection) we give the justificatory reply that the verbal form of the potential mood (*lin*) is not (in speech) the only means which gives rise to activity (09).

इष्टसाधनताज्ञानादपि लोक: प्रवर्तते ।
पुत्रस्ते जात इत्यादौ विधिरूपो न तादृश: ॥१२/१०॥
इष्ट+साधनता+ज्ञानात् अपि लोक: प्रवर्तते ।
पुत्र: ते जात: इति+आदौ विधि+रूप: न तादृश: ॥१२/१०॥

People are led into activity, also by knowing (a thing) to possess the characteristics of a means (suited) to accomplish desired ends. In sentences like - "A son has been born to you", the form of the injunction (giving rise to gladsome action on the part of the hearing father) is not of that (potential *lin*) kind (10).

आत्मा ज्ञातव्य इत्यादिविधयस्त्वारुणे स्थिता: ।
बोधं विदधते ब्रह्मण्यज्ञानाद्भ्रान्तचेतसाम् ॥१२/११॥
आत्मा ज्ञातव्य: इति+आदि+विधय: तु आरुणे स्थिता: ।
बोधं विदधते ब्रह्मणि अ-ज्ञानात् भ्रान्त+चेतसाम् ॥१२/११॥

The injunctions, such as 'The self has to be known', etc., which are (all) found in the Arunas, enjoin (as duty the acquisition of) knowledge relating to the Brahman on (all) those whose minds have been deluded by nescience (11).

स्यादेतत्काम्यकर्माणि प्रतिषिद्धानि वर्जयन् ।
विहितं कर्म कुर्वाण: शुद्धान्त:करण: पुमान् ॥१२/१२॥
स्यात् एतत् काम्य+कर्माणि प्रतिषिद्धानि वर्जयन् ।
विहितं कर्म कुर्वाण: शुद्ध+अन्त:+ करण: पुमान् ॥१२/१२॥
स्वयमेव भवेज्ज्ञानी गुरुवाक्यानपेक्षया ।
तदयुक्तं न विज्ञानं कर्मभि: केवलैर्भवेत् ॥१२/१३॥
स्वयम् एव भवेत् ज्ञानी गुरु+वाक्य+अन्-अपेक्षया ।
तत् अ-युक्तं न विज्ञानं कर्मभि: केवलै: भवेत् ॥१२/१३॥

It may be so. (But it may be said that) a person who, after giving up such works as have (selfish) objects of define in view, and also such (other works) as are prohibited in the scriptures, performs the

works which are enjoined in the scriptures, has the internal organ (of the soul) purified, and (thereby) becomes of himself the knower (of the Brahman), without requiring any language (of instruction) from a spiritual preceptor. This (view) is not right. (The true) knowledge (of philosophical reality) cannot be obtained by means of mere works (12-13).

गुरुप्रसादजन्यं हि ज्ञानमित्युक्तमारुणैः ।
प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शक्तितः ॥१२/१४॥
गुरु+प्रसाद+जन्यं हि ज्ञानम् इति उक्तम् आरुणैः ।
प्रत्यक् प्रवणतां बुद्धेः कर्माणि उत्पाद्य शक्ति-तः ॥१२/१४॥
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ।
प्रत्यक्प्रवणबुद्धेस्तु ब्रह्मज्ञानाधिकारिणः ॥१२/१५॥
कृत+अर्थानि अस्तम् आयान्ति प्रावृट्+अन्ते घनाः इव ।
प्रत्यक्+प्रवण+बुद्धेः तु ब्रह्म +ज्ञान+अधिकारिणः ॥१२/१५॥
स्यादेव ब्रह्मजिज्ञासा तत्त्वमस्यादिभिर्गुरोः ।
तत्त्वमस्यादिवाक्यार्थो व्याख्यातो हि पुनः पुनः ॥१२/१६॥
स्यात् एव ब्रह्म+जिज्ञासा तत् त्वम् असि आदिभिः गुरोः ।
तत् त्वम् असि+आदि+वाक्य+अर्थ+व्याख्या-तः हि पुनः पुनः ॥१२/१६॥

Indeed that is declared in the Āruṇas to be (true) knowledge, which is born (in the pupil) through the kindly favor of the spiritual teacher (bestowed in the way of appropriate instruction). Works given by means of (their own) power an in-bent leaning to the mind: and (then) having (thus) fulfilled (their) purpose, they disappear like clouds at the end of the rainy season. In the case of him, however, whose mind is bent inwards, and who is (thus) qualified to receive the knowledge of the Brahman, the enquiry into (the nature of) the Brahman is certainly induced by means of - " That thou art" - and other such (sentences in the teaching) of the spiritual preceptor. The collection of sentences, consisting of - "That thou art" - and other such (sentences), has indeed been commented upon (by various teachers) over and over again (14-16).

गुर्वनुग्रहहीनस्य नात्मा सम्यक्प्रकाशते ।
आत्माविद्यानिमित्तोत्थः प्रपञ्चः पाञ्चभौतिकः ॥१२/१७॥

गुरु+अनुग्रह+हीनस्य न आत्मा सम्यक् प्रकाशते ।
आत्म+अ-विद्या+निमित्त+उत्थ: प्रपञ्च: पाञ्च+भौतिक: ॥१२/१७॥

The self does not manifest itself to him who is destitute of the kindly favor of the spiritual preceptor. The universe, which is made up of the five elements, is produced out of the cause consisting of nescience (अविद्या) as appertaining to the self (17).

निवर्तते यथा तुच्छं शरीरभुवनात्मकम् ।
तथा ब्रह्मविवर्तन्तु विज्ञेयमखिलं जगत् ॥१२/१८॥
निवर्तते यथा तुच्छं शरीर+भुवन+आत्मकम् ।
तथा ब्रह्म+विवर्तं तु विज्ञेयम् अखिलं जगत् ॥१२/१८॥

The whole world has to be realized as forming an illusory manifestation of the Brahman (consisting its basis), so that (in consequence) the unreality consisting of the body and the (outer) world goes away (at once and altogether from the vision of the truth-perceiving soul) (18).

वेदान्तोक्तात्मविज्ञानविपरीतमतिस्तु या ।
आत्मन्यविद्या सानादि: स्थूलसूक्ष्मात्माना स्थिता ॥१२/१९॥
वेदान्त+उक्त+आत्म+विज्ञान+विपरीत+मति: तु या ।
आत्मनि अ-विद्या सा अन्-आदि: स्थूल+सूक्ष्म+आत्मना स्थिता ॥१२/१९॥

The nescience in respect of the self is that view (of things) which is contrary to the true knowledge of the (nature of the) self as declared in the Vedanta and that (nescience) is beginning-less and exists in a gross as well as in a subtle form (19).

आत्मान: खं ततो वायुर्वायोरग्निस्ततो जलम् ।
जलात्पृथिव्यभूद्भूमेर्व्रीह्याद्योषधयोऽभवन् ॥१२/२०॥
आत्मान: खं तत: वायु: वायो: अग्नि: तत: जलम् ।
जलात् पृथिवी अभूत् भूमि: व्रीहि+ आदि+ओषधय: अभवन् ॥१२/२०॥

From the self came forth the element of ether, from this the air (came forth), from the air the fire (came forth), from this (fire) water (came forth), from water the earth came into existence, and from the earth arose the paddy plant and other such plants (20).

ओषधिभ्योऽन्नमन्नात्तु पुरुषः पञ्चकोशवान् ।
अपञ्चीकृततन्मात्रः सूक्ष्मभूतात्मको जनः ॥१२/२१॥
ओषधिभ्यः अन्नम् अन्नात् तु पुरुषः पञ्च+कोशवान् ।
अ-पञ्चीकृत+तन्मात्रः सूक्ष्म+भूत +आत्मकः जनः ॥१२/२१॥
स्थूलीभवति तद्भेदस्तिर्यङ्नरसुरात्मकः ।
धर्माधिक्ये तु देवत्वं तिर्यक्त्वं स्यादधर्मतः ॥१२/२२॥
स्थूली भवति तत्+भेदः तिर्यच्+नर+सुर+आत्मकः ।
धर्म+आधिक्ये तु देवत्वं तिर्यक्त्वं स्यात् अ-धर्म-तः ॥१२/२२॥
तयोः साम्ये मनुष्यत्वमिति त्रेधा तु कर्मभिः ।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ॥१२/२३॥
तयोः साम्ये मनुष्यत्वम् इति त्रेधा तु कर्मभिः ।
त्वक्+असृक्+मांस+मेदः+अस्थि+मज्जा+शुक्राणि धातवः ॥१२/२३॥
सप्तान्नपरिणामाः स्युः पुंस्त्रीत्वमपि न स्वतः ।
शुक्राधिक्ये पुमान् गर्भे रक्ताधिक्ये वधूस्तथा ॥१२/२४॥
सप्त+अन्न+परिणामाः स्युः पुम्+स्त्रीत्वम् अपि न स्वतः ।
शुक्र+आधिक्ये पुमान् गर्भे रक्त+आधिक्ये वधूः तथा ॥१२/२४॥
नपुंसकं तयोः साम्ये मातुः सञ्जायते सदा ।
मज्जास्थिस्नायवः शुक्राद्रक्तात्त्वङ्मांसशोणिताः ॥१२/२५॥
नपुंसकं तयोः साम्ये मातुः सञ्जायते सदा ।
मज्जा+अस्थि+स्नायवः शुक्रात् रक्तात् त्वक्+मांस+शोणिताः ॥१२/२५॥
षट्कोशाख्यं भवेदेतत्पितुर्मातुस्त्रयन्त्रयम् ।
बुभुक्षा च पिपासा च शोकमोहौ जरामृती ॥१२/२६॥
षट्+कोश+आख्यं भवेत् एतत् पितुः मातुः त्रयम् त्रयम् ।
बुभुक्षा च पिपासा च शोक+ मोहौ जरा+मृती ॥१२/२६॥
षडूर्मयः प्राणबुद्धिदेहेषु स्याद्द्वयन्द्वयम् ।
आत्मत्वेन भ्रमन्त्यत्र वादिनः कोशपञ्चके ॥१२/२७॥
षट्+ऊर्मयः प्राण+बुद्धि+देहेषु स्यात् द्वयम् द्वयम् ।
आत्मत्वेन भ्रमन्ति अत्र वादिनः कोश+पञ्चके ॥१२/२७॥

From plants (came forth) food; from food came forth man with (his) five soul-sheaths. The creature, who is made up of the subtle elements, and in whom the rudimentary elements principles have not been separated through analyses, becomes grossified (in the course of creation) and beasts, men and gods constitute (only) varieties of such

(created beings). On the preponderance of virtue (in one's *karma*), the condition of god (arises in relation to one): through unrighteousness (in one's *karma*), the condition of beast (is brought about); on these two things (virtue and unrighteousness) being equal (in one's *karma*), the condition of man (is produced). Thus indeed are creatures of three kinds, in accordance with (their) *karmas*. The skin, the blood, the flesh, the fat, the bone, the marrow of bone, and the semen - these seven constituents of the body are (all) modifications of food. Masculinity and femininity also are not self-evolved. A male is invariably born, when there is a preponderance of (the power of) semen in the womb (of the mother), a female (is born) when similarly there is a preponderance of (the power of) the uterine blood, and the eunuch (नपुंसकं तयो: साम्ये) (is born), when there is an equality of those two things. The marrow of bone, the bone and the sinew (in the child) are produced out of the semen (of the male parent); the skin, the flesh and the blood (in the child) are produced out of the uterine blood (of the female parent). These are called the six vestures (of the body), of which (the first) three are due to the father, and (the other) three to the mother.

Hunger and thirst, sorrow and delusion, old age and death, these are the six waves (of infirmity) to be found as two and two - in life, in the mind, and in the body (respectively). (Many) philosophic controversialists mistakenly entertain the notion of the soul here in relation to the five sheaths (of the soul) (21-27).

अन्नप्राणमनोज्ञानमया: कोशास्तथात्मन: ।
आनन्दमयकोशश्च पञ्च कोशा इतीरिता: ॥१२/२८॥
अन्न+प्राण+मन:+ज्ञानमया: कोशा: तथा आत्मन: ।
आनन्दमय+कोश: च पञ्च कोशा: इति ईरिता: ॥१२/२८॥

The sheath of food (अन्नमयकोश:), of the vital air (प्राणमयकोश:), of the mind of the consciousness (ज्ञानमयकोश:), and similarly that of the bliss (आनन्दमयकोश:) are (together) declared to be five sheathes of the soul (28).

मयड्विकारे विहित इत्यानन्दमयोऽभ्यसन् ।
गृह्णात्यन्नमयमात्मानं देहं लोकायत: खलु ॥१२/२९॥
मयट् विकारे विहित: इति आनन्दमय: अभ्यसन् ।
गृह्णाति अन्नमय+आत्मानं देहं लोकायत: खलु ॥१२/२९॥

Since the affix *mayaṭ* is (here) used in the sense of modification, (we have) the *ānandamaya* repeated (again and again in the context in the scripture concerned). The Lokāyata indeed accepts the body, which is (merely) that (kind of) self which is *annamaya* (or what is made up of food) (29).

देहैः परिमितं प्राणमात्मानमार्हता विदुः ।
विज्ञानमयमात्मानं बौद्धा गृह्णन्ति नापरम् ॥१२/३०॥
देहैः परिमितं प्राणम् आत्मानं आर्हता: विदुः ।
विज्ञानमयम् आत्मानं बौद्धा: गृह्णन्ति न अ-परम् ॥१२/३०॥

The Ārhatas understand (the self) to be the body-bounded which consists of life (प्राणम्). The Bauddhas accept the self which is consists of consciousness (विज्ञानमयम्) but (they accept) nothing beyond (30).

आनन्दमयमात्मानं वैदिका: केचिदूचिरे ।
अहङ्कारात्मवादी तु प्राह प्रायो मनोमयम् ॥ १२/३१ ॥
आनन्दमयम् आत्मानं वैदिका: केचित् ऊचिरे ।
अहङ्कार+आत्म+वादी तु प्राह प्राय: मनोमयम् ॥ १२/३१ ॥

Some believers in the Vedas speak of the self as consists of bliss (आनन्दमयम्). He, however, who declares that the material principle of egoity is the self, generally says that it is the *monomaya* (or what consists of the *manas*) (31).

कर्तृत्वादिभिरस्पृष्टो ग्राह्य आत्मात्मविन्मते ।
कर्तृत्वं कर्मकाण्डस्थैर्देवताकाण्डमाश्रितैः ॥१२/३२॥
कर्तृत्व+आदिभि: अ-स्पृष्ट: ग्राह्य: आत्मा आत्म+वित् मते ।
कर्तृत्वं कर्म+काण्ड+स्थै: देवता+काण्डम् आश्रितैः ॥१२/३२॥
अवश्याश्रयणीयं हि नान्यथा कर्म सिध्यति ।
वसन्ते ब्राह्मणोऽत्राग्नीनादधीतेति वै विधौ ॥१२/३३॥
अवश्य+आश्रयणीयं हि न अन्यथा कर्म सिध्यति ।

वसन्ते ब्राह्मणः अत्र अग्नीन् आदधीत् इति वै विधौ ॥१२/३३॥
देहो वात्मविशिष्टो वा कोऽधिकारी तु कर्मणि ।
अचेतनत्वाद्देहस्य स्वर्गकामाद्यसम्भवात् ॥१२/३४॥
देहः वा आत्म+विशिष्टः वा कः अधिकारी तु कर्मणि ।
अ-चेतनत्वात् देहस्य स्वर्ग+काम+आदि+अ-सम्भवात् ॥१२/३४॥
न जाघटीति कर्तृत्वं नाशित्वात्तत्र कर्मणि ।
आत्मनो ब्राह्मणत्वादिजातिरेव न विद्यते ॥१२/३५॥
न जाघटीति कर्तृत्वं नाशित्वात् तत्र कर्मणि ।
आत्मनः ब्राह्मणत्व+आदि+जातिः एव न विद्यते ॥१२/३५॥
जातिवर्णाश्रमावस्थाविकारेभ्योऽपि सोऽपरः ।
विशिष्टो नापरः कश्चिद्विद्यते देहदेहिनोः ॥१२/३६॥
जाति+वर्ण+आश्रम+अवस्था+विकारेभ्यः अपि सः अ-परः ।
विशिष्टः न अ-परः कश्चित् विद्यते देह+देहिनोः ॥१२/३६॥

According to the view of those, who (truly) know the self, the self has to be understood to be untouched by the quality of being the agent and by (all) other (such qualities). The agentship of the self has to be inevitably accepted by those who take their stand on that section of the scriptures which deals with ritualistic works (कर्मकाण्ड), as well as by those who rely upon that section which deals with deities (देवताकाण्ड): for, otherwise, no (ritual) work can be carried out successfully (by them).

In relation to the injunction - "The Brahman should kindle the (sacrificial) fires here in the spring (season)" - who is it that is entitled to (perform) the (enjoined) work, is it the (Brahmin's) body (in itself), or (is it the body) as in association with the soul? Seeing that, as the body is non-intelligent, it is impossible for it to have the desire for the attainment of heaven, and seeing that (the body) is subject to be destroyed, it is not possible for it to be the agent in relation to this (kind of) work. The soul does not at all possess the characteristics of Brahmin-hood and of other such class-distinctions. That (*viz.* the soul) is (really) apart from class-divisions, caste, estates of life, conditions of age, and (all other such distinguishing) differences. There is (moreover) nothing other than (both) the body and the soul, which is

(specially) qualified (to be the agent in relation to such ritualistic works) (32-36).

अत: काल्पनिक: कर्ता विज्ञेयस्तत्र कर्मणि ।
नेति नेत्युच्यमाने तु पञ्चकोशे क्रमेण य: ॥१२/३७॥
अत: काल्पनिक: कर्ता विज्ञेय: तत्र कर्मणि ।
न इति न इति उच्यमाने तु पञ्च+कोशे क्रमेण य: ॥१२/३७॥
भासते तत्परं ब्रह्म स्यादविद्या ततोऽन्यथा ।
आत्मस्वरूपमाच्छाद्य विक्षेपान् सा करोत्यलम् ॥१२/३८॥
भासते तत्+परं ब्रह्म स्यात् अ-विद्या तत: अन्यथा ।
आत्म+स्वरूपम् आच्छाद्य विक्षेपान् सा करोति अलम् ॥१२/३८॥

Therefore the agent in relation to this (kind of) action has to be understood to be (some) hypothetical being (of some kind). That which shines forth, after (all) the five sheaths of the soul are one after another declared to be "not this not this", that is the supreme Brahman. What is other than that has to be nescience (अविद्या). That (nescience) covers up (and conceals) the true nature of the self, and (thereby) gives rise to an abundance of (its) illusory projections (37-38).

अहङ्काराख्यविक्षेप: कामात्कर्मफल: सदा ।
मूलभूतोऽखिलोभ्रान्तेर्बिभ्राणो दु:खसङ्गतिम् ॥१२/३९॥
अहङ्कार+आख्य+विक्षेप: कामात् कर्म+फल: सदा ।
मूल+भूत: अखिल+भ्रान्ते: बिभ्राण: दु:ख+सङ्गतिम् ॥१२/३९॥
व्यवहारान् करोत्युच्चै: सर्वान् लौकिकवैदिकान् ।
मातृमानप्रमेयादिभिन्नान् सर्वस्य सत्यवत् ॥१२/४०॥
व्यवहारान् करोति उच्चै: सर्वान् लौकिक+वैदिकान् ।
मातृ+मान+प्रमेय+आदि+ भिन्नान् सर्वस्य सत्य+वत् ॥१२/४०॥

The illusory projection known as egoity is always productive of (the bondage of) karma through desire. (It) is the root of all (our cosmic) illusion, and carries (with itself) the association of misery: and in relation to all (persons), it distinctly gives rise (further) to all those worldly and Vedic expressions of (common) experience, wherein there are differentiations of knower, the means of knowledge,

the object of knowledge, etc., as though (all these illusory differentiations were) true (39-40).

निष्क्रियस्य त्वसङ्गस्य चिन्मात्रस्यात्मन: खलु ।
स्वतो न व्यवहारोऽयं सम्भवत्यनपेक्षिण: ॥१२/४१॥
निष्क्रियस्य तु अ-सङ्गस्य चिन्मात्रस्य आत्मन: खलु ।
स्वत: न व्यवहार: अयं सम्भवति अन्-अपेक्षिण: ॥१२/४१॥

Surely in relation to the self, which is actionless and associationless, and is (moreover) the independent and undesiring conscious itself, this (manner of the) expression of experience cannot (indeed) take place of itself (41).

जडश्चेतत्यहङ्कारश्चैतन्याध्यासवान्ध्रुवम् ।
अन्यवस्त्वन्तराध्यासादात्मान्यत्वेन भासते ॥१२/४२॥
जड: चेत् इति अहङ्कार: चैतन्या अध्यासवान् ध्रुवम् ।
अन्य+वस्तु+अन्तर+अध्यासात् आत्मा अन्यत्वेन भासते ॥१२/४२॥

It is certain that the non-intelligent) egoity, which has consciousness (merely) superimposed upon it behaves (in consequence) as if it were (itself) conscious (and intelligent). Through the superimposed of something else, which is other (than itself), the self shines forth as though it were (really) other (than itself) (42).

इदमंशो द्विधाभूतस्तत्र प्राण: क्रियाश्रय: ।
ज्ञानाधारोऽपरो बुद्धिर्मन इत्यंश ईरित: ॥१२/४३॥
इदम्+अंश: द्वि-धा+भूत: तत्र प्राण: क्रिया+आश्रय: ।
ज्ञान+आधार: अ-पर: बुद्धि: मन: इति अंश ईरित: ॥१२/४३॥

That thing, (i.e. our body) which is pointed to by the word *this*, consist of two parts. Of these the life (प्राण:) is the basis of (our) activities, the other thing which is spoken of as intellect and mind (मन:) is the basis of knowledge (43).

तस्यचेष्टादयोऽपीष्टा: प्राणाद्या: पञ्च वायव: ।
करणाद्या: क्रियाभेदवागादिद्वारकास्तथा ॥१२/४४॥
तस्य चेष्टा+आदय: अ-पि इष्टा: प्राण+आद्या: पञ्च वायव: ।
करण+आद्या: क्रिया+ भेद+वाक्+आदि+द्वारका: तथा ॥१२/४४॥

## Appendix 01

Physical movements and other such things, the five vital airs beginning with the the principal vital air (प्राण:), and the instrumental organs (of sense and activity), etc. which form (as it were) the doorway to various kinds of activity such as speaking, etc. - all these may be accepted (as attributes) in relation to that (body) (44).

द्विधान्त:करणं बुद्धिर्मन: कार्यवशादिह ।
आत्मैव केवल: साक्षादहंबुद्धौ तु भाति चेत् ॥१२/४५॥
द्वि-धा अन्त:+करणं बुद्धि: मन: कार्य+वशात् इह ।
आत्मा एव केवल: साक्षात् अहं+ बुद्धौ तु भाति चेत् ॥१२/४५॥
कृशोऽस्मीति मतौ भाति केवलो नेति तद्वद ।
कृशादयोऽत्र दृश्यत्वान्नात्मधर्मा यथा मता: ॥१२/४६॥
कृश: अस्मि इति मतौ भाति केवल: न इति तत् वद ।
कृश+आदय: अत्र दृश्यत्वात् न आत्म+धर्मा: यथा मता: ॥१२/४६॥
सुखादयोऽपि देहस्था नात्मधर्मास्तथैव च ।
मातृमानप्रमेयेभ्यो भिन्न आत्मात्मविन्मते ॥१२/४७॥
सुख+आदय: अपि देह+स्था न आत्म+धर्मा: तथा एव च ।
मातृ+मान+प्रमेयेभ्य: भिन्न आत्मा आत्म+वित्+मते ॥१२/४७॥

In consequence of (the variation in) function, the internal organ here is of two kinds (consisting of) the intellect (बुद्धि:) and the mind. If it be held that it is the pure and simple Self which directly shines out in the idea of I-ness (or egioty), then tell me whether, in the idea - 'I am lean,' (that self is apprehended as) pure and simple or not. Just as 'lean' and other such (attributes) are not, owing to their perceivablility, considered to be the attributes of the Self. According to the view of those who (truly) know the Self, the Self is (entirely) distinct from the knower, the means of knowledge, and the object of knowledge (45-47).

तथैव चोपपाद्य: स्यान्निरस्य परवादिन: ।
अनात्मा विषयश्चेति प्रतिपाद्यो न कस्यचित् ॥१२/४८॥
तथा एव च उपपाद्य: स्यात् निरस्य पर+वादिन: ।
अन्-आत्मा विषय: च इति प्रतिपाद्य: न कस्यचित् ॥१२/४८॥

After discarding (all) those philosophical controversialists who declare otherwise, (the *ātman*) has to be explained (to all) in this very manner. (But) to no one should it be taught that the not-self is (that which forms) the object of perception (48).

घटोऽहमिति कस्यापि प्रतिपत्तेरभावतः ।
रूपादिमत्त्वादृश्यत्वाज्जडत्वाद्भौतिकत्वतः ॥१२/४९॥
घटः अहम् इति कस्य अपि प्रतिपत्तेः अ-भावतः ।
रूप+आदिमत्त्व+अ-दृश्यत्वात् जडत्वात् भौतिक-त्वतः ॥१२/४९॥
अन्नवच्चादनीयत्वाच्छ्वादेर्नात्मा कलेवरम् ।
देहतो व्यतिरेकेण चैतन्यस्य प्रकाशनत् ॥१२/५०॥
अन्न+वत् च अदनीयत्वात् श्व+आदेः न आत्मा कलेवरम् ।
देहतः व्यतिरेकेण चैतन्यस्य प्रकाशनत् ॥१२/५०॥

Because no one (ever) has the cognition - 'I am a pot', because (the body) is possessed of form (or color) and such other (qualities), because (it) is perceivable, non-intelligent and made up of the (material) elements, because also (it) is fit to be eaten as food by dogs and other such (animals), and because (again) consciousness shines forth (always) in contradistinction from the body – the body is not the self (49-50).

अतस्त्वन्नमयो देहो नात्मा लोकायतेरितः ।
प्राणोऽप्यात्मा न वायुत्वाज्जडत्वाद्बाह्यवायेवत् ॥१२/५१॥
अतः तु अन्नमयः देहः न आत्मा लोकायत+ईरितः ।
प्राणः अपि आत्मा न वायुत्वात् जडत्वात् बाह्य+वायु+वत् ॥१२/५१॥

Therefore the body which is (merely) made up of food (अन्नमयः) cannot be the Self as the Lokāyatas declare. The principal vital air also cannot be the Self, because it is aerial and non-intelligent like the external air (of the atmosphere) (51).

इन्द्रियाणि न चात्मा स्यात् करणत्वात्प्रदीपवत् ।
चञ्चलत्वान्मनो नात्मा सुषुप्तौ तदसम्भवात् ॥१२/५२॥
इन्द्रियाणि न च आत्मा स्यात् करणत्वात् प्रदीप+वत् ।
चञ्चलत्वात् मनः न आत्मा सुषुप्तौ तत् अ-सम्भवात् ॥१२/५२॥

The senses also cannot be the Self, because they are like a lamp, (more) instruments (in aid) of knowledge. The mind is not the Self, because it is unsteady and does not exist during dreamless sleep (52).

सुखे पर्यसानाच्च सुखमेवात्मविग्रहः ।
धत्तेऽन्नमयमात्मानं प्राणः प्राणं मनो मनः ।
सच्चिदानन्दगोविन्दपरमात्मा वहत्यसौ ॥१२/५३॥
सुखे पर्यसानात् च सुखम् एव आत्म+विग्रहः ।
धत्ते अन्नमयम् आत्मानं प्राणः प्राणं मनः मनः ।
सत्+चित्+आनन्द+गोविन्द+परमात्मा वहति असौ ॥१२/५३॥
यदा बाह्येन्द्रियैरात्मा भुङ्क्तेऽर्थान् स्वपराङ्मुखान् ।
तदा जाग्रदवस्था स्यादात्मनो विश्वसंज्ञिता ॥१२/५४॥
यदा बाह्य+इन्द्रियैः आत्मा भुङ्क्ते अर्थान् स्व+पराक्-मुखान् ।
तदा जाग्रत्+अवस्था स्यात् आत्मनः विश्व+संज्ञिता ॥१२/५४॥
बाह्येन्द्रियगृहीतार्थान् मनोमात्रेण वै यदा ।
भुङ्क्ते स्वप्नांस्तदा ज्ञेया तैजसाख्या परात्मनः ॥१२/५५॥
बाह्य+इन्द्रिय+गृहीत+अर्थान् मनः मात्रेण वै यदा ।
भुङ्क्ते स्वप्नान् तदा ज्ञेया तैजस+आख्या पर+आत्मनः ॥१२/५५॥
अविद्यातिमिरग्रस्तमनस्यात्मन्यवस्थिते ।
सुषुप्त्यवस्था विज्ञेया प्राज्ञाख्यानन्दसंज्ञिता ॥१२/५६॥
अ-विद्या+तिमिर+ग्रस्त+ मनसि आत्मनि अवस्थिते ।
सुषुप्ति+अवस्था विज्ञेया प्राज्ञ+आख्या+आनन्द+संज्ञिता ॥१२/५६॥
स्वापेऽपि तिष्ठति प्राणो मृतभ्रान्तिनिवृत्तये ।
अन्यथा श्वादयोऽश्नन्ति संस्करिष्यन्ति वानले ॥१२/५७॥
स्वापे अपि तिष्ठति प्राणः मृत+भ्रान्ति+निवृत्तये ।
अन्यथा श्व+आदयः अश्नन्ति संस्करिष्यन्ति वा अनले ॥१२/५७॥
स्वापेऽप्यानन्दसद्भावो भवत्येवोत्थितो यतः ।
सुखमस्वाप्समित्येवं परामृशति वै स्मरन् ॥१२/५८॥
स्वापे अपि आनन्द+सत्+ भावः भवति एव उत्थितः यतः ।
सुखम् अस्वाप्सम् इति एवं परामृशति वै स्मरन् ॥१२/५८॥
स्यान्मतं विषयाभावान्न तद्विषयजं सुखम् ।
वेद्यत्वान्न निजन्तेन दुःखाभावे सुखभ्रमः ॥१२/५९॥
स्यात् मतं विषय+अ-भावात् न तत्+ विषय+जं सुखम् ।
वेद्यत्वात् अ निजम् तेन दुःख+अ-भावे सुख+भ्रमः ॥१२/५९॥

प्रतियोगिन्यदृष्टेऽपि सर्वाभावोऽपि गृह्यते ।
यतोऽन्यस्मै पुन: पृष्ट: सर्वाभावं प्रभाषते ।
न्यायेनानेन भावानां ज्ञानभावोऽनुभूयते ॥१२/६०॥
प्रतियोगिनि अ-दृष्टे अपि सर्व+अ-भाव: अपि गृह्यते ।
यत: अन्यस्मै पुन: पृष्ट: सर्व+अ-भावं प्रभाषते ।
न्यायेन अनेन भावानां ज्ञान+अ-भाव: अनुभूयते ॥१२/६०॥

Since (dreamless sleep) culminates in happiness, (this) happiness alone constitutes the body (i.e., the essential nature) of the Self. The prāṇa supports (that sheath of) the self which is made up of food, the mind supports (that sheath of the self which consists of) the principal vital air and the well known Supreme Self, Govinda, who is Existence-Knowledge-Bliss, supports the sheath made up of the mind.

When the Self, by means of the external senses, experiences (all) such objects as are turned away from itself, then there arises the waking state, which is denoted by the name of *Viśva*. When, in fact solely by means of the mind, (it) experiences dreams, whose contents are obtained through the external senses, then that state of the Supreme Self, which is called *Taijasa*, has to be understood (to have arisen).

When the *ātman* abides in the mind, which is (itself) swallowed up by the darkness of ignorance, then it (the self) is known to be in the state of dreamless sleep, which is called *Prājña* and is indicated by (the characteristic of) bliss.

Even in sleep the *Prājña* (or life) abides, so as to remove the erroneous impression of death (in relation to a person is merely sleeping).

Otherwise dogs would eat up the sleeping person, or (people) would cremate (him) religiously in the sacred fire. Even in (dreamless) sleep there is surely the endurance of bliss, because (a seeping person) on waking up and remembering (his immediately past condition) speaks out on reflection thus - 'I slept happily.'

(This) view may be (granted). This happiness (however) cannot be what is derived out of the objects of the senses, for the reason that there are (during deep sleep) no (such) objects (perceived). Because (also) it has to be made out (through reflection), it cannot be real (happiness in itself). Therefore there is (here) the illusion of happiness in respect of (what is merely) the absence of pain.

Even though the counter-correlative (thereof) is not (fully) perceived, the absence of all (things) is (capable of being) apprehended; because, when asked again, (the man who has risen from sound sleep), speaks to another of (his own apprehension of) the absence of all (things). It is I accordance with this reasoning that the absence of the apperception of feelings is experienced (53-60).

अत्र ब्रूम: समाधानं दु:खाभावो न गृह्यते ।
प्रबुद्धेनेति सुप्तस्य नाज्ञानं प्रति साक्षिता ॥१२/६१॥
अत्र ब्रूम: समाधानं दु:ख+अ-भाव: न गृह्यते ।
प्रबुद्धेन इति सुप्तस्य न अ-ज्ञानं प्रति साक्षिता ॥१२/६१॥

Here we give (this) reply to the objection that the absence of pain is not (at all capable of being) perceived. Since it is said (that the happiness of deep sleep is experienced) by one who has risen from sleep, the sleeping person (himself) cannot constitute a witness in relation to (any) absence of apperception (61).

प्रतियोग्यग्रहात्स्वापे दु:खस्य प्रतियोगिता ।
अभावाख्यं प्रमाणन्तु नास्ति प्राभाकरे मते ॥१२/६२॥
प्रतियोगि+अ-ग्रहात् स्वापे दु:खस्य प्रतियोगिता ।
अ-भाव+आख्यं प्रमाणं तु न अस्ति प्राभाकरे मते ॥१२/६२॥

Since, in (deep) sleep, the counter-correlative of a negation is not apprehended, the character of such (an unapprehended) counter-correlative belongs to pain. In the opinion of the Prabhākaras, the negative proof of no-perception (by which the non-existence of things is proved) is not admissible (62).

नैयायिकमतेऽभाव: प्रत्यक्षान्नातिरिच्यते ।
सुखदु:खादिनिर्मुक्तेर्मोक्षे पाषाणवत्स्थितम् ॥१२/६३॥
नैयायिक+मते अ-भाव: प्रत्यक्षात् न अतिरिच्यते ।
सुख+दु:ख+आदि+निर्मुक्ते: मोक्षे पाषाण+वत् स्थितम् ॥१२/६३॥
आत्मन: प्रवदनवादी मुर्ख: किन्न वदत्यसौ ।
स्थितमज्ञानसाक्षित्वं नित्यानन्दत्वमात्मन: ॥१२/६४॥
आत्मन: प्रवदन् वादी मुर्ख: किं न वदति असौ ।
स्थितम् अ-ज्ञान+साक्षित्वं नित्य+आनन्दत्वम् आत्मन: ॥१२/६४॥

According to the view of the Naiyāyikas, the negative proof of non- perception (relating to the negation of existence) does not differ from direct perception. This foolish philosophic disputant, who declares that, in the state of final beatitude, the Self exists (much) like a stone owing to the cessation of pleasure, pain, etc., what will he not say?

Thus it is established that the self has the character of being the witness of nescience and of being eternal bliss (also) (63-64).

वदन्त्यत्रात्मनानात्वं देहेषु प्रतिवादिन: ।
एकश्चेत्सर्वभूतेषु पुंसि कस्मिन् मृते सति ॥
सर्वे म्रियेरन् जायेरन् जाते कुर्युश्च कुर्वति ।
एवं विरुद्धधर्मा हि दृश्यन्ते सर्वजन्तुषु ॥१२/६६॥
वदन्ति अत्र आत्म+नानात्वं देहेषु प्रतिवादिन: ।
एक: चेत् सर्व+भूतेषु पुंसि कस्मिन् मृते सति ॥
सर्वे म्रियेरन् जायेरन् जाते कुर्यु: च कुर्वति ।
एवं विरुद्ध+धर्मा: हि दृश्यन्ते सर्व+जन्तुषु ॥१२/६५-६६॥

(Our) opponents say in this conception that there is (in the universe) a plurality of souls. (They say) - "If (the *ātman*) is (only) one in all beings, then, on any one man dying, all will have to die; on (any one) being born, (all) will have to do (that same act). In these respects in all beings contradictory characteristics are (to be) seen (65-66).

अत: सर्वशरीरेषु नानात्वं चात्मनां स्थितम् ।
विरुद्धधर्मदृष्ट्यैव पुंसां भेदस्त्वयेरित: ॥१२/६७॥
अत: सर्व+शरीरेषु नानात्वं च आत्मनां स्थितम् ।
विरुद्ध+धर्म+दृष्ट्या एव पुंसां भेद: त्वया ईरित: ॥१२/६७॥
विरुद्धधर्मा दृष्टा: क्व देहे वात्मनि वा वद ।
देहे चेद्देहनानात्वं सिद्धं किन्तेन चात्मनि ॥१२/६८॥
विरुद्ध+धर्मा: दृष्टा: क्व देहे वा आत्मनि वा वद ।
देहे चेत् देह+नानात्वं सिद्धं किं तेन च आत्मनि ॥१२/६८॥

